श्रीवादिराजतीर्थश्रीपादविरचितः

तीर्थप्रबन्धः

श्रीनारायणाचार्यकृतटीकया संवलितः

TIRTHAPRABANDHA

of

SRI VADIRAJA TIRTHA

(With the commentry of Sri Narayanacharya)

सम्पादकः :

प्रो। व्यासनकेरे प्रभञ्जनाचार्यः, M.A.

ವೇದಾಂತ ಬುಕ್ ಹೌಸ್
ಬುಕ್‌ಸೆಲ್ಲರ್ಸ್ ಬಳಿ, ಚಾಮರಾಜ ಪೇಟೆ
ಉಡುಪಿ ಪಿನ್‌ಕೋಡ್ 576101
ಬೆಂಗಳೂರು-18

प्रकाशनम् :

श्रीमन्माध्वराद्धान्तसंवर्धनी सभा

भण्डारकेरे मठः, उडुपि - 576 101

TIRTHAPRABANDHA of Sri VADIRAJA TIRTHA (with the commentary of Sri Narayanaacharya)—Edited critically with an Introduction and notes by Prof. Vyasanakere Prabhanjanacharya, M. A, Reader in Sanskrit, Government R. C. College of Commerce, Bangalore-560001 and published by Sri Man Madhwaraddhanta Samvardhani Sabha, Bhandarkere Math, Udupi (D.K)-576101.

First Edition : 1990 1000 Copies.

Price : Rs. 18/-

Finance : R. V. Murthy, Bombay.

Printed at :
NAYAK PRINTERS,
8, Neelipothaiah Lane,
O. T. C. Road Cross, Cottonpet,
BANGALORE - 560 053.

प्रास्ताविकम्

सर्वज्ञश्रीपूर्णप्रज्ञगुरुसार्वभौमपीठाधीशाः मायीभवैरिणः माध्वाराद्धान्त-वनचारिणः वचोनखरिणः सर्वसज्जनसुविदितमहामाहात्म्याः सर्वज्ञकल्प-श्रीवादिराजगुरुराजकेसरिणः सर्वैः सज्जनैः प्रत्यहं प्रातः सर्वदा सर्वकार्यारंभे च संस्मरणीया इत्यत्र न विशयलेशोऽपि ।

शताधिकातिश्रेष्ठग्रंथरत्नप्रणेतृणां तेषां युक्तिमल्लिकाख्यः ग्रंथराजः दुर्वादिरूपशैशिरहिमान्याः प्रखरसहस्रकिरणतरणिरिव सज्जनकुमुदवृन्दस्य चन्द्रमा इव रसिकचंचरीकाणां मकरंद इव राराज्यते ।

तत्प्रणीतः तीर्थप्रबन्धाख्यतीर्थराजः स्वार्थरत्नज्ञानाख्यमज्जनेन सर्वतीर्थस्नानमहाफलं ततोऽयधिकं श्रीमदानन्दतीर्थतीर्थार्थयथार्थज्ञानरूपं फलं च प्रददाति ।

एतादृशमहाफलसाधनतीर्थप्रबन्धग्रंथराजं सर्वे सज्जनाः श्रुत्वा मत्वा नित्यं पठित्वा शिष्येभ्यः प्रोक्त्वा च कृतार्थाः भवन्तु ।

आर्. वि. मूर्तिनाम्ना प्रसिद्धा भक्ताः अस्य तीर्थप्रबन्धस्य प्रकाशनार्थं धनदातारः । सव्याख्यानस्यास्य ग्रंथस्य संशोधकाः शास्त्रप्रवचनचणाः प्रभंजनाचार्याः । उभयोरेतयोः विशेषतः ज्ञानभक्त्यादिदानेन श्रीवादिराज-गुर्वन्तर्गतः श्रीहयग्रीवः अनुगृह्णातु ।

उडुपि - ५७६ १०१
५-६-१९९०

श्रीविद्यामान्तीर्थश्रीपादाः
श्रीपलिमारु-मण्डारकेरेमठाधीशाः

INTRODUCTION

Sri Vadiraja Tirtha (1480–1600 A.D.[1])

Sri Vadirajatirtha, the author of तीर्थप्रबन्ध is one of the most prominent exponents of Dwaita–vedanta. In fact, he stands foremost among the post–Vyasaraja (1460 1539 A.D.) Writers. According to tradition and songs of Sri Purandaradasa and other Haridasas,[2] he was a student of Sri Vyasaraja.

Sri Vadiraja was a pontiff of Sri Soda Math, one of the eight Maths of Udupi. Huvinakere, a village near Kumbhasi (one of the seven prominent holy places of Parashurama Kshetra) Kundapur District, was his place of birth; Ramacharya belonging to Samaveda and Gowridevi (Sarasvati) were his parents; and 'Bhu–varaha' was his pre–sanyasa name. He[3] was ordained to Sanyasa, at a tender age of eight, by Sri Vagishatirtha. He studied the basic works

---

1 स्वस्ति श्रीजयशालिवाहनशके सार्धात् सहस्रात् परं
द्वाविंशे शरदां गते प्रभवति श्रीशार्वरीवत्सरे ।
मासे फाल्गुनके सितेतरतृतीयायां तिथौ विद्दिने
स्वातीहर्षणसंयुते हरिपदं श्रीवादिराजो ह्यगात् ॥

—इति श्रीवादिराजगुरुवरचरितामृते (6/72) ।

2 संत श्रीविजयींद्र वादिराजरेंब सच्छिष्यरन पडदु ।

—श्री पुरंदरदासरु ।

" विजयींद्र संत वादिराज गोविंद पुरंदररिंतु सच्छिष्यरनु पडेदु "

—श्रीविजयदासरु ।

3 Surottama Tirtha of Sri Bhandarkere Math, was his younger brother. He has commented upon his युक्तिमल्लिका and पाषंडमतखण्डन; His commentary on सन्यासपद्धति of Sri Vishnutirtha is also available. A commentry on sri Madhva's सदाचारस्मृति is also ascribed ro him.

under Sri Vagishatirtha and Sri Vidyanidhitirtha.[1] He enjoyed a life of 120 years ; and then entered Vrindavana at Sode, a villiage near Sirsi [North Canara District], which was his second headquarters.

[2]Besides being a saint of high mystic powers, Sri Vadiraja was a great Scholar, a super-controversialist, a social reformer an able administrator and a great poet. Opponents belonging to Jaina, Saiva and Adwaita were defeated by him. Arasappa Nayak of Sode was his staunch follower.

प्रसंगाभरणातीर्थ, सर्वज्ञकल्प, षट्दर्शनषण्मुख and कविकुलतिलक are some of his titles.

Sri Vadiraja had many disciples and followers in Gujarat[3] and other northern Indian parts also ; most of them probably, were converts under his influence

Krishnadevaraya, the famous emperor of Vijayanagar and his brother Achyutadevaraya were also his disciples.[4]

Sri Vadiraja is held very high in the history of Dvaitha literature as a writer, who thinks in Philosophy and argues in poetry.

---

[1] हयग्रीवस्य मध्वस्य (वाण्या) विद्या(निधि)गुरोर्गुरोः । —युक्तिमल्लिका (1/7)
विद्यानिधेः विद्यानिधिमुन्यादेः —(युक्तिमल्लिका टीका)

[2] (वादिराज) वृत्तरत्नसंग्रह (of three प्रबन्धS in 187 Slokas) of रघुनाथाचार्य, his direct disciple gives a fairly complete and authentic account of his life and achievements. वादिराजगुरुवरचरितामृत (of nine बिंदुS-438 verses) of रामचंद्राचार्य and वादिराजगुणरत्नमाला (of eleven विकासS-741 verses) of षट्पुराचार्य give mote details regarding his ife.

[3] गुर्जरादिषु देशेषु स्वशिष्यान् कृपया युतः ।
तत्रत्यानेव कृतवान् विष्णुदीक्षाप्रवर्तकान ॥
—इति वृत्तरत्नसंग्रहे (I/56)

[4] Sri Vadiraja Guruvaracharitharatnam-3/34–35.

Works of Sri Vadiraja Tirtha

1. Commentaries

1. महाभारतलक्षालंकारः[1]
2. महाभारततात्पर्यनिर्णयभाव-प्रकाशिका[2]
3. तलवकारोपनिषद्भाष्यटीका[2]
4. तैत्तिरीयोपनिषद्भाष्यटीका[2]
5. काठकोपनिषद्भाष्यटीका[2]
6. आथर्वणोपनिषद्भाष्यटीका[2]
7. माण्डूकोपनिषद्भाष्यटीका[2]
8. तंत्रसारटीका[3]
9. सनत्सुजातीयव्याख्यानम्[4]

2. Glosses

1. न्यायसुधागुर्वर्थदीपिका[2]
2. तत्त्वप्रकाशिकागुर्वर्थदीपिका[2]
3. ईशावास्योपनिषद्भाष्यटीकाटिप्पणी[2]
4. षट्प्रश्नोपनिषद्भाष्यटीकाटिप्पणी[2]
5. गीताभाष्यटिप्पणी[3]

3. Independent works

1. युक्तिमल्लिका[4] (5379)[7]
2. न्यायरत्नावली[1] (901)
3. चक्रस्तुतिः[2] (76)
4. उपन्यासरत्नमाला[2]
5. हरिभक्तिलता[1] (394)
6. श्रुतितत्त्वप्रकाशिका[1] (507)
7. सदाचारस्मृतिः[2] (6)
8. संकल्पपद्धतिः[2] (6)
9. एकादशीनिर्णयः[2] (55)
10. भूगोलनिर्णयः[2] (361)
11. तारतम्यम्[5] (81)
12. चिंताखण्डनम्[2] (15)
13. पाषण्डखण्डनव्यासस्तोत्रम् (30)
14. पाषण्डमतखण्डनम्[6] (129)

---

1. Published : Sri Soda Vadiraja Math, Udupi.
2. Published : Sri Vadirajiya Grantha Prakashana Samithi, Udupi.
3. Inextant.
4. Published : T. R. Krishnacharya, Kumbhakonam.
5. Ms. Sri Jayatirtha Sanskrit Manuscripts Library, Vyasanakere,
6. P. Ramaattva Prakasha Press, Belgaum
7. The numbers within the brackets indicate the total No. of verses

15. कल्पलता[2]
16. विवरणत्रणम्[2]
17. शकुनमाला[5]
18. मुहूर्तराजः[5]
19. माध्ववाग्वज्रावलिः[3]
20. संस्कृतसूत्रार्थः[3]
21. नयसिद्धांतसंग्रहः[7]
22. अधिकरणनामावलिः[2]
23. श्रीमद्भागवतानुक्रमणिका[8]
24. वायुस्तुतिपुरश्चरणविधिः[9]

4. Independent works (Kavyas)

1. रुग्मिणीशविजयः (1241)
2. सरसभारतीविलासः (700)
3. तीर्थप्रबंधः (235)
4. कविकंदबकण्ठभूषा (15)

5. Independent works (Stotras)

1. रमेशस्तुतिः (4)
2. रौप्यपीठकृष्णस्तुतिः (9)
3. श्रीकृष्णस्तवः (9)
4. श्रीकृष्णस्तुतिः (9)
5. अष्टमहिषीयुक्तकृष्णस्तुतिः (9)
6. श्रीकृष्णस्तोत्रम् (9)
7. आपादस्तोत्रम् (11)
8. उक्तिप्रत्युक्तिस्तोत्रम् (3)
9. श्रीरामकवचम् (24)
10. श्रीरामदशकम् (11)
11. अवतारत्रयस्तोत्रम् (3)
12. श्रीवेदव्यासाष्टकम् (9)
13. श्रीव्यासवर्णनम् (2)
14. त्रिविक्रमस्तोत्रम् (18)
15. हर्यष्टकम् (9)
16. हयास्यदशकम् (11)
17. हयवदनाष्टकम् (9)
18. हयास्यनुतिपंचकम् (6)
19. हयग्रीवध्यानप्रकरणम् (39)
20. हयग्रीवस्तुतिः (18)
21. हयग्रीवसंपदास्तोत्रम् (4)
22. अक्षपंचकम् (6)
23. वराहपंचकम् (5)
24. प्रार्थनादशकम् (12)
25. वराहहयवदनस्तोत्रम् (6)
26. हयग्रीवस्तोत्रम् (11)

---

7. P. Chikkerur Govindachar. Harapanahalli.

8 & 9. Published.

27. परमस्तुतिः (9)
28. नरहर्यष्टकम् (9)
29. ऋणमोचनस्तोत्रम् (9)
30. वेंकटेशमंगलाष्टकम् (9)
31. दशावतारस्तोत्रम् (9)
32. दशावतारस्तुतिः (34)
33. चतुर्विंशतिमूर्तिभेदस्तोत्रम् (8)
34. धीशुद्धिस्तोत्रम् (12)
35. श्रीश्रीशगुणदर्पणम् (19)
36. श्लोकत्रयम् (नैवेद्यप्रकारः) (4)
37. स्वप्नपद्यम् (1)
38. सप्तरात्रोत्सवप्रकारः (23)
39. अभयसंस्तवः (13)
40. लक्ष्म्यार्यावृत्तम् (13)
41. दुर्गास्तवः (15)
42. मध्वाष्टकम् (9)
43. विभीषणहनूमत्संवाद(रूप) वायुस्तुतिः (15)
44. मध्वमुनिप्रतापाष्टकम् (9)
45. सहस्रारस्तुतिः(चक्रस्तुतिः) (13)
46. कुरुस्तुतिः (15)
47. नवग्रहस्तोत्रम् (5)
48. हरिभक्ताष्टकम् (9)
49. विष्णुस्तुतिः (9)
50. श्रीहयग्रीवस्तोत्रम् (6)
51. श्रीपादराजाष्टकम् (9)
52. विष्णुस्तुतिः
53. श्रीरामपंचकम् (6)*

6. Independent works (Kannada works)

1. वैकुण्ठवर्णने
2. लक्ष्मीशोभाने
3. स्वप्नपद
4. गुणक्रिये
5. भ्रमरगीते
6. नमस्कारस्तोत्र
7. केशवनाम
8. नैवेद्यप्रकरणम्
9. अवतारत्रयसुव्वाली
10. देवरनामगळु
11. उगाभोगगळु
12. सुळादिगळु
13. श्रीकृष्णबाललीले

इत्यादि

---

* Another work called स्वाप्नवृंदावनाख्यान is also ascribed to him.

Sri Vadiraja was a prolific writer; He has written works in Sanskrit, Kannada and Tulu languages. More than 100 works stand to his credit. His major independent works are about twenty five in number; His other works include commentaries, glosses, refutations and stotras. Most of his Kannada works are in verse form; they include devaranamas, ugabhogas, suladis and independent works like Vykuntha varnane, Gunda kriye and Swapnapada.

Yuktimallika,[1] of 5379[2] verses, is his magnum-opus; It is divided into five chapters called Saurabhas (गुण, शुद्धि, भेद, विश्व & फलसौरभs). It is essentially an elaboration of principle teachings of Sri Madhvacharya's Brahmasutra Bhashya, on the basis of his Anuvyakhyana. न्यायरत्नावलि (in 901 verses) हरिभक्तिलता (in 394 verses) श्रुतितत्त्वप्रकाशिका (in (507 verses), चक्रमीमांसा [in 76 verses] भूगोळनिर्णय (in 361 verses) एकादशीनिर्णय (in 55 verses) and पाषण्डमतखण्डन (in 129 verses) are some of his important metrical works.

Among his commentaries, न्यायसुधागुर्वर्थदीपिका (6000 granthas) तत्त्वप्रकाशिकागुर्वर्थदीपिका (in 3500 grantas), महाभारततात्पर्यनिर्णय भावप्रकाशिका and महाभारतलक्षालंकार are widely known. His विवरणव्रगम् (in 2500 grantas) is a refutation of Panchapadika vivarana of Prakashatman and its commentary 'Tattvadeepana'; and his कल्पलता is an adverse criticism of Pramana-Manjari of Vadirajasuri, a Jaina Scholar.

---

1 Sri Surottamatirtha, its commentor, ascribes his commentry also to Sri Vadiraja.

कृतिमेतां स्वयं कृत्वा वादिराजो बुधाग्रणीः ।
ख्यापयामास मन्नाम्ना संतो ह्याश्रितवत्सलाः ॥

—इति युक्तिमल्लिकाव्याख्यायां भावविलासिन्याम् ।

स्वकृतग्रंथराजस्य युक्तिसारस्य वादिराट् ।
टीकां कृत्वा स्वयं तस्य नाम्ना ख्यापितवानहो ॥

—इति वृत्तरत्नसंग्रहे च (III. 30)

2 गुणसौरभ (1019), शुद्धिसौरभ (532), भेदसौरभ (1591), विश्वसौरभ (1237) and फलसौरभ (1000) verses.

रुक्मिणीशविजय (a mahakavya of 19 cantos and 1241 verses) सरसभारतीविलास (in 12 vilasas and 700 verses) and तीर्थप्रबन्ध (in 235 verses) are his principle काव्य works.

More than half of his works are in the nature of स्तोत्रs.[1] In fact, no other Dvaitha-writer has got such a variety of stotra works to his credit. They include दशावतारस्तोत्रs (2), कृष्णस्तोत्रs (7), हयग्रीवस्तोत्रs (12), व्यासस्तोत्रs (2), नरसिंहस्तोत्रs (2), लक्ष्मीस्तोत्रs (3), मध्वस्तोत्रs (4), and others.

Tirtha Prabandha

Tirtha Prabandha is a short metrical work (235 verse) in four chapters called प्रबंधs (पश्चिम, उत्तर, पूर्व & दक्षिण)

Western Prabandha Covers :--Udupi, Pajaka (10 Km from Udupi), Yelur (near Pajaka), Madhyavata (near Bantval), Chintamani Narashimha (near Uppinangadi), Netravati (river) Netravati-Kumaradhara Sangama (Uppinangadi), Kumaradhara, Subramanya [170 Km from Udupi], Payasvini (Kerala State), Suvarna, also called Varahi (near Udupi), Kumbhasi (5Km from Huvinkere), Kotisvara (20Km from Udupi), Kroda Sankaranarayana (55km from Udupi) Kollur (50Km from Kundapur), Sahyadri. Harihara (75Km from Shimoga), Bidarahalli (2Km from Magala--Bellary district), Bankapur (50 Km from Hubli), Varada river, Banavasi Madhukesvara (32km from Sirsi), Dharmaganga river, Salmali river, Soda (20Km from Sirsi), Manjuguni (40km from Sirsi), Ena-Bhairava (20Km from Manjuguni), Gokarna (100Km from Sirsi), Kolhapur (60Km from Miraj), Tapti river, Narmada river, Prabhasa (Modern Somanath-Veraval), Banaganga (Bhalakatirtha-3Km from Prabhasa), Dwarka (360km from Ahmedabad), Siddhapuri (100Kms from Ahmedabad), and Pushkara (10Km from Ajmer).

---

[1] सुश्राव्यकाव्यस्तुतियुक्तिसारं गाथाश्च नानाविधशब्दहृद्याः ।
ज्ञानादिदाश्चाप्रतिमाः कवींद्रः श्रीवादिराजो व्यतनोदसंख्यान् ॥

—इति वृत्तरत्नसंग्रहे III. 31.

Northern Prabandha Covers,

Krishna (river), Pandharpur (60km from Sholapur), Godavari (river), Yamuna (river), Triveni, Ganga (river), Kasi (Varanasi), Madhura, Vrindavan (12km from Madhura), Ayodhya (125Km from Lucknow), Naimisharanya (120Km from Lucknow), Hastinapur (35Km from Meerat), Kurukshetra (160km from Delhi and Haridwar), Badari (300Km from Haridwar).

Eastern Prabandha Covers,

Ganga–Sagara Sangama (150Km from Calcutta), Jagannath Puri, Srishaila (112Km from kurnol), Ahobala (near Srishaila), Bhavanashini (near Ahobala), Nivritti Sangama (30Km from Kurnol), Pampa (12Km from Hospet), Anegundi (15Km from Hospet), Malkhed (40Km from Gulbarga), Tirupathi, Survarnamukhi (river), Kanchi (120km from Tirupathi), Arunachalam (40km from Kanchi), Tirukkoilur (40km from Arunachalam), Vridchachalam (50kms from Tirukkoilur), Sri Musnna (50 km from Tiruakkoilur), Kumbhakonam (100km from Sri Mushnam).

Southern Prabandha includes, Srirangam (6km from Tiruchirapalli), Kaveri (river), Vrishabhachalam (20km from Madurai), Nupura Ganga (near Vrishabhachalam), Darbhashayana (10km from Ramnad), Ramasethu, Rameshwar, Ramapada (5km from Rameshwar), Tamraparni (Tirunelveli), Kanyakumari (30km from Totadri), Shuchindram (12km from kanayakumari), Adikeshava (Modern Tiruvattar–20km from Ananthashayanam), Ghruthamala (30km from Tiruvattar), Ananthashayana (Modern Trivandrum–75km from Kanyakumari).

Tirthaprabandha is primarily a record of Sri Vadiraja's nation–wide tour of all the important pilgrim centres in India.* It gives all the important details regarding the rivers, places and deities concered, in a charming way; some of the descriptions

---

* However, माया (Haridwar), अवंती (Modern Ujjaini), two places of the seven prominent places, सिंधु, one of the seven prominent rivers, do not find any reference in Thirthaprabandha,

The mention of मथुरा, विश्रांतितीर्थ, यमुना and द्वारावती also comes in Vadiraja's रुक्मिणीशविजय; and that of गंगा and तुंगभद्रा comes in his सरसभारतीविलास.

तुंगे तुरंगवदनोत्तुंगदंष्ट्रासमुद्भवे ।
तं गेयं कविभिर्मेऽतरंगे सांगं स्थिरीकुरु ॥

—इति सरसभारतीविलासे (II, 48) (for verse 1/20)

इहाखिलैश्वर्यसुभोगवृद्धेः परत्र निश्रेयससौख्यसिद्धेः ।
महः परं द्वारमवाप्य पृथ्व्यामसौ पुरी द्वारवती बभूव ॥

यतोऽभितोऽच्छस्फटिकावदातलसत्कवाटांतरिताऽपि सेयम् ।
पुरी नृणां द्वारवतीव भाति ततोऽपि तां द्वारवतीं वंदति ॥

यतः कवाटे विवृतेऽपि सेयं पुरी कवाटांतरितेव भाति ।
हरिन्मणीनां प्रभया महत्या कथं नु सा द्वारवतीति मन्ये ॥

यदीयरत्नावृतहैमवप्रसकाशमभ्येत्य निवर्तते स्म ।
समुद्यताऽऽसीत् प्रतिबिंबराशीन् निरीक्ष्य दीना बहुशोऽरिसेना ॥

मुक्तावलीराजितसर्वगेहा नित्यं प्रमोदाशनसत्समूहा ।
दुष्टैरगम्या दयिता मुरोरेर्मुक्तिप्रभा द्वारवती पुरी सा ॥

विचित्ररत्नावृतवप्रसौधगृहांगणागोपुरवापिकौघम् ।
इदं पुरीरत्नमवाप्य नूनं बभूव रत्नाकरशब्दितोऽब्धिः ॥

यदंघ्रितीर्थेन यदीयनाम्ना बलेन काशी प्रथिता किलासीत् ।
मुरद्विषस्तस्य निवासभूता पुरी त्रिलोक्यामियमद्वितीया ॥

—इत्यादि रुग्मिणीशविजये (17/26–68) (for verse 1/90)

'गोमत्यास्तटनिकटेऽच्छकीर्तिचंद्र'

—इत्यादि सुमध्वविजये (16/2–5) (for verse 1/93)

अघभंगे जगत्तुंगे सुतरंगे हरेःपदे ।
कृतसंगे नभोगंगे सदपांगे श्रमं हर ॥
नागारिवाहनांघ्र्यब्जयोगात् त्रैलोक्यपावनि ।
भागीरथि नमस्तुभ्यं रोगं मे हर देहगम् ॥
रमारमणपादाब्जद्युमद्रेणुभिरंकिते ।
नमो धवलगंगे ते श्रमं मे हर निर्मले ॥
—इति सरसभारतीविलासे (II 45–47) (for verse 2/22)

मधुरा मधुरा येन समभूत् समभूज्जिता ।
स्मरत स्मरतातं तं महतामहतार्थदम् ॥
कृष्णोदारविहारखण्डितमलं यस्यां जलं मगलं
तत्पादाम्बुजलक्ष्मलक्ष्यविभवा धन्यस्थली यत्स्थली ।
यद्गेहानि कृतस्पृहाणि रमया नित्यं स्वभर्तुः स्थितेः
दद्यात्सा मधुरा पुरी शुभकरी श्रेयांसि भूयांसि नः ॥
—इति रुग्मिणीशविजये (XII 11, 12) (for verse 2/31)

यमिवृंदमनश्चंद्रः श्रमं परिहरन्निव ।
यमुनाकूलमगमद्विमलीकर्तुमंजसा ॥
—इति रुग्मिणीशविजये (XI. 64) (for verse 2/32)

ततः कलेरंतमवाप्य धर्मज्ञानादिकल्याणगुणप्रहीणे ।
लोके विरिंचत्रिपुरघ्नशक्रपूर्वाः पयोब्धिं त्रिदशाः प्रजग्मुः ॥
नारायणस्तैः स्तुतिपूर्वमर्थितो भवाय लोकस्य स शंभलाख्ये ।
ग्रामे मुनेर्विष्णुयशोऽभिधस्य गृहे बभूवाविरचिंत्यशक्तिः ॥
कलेस्तु कात्कारत एव कल्की ज्ञानं कलंकं सुखमेव तद्वान् ।
कल्कीति वा तेन समस्तदस्युविनाशनं तेन दिनाव्ययायि ॥
अधर्मवृतं विमुखं हरेश्च निहत्यनिःशेषजनं तुरंगी ।
संस्थापयामास स धर्मसेतुं ज्ञानं च भक्तिं च निजप्रजासु ॥
—इति महाभारततात्पर्यनिर्णये (32/165–168) (for verse 2/39)

Viz, कृष्णवर्णन, गंगावर्णन. नारायणवर्णन & रंगनाथवर्णन are simply of very high order. It is one of the very few great Sastra-kavyas known to the history of Sanskrit literature. In fact it is the only metrical work available in whole of the Sanskrit literature, regarding the importance of the तीर्थक्षेत्रs in the light of पुराणs. It's sastraic importance is clearly seen particularly in its powerful arguements in establishing (i) the distinction between Hari and Hara and (ii) ब्रह्महत्यादोषाभाव of Sri Rama.

Hence, Tirthaprabandha[1], though short, is really very great in its achievement. The readers of the poem will certainly get prepared mentally for the piligrimage in its truest spirit.

दुष्टकुलांतक कल्किस्वरूप धर्मविवर्धन मूलयुगादे ।

—इति द्वादशस्तोत्रे (6/8)

कलिमलहुतवह सुभग महोत्सव शरणद कल्कीश हे भव मम शरणम् ॥

—इति च द्वादशस्तोत्रे (9/14) (for verse 2/39)

अनंतपुरनाथ ते पदसुपद्मसेवी जनो
भवेद्विजितदुर्जनो दुरिततर्जनः सज्जनः !
उपैति च परां गतिं सततमुन्नतिं सन्नतिं
भवघ्न स पुनर्भवी परिभवी कथं स्याद्भवान् ॥

—इति सरसभारतीविलासे (I. 47) (for verse 4/38)

'मूलमाधव' is another important place referred to by Sri Vadiraja.

यदिंदिरायास्तदभूद्धि मूलं प्रियांगसंश्लेषमहोत्सवश्रियः ।
ततस्तदार्याः प्रवदंति नूनं स्थलं स्थलज्ञा भुवि **मूलमाधवम्** ॥

—इति रुग्मिणीशविजये (15/28)

[1] अटन् स्वयं तीर्थसमूहपूर्णां तीर्थप्रबंधं कृतवान् दयालुः ।
जनांस्तदावर्तनशीलिनश्च चकार तीर्थाटनपुण्यभाजः ॥

—इति वृत्तरत्नसंग्रहे (1/34)

अर्थिगळिगे परमार्थव तोरुव
तीर्थप्रबंधव कीर्तनेगैदे —श्री जगन्नाथदासरु.

Sri Vadiraja's style is particularly noted for its poetic approach and metaphysical accuracy.[1]

Narayanacharya, the Commentator

As evident from his own words, Narayanacharya, the commentator of तीर्थप्रबन्ध, was a direct disciple of Sri Vadiraja.[2] His father's name was Lakshmipathi Bhatta; He has also commented upon Sri Vadiraja's रुक्मिणीशविजय[2]. Both of his commentaries are ca led (गुरु) भावप्रकाशिकाs.

His commentary on Tirthaprabhandha like that of his on [3]रुक्मिणीशविजय is fairly a complete and an authentic one; As he himself has made very clear, it is mainly based on the interpretations offered by his guru Sri Vadiraja himself. In fact its speciality lies in this particular point. It is marked by simplicity of style and clarity of expression. His place is particularly important as the commentator of Sri Vadiraja's काव्य* works.

Present Edition of Tirthaprabandha

Tirthaprabandha with the commentary of Sri Narayanacharya was twice published from Ramatattva Prakasha Press, Belgaum; and the second edition was more or less a reprint of the first one. Though the editions were fairly good; there were two serious mistakes somehow crept in them:

---

[1] सविनोदं साट्टहासं सस्मितं सुस्वरान्वितम् ।
सरहस्यं सप्रमाणं वादिराजवचोऽमृतम् ॥

—इति वृत्तरत्नसंग्रहे (1/48)

[2] वाजिराजोक्तिचातुर्यमशक्यं ज्ञातुमञ्जसा ।
तथाऽपि वक्ष्ये तच्छिक्षामनुसृत्यैव लेशतः ॥

—इति तीर्थप्रबन्धव्याख्याने ।

3 He has reffered to his रुक्मिणीशविजयव्याख्यान, in ihe commentary of verse I. 85.

(1) Commentary of verse 93 of पश्चिमप्रबन्ध wrongly identifies सिद्धपुरी with द्वारका (सिद्धपुरीति द्वारकाया नामांतरम्-पत्र-45).

(2) Commentary of verse 18 of पूर्वप्रबंध wrongjy mentions the place of Sri Jayatirtha as गजगह्वर (गजगह्वरे जयतीर्थं वर्णयति-पत्र 78).

However, these were not the mistakes committed by the commentator ; they are decidedly the interpolations either by the scribes or by the editors. This is evident from the fact that no manuscript that I have come across contains these lines. In the first case, the line identifying सिद्धपुर with द्वारका is totally absent in all the manuscripts ; where as in the second case, the word 'गजगह्वरे' is an interpolation ; most of the manuscripts read as 'जयतीर्थं वर्णयति' and some as 'जयतीर्थाचार्यं वर्णयति'.

सिद्धपुरी, Modern सिद्धपुर, is none than other than मातृगया near Ahmedabad as evidant from पुराणs[1] and geography and मळखेड, not गजगह्वर, is the place of मूलबृंदावन of श्री जयतीर्थ ; this is established even beyond the shadow of doubt by number of powerful documents.[2]

---

[1] तद्वीरासीत् पुण्यतमं क्षेत्रं त्रैलोक्यविश्रुतम् ।
नाम्ना सिद्धपदं यत्र सा संसिद्धिमुपेयुषी ॥

—इति भागवते (3/33/31)

2 Following are some of the Important evidences regarding Sri Jayatirtha's moola brindavan at Malkhed :

(1) ध्यायन् **मलयखेटेऽसौ** रामपादाब्जहृन्मुनिः ।
उत्क्रांतः स्वं वपुर्भेजे नाकिभिः परिपूजितः ॥

—इति श्रीकरिकेहल्लि श्रीनीवासकृत जयींद्रोदये (6/72)

(2) आषाढकृष्णपंचम्यां विभवाभिधवत्सरे ।
कागिनीकूलसंशोभि**मळखेडा**ख्यसत्पुरे ॥

सीतारामं स्मरंश्चित्ते लयचिंतनपूर्वकम् ।
प्रविवेश हरिं त्मृस्वा मुनिर्वृंदावनं तदा ॥

—इति श्रीजयतीर्थगुणरत्नमालायाम् (3/37, 38)

(3) "**मळखेड**दल्लि श्रीटीकाचार्यरु गुहादल्लि प्रवेशिसिदरु ।"

—श्रीनारायणतीर्थाः

—For details see my article- 'श्रीजयतीर्थर मूलवृंदावनस्थल—मळखेड' published in तत्त्ववाद— Kannada monthly-January 1982 & 1987.

(4) श्रीमत्**कागिनीतीर**मंदिरं यतिशेखरम् ।
श्रीगुरुं जयतीर्थाख्यं सादरं नौमि संततम् ॥

—इति श्रीरघुनाथतीर्थाः (?)

(5) वृंदावने स्वसेवाकराणां सर्वदैव सर्वेष्टम् ।
दास्यन् **मळखेड**स्थे तार्तीयेनास्ति सन्निधानेन ॥

—इति श्रीरघुदांततीर्थविरचितजयतीर्थविजये (55)

(6) ततस्तु जयतीर्थास्ते जित्वा वादिगणान् बहून् ।
वृष्टिखेटं समागत्य गुरोर्वृंदावनांतिके ॥
विद्याधिराजतीर्थेभ्यो दत्वा संस्थानमुत्तमम् ।
विभवाष्टाढकृष्णाहिदिने हरिपदं ययुः ॥

—इति पूर्णबोधगुरुवंशकथाकल्पतरौ (7/1–3)

(7) विभवाषाढपंचम्यां कृष्णायां जयतीर्थराट् ।
भेजे विष्णुपदं तीरे कागिन्या **मळखेड**गे ॥

—इति गुरुचर्यायाम् ।

(8) दुर्गोत्लसत्**मलयखेट**पुरोपकण्ठसत्कागिनीपुलिनसुंदरमंदिरस्थम् ।
अक्षोभ्यतीर्थजयराड्रघुनाथतीर्थवृंदावनत्रितयमानमदेष साधुः ॥

—इति श्रीसत्यसंधविजये (5/26)

(9) नमाम्यविरतं श्रीमदवधूतशिरोमणीन् ।
कागिनीतीरसंवासिसमाह्वान् दीनरक्षकान् ॥

—इति जम्बुखण्डवादिराजाचार्यकृतविष्णुतीर्थविजये ।

10] Malkhed is a hojy place, where the mortal remains of Tikacharya ate interred ;....'the Brindavan of Tikacharya is situated at Malkhed'.
—Mysore State Gazetter. Gulbarga Distrlct [Pp. 17, 467]

(11) योगिगळरसने **मळखेडनिवास**
कागिनीतटवास विजयविठलदास

—श्रीविजयदासरु

(12) मोक्षदातर **अक्षोभ्यतीर्थर**
साक्षिलिप्पर अपेक्षरहितर

—श्रीविजयदासरु

(13) **मेघनाथपुर** ककुरवेणिपुरवास
राघवेश विजयविठलन्न दास

—श्रीविजयदासरु

(14) **मळखेड**कागिनीतीरवास

—श्रीवरदेशविठलरु

(15) आषाढबहुळपंचमियु बरुत—कळेवरवने बिडुत
व्यासविठलन पददले निरुत—**मळखेड**दोळु सतत

—कल्लूरु सुब्बण्णदासरु

(16) **मळखेड**दोळु बंदु तोरविनरहरिपादगळने स्मरिसि वृंदावनकोंड रायरिगे

—इति श्रीतोरविनरहरिकृत जयतीर्थविजये

17 He passed away at Malkhed in 1388 ; His mortal remains lie entombed there.
—Dr. B. N. K. Sharma, Philosophy of Sri Madhvacharya XV

18 Jayatirtha died in Malkhed.
—B. Venkoba Rao, Introduction to Vyasayogicharitam–P. xli

*As many as eight manuscripts have been collacted for the the purpose of this edition ; of those Mss. five belong to me (Sri Jayatirtha Sanskrit Manuscripts Library, Vysanakere) and

---

(19) परमपावनवृंदावन **मळिखेड** कागिनीनदि
तीरदि तपवाचरिसुत गुरुगळु इरुवरु ।
—हरपनहळ्ळि भीमव्व (भीमेशकृष्ण P. 106)

(20) (श्रीटीकाकृत्पादरु)—**मळखेडक्के** होगि अल्लि 1388ने विभव आषाढकृष्णपंचमीदिन हरिध्यानरतरादरु.
—डा। हेच् के. वेदव्यासाचार्यरु (गुरुचरित्ते P. 106)

(21) ' श्रीजयतीर्थर मूलवृंदावन **मळखेड**दल्लिदे ।
–श्रीविद्याप्रसन्नतीर्थर द्वादशवार्षिक पट्टाभिषेक स्मरणसंचिके (श्रीव्यासराजमठ, सोसले)

(22) (श्रीविजयींद्र) श्रीगळवरु ...श्रीजयतीर्थ श्रीमच्चरणरु वृंदावनस्थरागिद्द **मळखेड**क्के बंदु टीकारायर वृंदावनसन्निधानदल्लि स्वल्पकाल वासमाडि दशप्रकरणटीका टिप्पणिगळन्नु श्रीजयतीर्थरिगे समर्पिसि(दरु)....
—श्री राजा यस. गुरुराजाचार्यरु (अजय्यविजयींद्ररु (P. 112)

23 Number of old documents preserved in various Maths and oriental libraries and in my collection (Sri Jayatirtha Sanskrit Manuscripts LIbrary Vyasanakere-583 222.)

*Sri Vishnutirtha, Vedangatirtha,, Vedavedyatirtha and Vibudhavaryatirtha are some of the other pontiffs of Sri Soda Math who have enriched the Dvaita literature through their works.

I. Works of Sri VishnuTirtha

(4) संन्यासपद्धतिः
(2) श्रवणद्वादशीनिर्णयः
(3) विष्णुपंचकनिर्णयः
(4) पंचसंस्कारसंग्रहः

one each to Sri Uttaradi Math Bangalore, Sri Poornaprajna Vidyapeetha Bangalore and Sri Vidyadhisha Sanskrit manuscripts library (Prof K. T. Pandurangi's collection) Bangalore. I render my thanks to the authorities of those insititutions, I offer my pranamas to His Holinsss sri Vidyamanyatirtha Swamiji of Sri Bhandarkere and Palimar Maths for his kindness in entrusting the preparation of the present edition to me and publishing it through his "Sri ManMadhwaraddhantha Samvardhini Sabha, I thank Nayak Printers of Bangalore for faultless printing and fine get up and Sri M. V. Kalghatagi, Sri S. R. Pandurangi and Sri G. Sechagiri Rao for their assistance in seeing this wark through the press.

10-6-90
Bangalore–560 050

Vyasanakere Prabhanjancharya,
Pajaka, No. 6, 14th main, BSK I Stage.

II. Works of Sri VedatmaTirtha

(1) नखस्तुतिटीका
(2) वायुस्तुतिटीका (कविकर्णाकृतम्)

III. Works of Sri VedangaTirtha

(1) वायुस्तुतिटीका
(2) महाभारततात्पर्यनिर्णयटीका
(3) सुमध्वविजयटीका
(4) पारिजातहरणटीका
(5) गीताटिप्पणी
(6) भज मध्वेशम् (?)
(7) अणुमध्वविजयटीका

IV. Works of Sri VedavedyaTirtha

(1) तंत्रसारटीका
(2) वादिराजस्तुतिः

V. Works of VibudhavaryaTirtha

(1) विष्णुसहस्रनामटीका
(2) सुभद्राहरणम् (काव्यम्)

विषयानुक्रमणिका

— o —

ntroduction 4–22

पश्चिम प्रबन्धः–I (99) (1–66)

मंगलाचरणम् (1–4)	1	कोटीश्वरः (50)	36
विषयनिर्देशः (5)	6	क्रोडमुन्याश्रमः (51)	37
परशुरामक्षेत्रम् (6)	6	मूकांबिका (56, 57)	40
रजतपीठपुरम् (7–10)	7	सह्यपर्वतः (58)	41
श्रीकृष्णः (11–13)	10	हरिहर क्षेत्रम् (59, 60)	42
अनंतेश्वरः (14, 15)	18	वेणुपुरम् (64–67)	44
पाजकक्षेत्रम् (16)	19	बंकापुरस्थः केशवः (69)	47
दुर्गा (17–20)	20	वरदा नदी (70)	48
विश्वनाथः (21–25)	22	मधुकेश्वरः (71)	48
नंदिकेश्वरः (26)	24	धर्मगंगा नदी (72)	49
मध्यवाटमठम् (27)	25	शाल्मली नदी (73, 74)	49
वेदव्यासः (28, 29)	25	सोदा त्रिविक्रमः (75, 76)	50
चिंतामणिनरसिंहः (30, 31)	26	मंजुगुणि वेंकटेशः (77, 78)	51
नेत्रावती (32, 33)	27	एणभैरवः (79)	52
कुमारधारा नदी (34)	29	गोकर्णः (80–82)	53
सुब्रह्मण्य क्षेत्रम् (37, 38)	29	गोकर्णस्थो विनायकः (83)	54
वेदव्याससंपुटम् (43, 44)	33	कोल्हापुरस्था लक्ष्मीः (84, 85)	56
पयस्विनी नदी (45)	34	तापा (तपती) नदी (86)	57
सुवर्णा नदी (46)	35	नर्मदा नदी (87)	58
कुम्भासि क्षेत्रम् (47, 48)	35	प्रभासक्षेत्रम् (88)	59
कोटीश्वर क्षेत्रम् (49)	36	बाणगंगा (89)	59

द्वारकाक्षेत्रम् (90) 59
त्रिविक्रमः (91, 92) 59
गोमती नदी (93, 94) 61
चक्रतीर्थम् (95) 62
शंखोद्धारक्षेत्रम् (96) 63
गोपीचंदनम् (97) 64
सिद्धपुरी क्षेत्रम् (98) 65
पुष्करक्षेत्रम् (मातृगया) (99) 66

—o—

उत्तरप्रबन्धः II (46) (67–106)

कृष्णवेणी (1–4) 67
पुण्डरीकक्षेत्रम् (5) 69
विट्ठलः (6–8) 70
गोदावरी (9–11) 72
यमुना (12) 74
त्रिवेणी (13) 75
प्रयागमाधवः (14) 77
गंगा नदी (15–22) 77
काशीक्षेत्रम् (23) 84
बिंदुमाधवः (24) 85
विश्वनाथः (25, 26) 86
गयाक्षेत्रम् (27) 88
गया गदाधरः (28) 88
विष्णुपादः (29) 89
फल्गुनदी (30) 90
मधुरा (क्षेत्रम्) (31) 91
विश्रांतितीर्थम् (32, 33) 91
वृंदावनम् (34) 92
अयोध्याक्षेत्रम् (35) 93
नैमिषारण्यम् (36) 94
हस्तिनपुरी (37) 95
कुरुक्षेत्रम् (38) 96
शंबलक्षेत्रम् (39) 97
षट् प्रयागाः (40) 98
बदरिकाश्रमः (41) 98
बदरी नारायणः (42) 100
बदरीनारायणध्यानम् (43) 101
बदर्यां हयग्रीवः (44–46) 102

—o—

पूर्वप्रबन्धः III (43) (107–133)

गंगासागरसंगमः (1) 107
जगन्नाथः(पुरी) (2) 108
(श्रीशैल) मल्लिकार्जुनः (3) 108
अहोबलनृसिंहः (4–8) 109

भवनाशिनी (9) 113
निवृत्तिसंगमः (10) 113
तुंगभद्रा (11, 12) 114
विठ्ठलः (13) 115
विरूपाक्षः (14) 116
पंपाक्षेत्रम् (15) 116
(पंपास्था) दुर्गा (16) 117
गजगह्वरम् (17) 117
जयतीर्थमुनिः (18) 118
वेंकटेश्वरः (19–22) 120
शेषगिरिः; श्रीनिवासः (24–28) 122
सुवर्णमुखी (30) 125
(कांची) वरदराजः (31–33) 126
एकाम्रेश्वरः (34) 127
कामाक्षी (35, 36) 128
अरुणाचलेश्वरः (37) 129
त्रिविक्रमः (38) 130
वृद्धाचलेश्वरः (39, 40) 131
(श्रीमुष्ण) वराहः (41) 132
कुम्भघोणक्षेत्रम् (42, 43) 133

—o—

दक्षिणप्रबन्धः IV (47) (134–164)

श्रीरंगनाथः (1–8) 134
चंद्रपुष्करिणी (9) 138
कावेरी नदी (10–11) 138
वृषभशैलस्थो हरिः (12) 139
नूपुरगंगा (13) 140
दर्भशयनः (14) 140
रामसेतुः (15–19) 141
श्रीरामदेवः (20) 145
रामेश्वरः (21–25) 145
धनुष्कोटी (26, 27) 150
श्रीरामपादः (28, 29) 152
ताम्रपर्णी (30) 153
महेंद्रपर्वतः (31) 154
कन्यातीर्थम् (32–34) 154
अगस्त्यः (35) 156
शुचींद्रक्षेत्रम् (36) 156
आद्यनंतशयनः (37) 157
घृतमाला (38) 157
श्रीमदनंतशयनः (39–45) 158
उपसंहारः (46) 162
मंगलम् (47) 163
परिशिष्टम्—वादिराजप्रशस्तिः 165

तीर्थप्रबन्धप्रशस्तिः

वागीशयोगीशनिदेशमाप्य स वादिराजोऽखिलदेशचारी ।
क्षेत्राणि तीर्थानि निषेवमाणो वादीभसिंहो यशसा बभाजे ।
स्वदृष्टक्षेत्रतीर्थादिमाहात्म्यस्यावबोधकम् ।
तीर्थप्रबंधं कृतवान् पठतामघनाशनम् ॥
पठनाद्यस्य तीर्थादिसेवनाल्लभ्यमंजसा ।
सुकृतं जनतायाः स्यात्तं स्तोतुं को नु शक्नुयात् ॥

—इति श्रीवादिराजगुरुवरचरितामृते (2/15-17)

अटन् स्वयं तीर्थसमूहपूर्णां तीर्थप्रबन्धं कृतवान् दयालुः ।
जनांस्तदावर्तनशीलिनश्च चकार तीर्थाटनपुण्यभाजः ॥

—इति वृत्तरत्नसंग्रहे (1/34)

अर्थिगळिगे परमार्थव तोरुव तीर्थप्रबंधव कीर्तनगैदै ।

—श्रीजगन्नाथदासरु

श्रीवादिराजतीर्थ श्रीचरणविरचितः

तीर्थप्रबन्धः

श्रीनारायणाचार्यकृत व्याख्यया संवलितः

॥ श्रीमद्धनुमद्भीममध्वान्तर्गतरामकृष्णवेदव्यासात्मक श्रीलक्ष्मीहयग्रीवाय नमः ॥

॥ श्रीगुरुभ्यो नमः ॥ हरिः ॐ ॥

मंगलाचरणम्

हरिक्षीरांबुधेः स्वैरं भवघर्मरिपोर्मनः ।
विहराहरहश्चित्रचारित्रचतुरोर्मिषु ॥ १ ॥

तपोविद्याविरक्त्यादिसद्गुणौघाकरानहम् ।
वादिराजगुरून् वंदे हयग्रीवदयाश्रयान् ॥ १ ॥

वाजिराजमुखांभोजनिस्सृता वाक्सरस्वती ।
हयग्रीवयशोगंगासंगाऽस्मान् पावयत्वलम् ॥ २ ॥

वादिराजमुनींद्रेण रचितं सज्जनामृतम् ।
तीर्थप्रबंधमद्वंद्वं व्याकुर्वेऽहं यथामति ॥ ३ ॥

वादिराजोक्तिचातुर्यमशवयं ज्ञातुमञ्जसा ।
तथापि वक्ष्ये तच्छिक्षामनुसृत्यैव केवलम्(लेशतः) ॥ ४ ॥

अथानवरतवाजिवदनाराधनलब्धविद्यातिशयः कविकुलाग्रणीर्वादिराजमुनिः स्वजन्ममहीमारभ्य स्वसंचरितसकलतीर्थक्षेत्रमहिमावलोकनेन समुल्लसितमनःप्रसादः तन्महिमानुवर्णनलोलुपतया तीर्थक्षेत्रदेवस्तुत्यादिरूपप्रबंधं चिकीर्षुः प्रारिप्सिताखिलशुभकार्येषु श्रीमन्नारायणगुणानुस्मरणरूपमंगलं कर्तव्यमिति स्वांतोपलक्षितसज्जनान् प्रत्युपदिशति । **हरीति** । हे **मनः** त्वम् । स्वस्य विष्णुभक्ततया स्वमनस्सदृशसकलविष्णुभक्तमनसां विहारयोग्यत्वस्यापि लाभेन साधिकारिकत्वसूचनाय चेयं संबुद्धिः । **भवघर्मरिपोः**

भवः संसारः स एव घर्मस्तस्य रिपोः । क्षीरांबुधिरपि घर्मपरिहारी । अयमपि भवघर्मापहारी । अतस्तयोस्साम्यमुचितमिति सूचनायास्य विष्णु-कथारूपप्रबंधस्य मोक्षफलसूचनाय चेदं विशेषणम् । **हरिक्षीरांबुधेः** हरिरेव क्षीरांबुधिः । गांभीर्यादिगुणयोगात् । तस्य हरतीति व्युत्पत्त्या भवघर्म-हारित्वमस्यैव युक्तमिति सूचनाय हरिपदम् । **चित्रचारित्रचतुरोर्मिषु** चित्राणि अघटितघटकशक्तियुक्तत्वेनाश्चर्यतमानि । चरित्राण्येव चारित्राणि । प्रज्ञादिभ्यश्चे[1]ति स्वार्थेऽण् प्रत्ययः । जगत्सर्जनादिकर्मण्येव चतुराः । तापोपशमादौ प्रौढाः । ऊर्मयस्तरंगास्तेषु । 'भंगस्तरंगऊर्मि'रित्यमरः । इतर-तरंगाणां बहुनिमज्जने गदतोऽपकारित्वमप्यस्ति । हरिकथारूपतरंगाणां तु अहरहर्विहरणेऽपि तन्नास्तीति सूचनाय चतुरपदम् । हरिचरित्राणामनंतत्व-द्योतनाय शक्तिव्यक्त्यात्मना कदाचिद्दर्शनं कदाचिदंतर्धानं चेतिसूचनाय ऊर्मीणां समुद्रेणेव चारित्राणां हरिणाऽभेदसूचनाय चोर्मित्वोक्तिः । तर्हि कथं भेद-सापेक्षसंबंधार्थकषष्ठीति शंकापरिहाराय भेदहीनेऽपि भेदकार्यनिर्वाहकशक्ति-विशेषस्य*[1] विशेषणाश्चर्यतमत्वादिति सूचनाय चित्रपदम् । 'विस्मयोऽद्भुत-माश्चर्यं चित्र'मित्यमरः । **अहरहः** प्रतिदिनम् । कालाध्वनोरत्यंतसंयोग[2] इति द्वितीया । स्मर्तव्यः सततंविष्णु*[2]रिति स्मृतेः । **स्वैरं** यथेष्टम् । **विहर** रमस्व ।

---

*[1] सर्वेषां ब्रह्मधर्माणां ब्रह्मणा सविशिषोऽत्यन्ताभेदः । क्रियादीनां नित्यता शक्तिव्यक्तिरूपता व्यक्तिरूपस्यापि नित्यता शक्तिरूपस्याप्यभिन्नता सविशेषता विशेषस्याभेदः स्वनिर्वाहकता चेति । न ह्येतेष्वन्यतमस्याप्य-कल्पनायामुदाहृतोभयव्यपदेशविरोधशान्तिर्भवतीति ।

—इति न्यायसुधायाम् (III. ii. 15)

*[2] स्मर्तव्यः सततं विष्णुर्विस्मर्तव्यो न जातुचित् ।
सर्वे विधिनिषेधाः स्युरेतयोरेव किङ्कराः ॥

—इति महाभारततात्पर्यनिर्णयोदाहृतमहाभारतवचनम् । पाद्मे च

---

[1] पा. सू. 5/4/38 [2] पा. सू. 2/3/5

संसारदुःखपरिहाराय हरेर्जगत्सर्जनादिदिव्यकर्माणि निरंतरं स्मरेत्यर्थः । ह्वृ हरण इति धातोर्विपूर्वकाल्लोट् । उपसर्गवशादेव विहरणार्थकत्वं च । सकलसज्जनमनोरंजकविचित्रहरिचारित्रनिरूपकतयाऽस्य ग्रंथस्य सविषयकत्वं सूचितम् । लोडादेशस्य सेर्ह्यादेशे अतोहेरिति हि लोपः । स्मरणजन्य-सुखानुभवो न करणमात्रस्यांतःकरणस्य । किंतु स्मरणकर्तृजीवस्येति द्योतनाय विहरेति परस्मैपदप्रयोगः । स्मरणे स्वतंत्रसाधनत्वान्मनसः कर्तृत्वोपचारः । अभिवर्ण्यमानतीर्थानां समुद्रस्याधिपतित्वेन हरेः सकलतीर्थस्वामित्वद्योतनाय समुद्रत्वोक्तिः । तथा तत्र तीर्थानां पवित्रीकरणशक्तिरपि हरिसन्निधानादेवेति द्योत्यते । अथवा काव्यस्थितसकलपद्यानां तीर्थवर्णनरूपत्वादाद्यपद्येऽपि तदावश्यकमिति मन्वानो ग्रंथकारः हरिमपि तीर्थराजक्षीरसमुद्रत्वेन वर्णितवान् । अत्र परममंगलरूपदेवतावाचकहरिशब्दप्रयोगादेव सर्वसामंजस्येऽपि वर्णगणशुद्धिरधिका । **रूपकमलंकारः** । एकत्वरूपणं-यत्स्यादुपमानोपमेययोः । रूपकं नामेत्युक्तेः । वृत्तं तु **पथ्यावक्त्रम्**— 'युजोर्जनसरिद्धर्तुः पथ्यावक्त्रं प्रचक्षते' इत्युक्तत्वात् । ॥ १ ॥

हयग्रीवदयासिंधुरंधूकृतभवांबुधिः ।
प्रबंधमप्रतिद्वंद्वं करोत्वेनमनेनसम् ॥ २ ॥

अधुना हयग्रीवदयासिंधोरसदृशत्वमुपपाद्य तत एव स्वग्रंथस्याप्यसदृशत्वं प्रार्थयते। **हयग्रीवेति** । **अंधूकृतभवांबुधिः** अनंधुरंधुस्संपद्यमानः-कृतः अंधूकृतः । कूपीकृत इत्यर्थः । 'पुंस्येवांधुः प्रहिः कूप उदपानं तु पुंसि वा' इत्यमरः, भवांबुधिः भक्तजनसंसारो येन स तथोक्तः । अपारमपि संसारसमुद्रं कूपमिव लीलयोत्तारयतीति भावः । 'संतारकः सकलसंसृतिदुस्तरार्णात्* 'इति वचनात् । **हयग्रीवदयासिंधुः** हयग्रीवदयैव सिंधुः ।

---

* म. भा. ता. नि. II. 188.

दयायाः अपरिमितत्वेन सिंधुत्वोक्तिः । **अनेनसं** न विद्यते एनःशब्दार्थनिष्ठो दोषो यस्य स तथा तम् । एनं प्रारिप्सिततया बुद्धिस्थम् । "द्वितीयाटौस्वन"[1] इति एनादेशः । **प्रबंधम्** । **अप्रतिद्वंद्वं** प्रतिद्वंद्वरहितमसदृशमित्यर्थः । **करोतु** कुर्यात् डुकृञ् करण इति धातोः प्रार्थनायां लोट् । यथा हयग्रीवदयासिंधुः स्वप्रत्यर्थीभूतभवसमुद्रमल्पीकृत्य स्वयमसदृशतया वर्तते । तथा स एव इतरप्रबंधानल्पीकृत्यास्मत्प्रबंधमसदृशं करोत्विति भावः । सकलदोषाकरभवसिंधोरधःकरणेन हयग्रीवदयासिंधोरप्यर्थतोऽनेनस्त्वलाभात्, अस्मत्प्रबंधस्याप्यनेनस्त्वकरणे शक्तिरस्तीत्यपि द्रष्टव्यम् । हेतुगर्भविशेषणदानाद्धेतुगर्भोऽलंकारः । ॥ २ ॥

आजन्मभूमेरटतोऽखिलेषु तीर्थेषु तद्वर्णनभारमूढ्वा ।
आयासमस्मन्मृदुमानसस्य वायुर्मुहुः कुन्ततु मध्वरूपी ॥ ३ ॥

इदानीमादिगुरुं *श्रीमध्वाचार्यं प्रार्थयते **आजन्मेति** । **आजन्मभूमेः** जन्मभूमिमारभ्य । आङ्मर्यादाभिविद्ध्यो[1]रित्यत्र विभाषानुवृत्तेर्न समासः । **अखिलेषु तीर्थेषु** । **तद्वर्णनभारं** तेषां तीर्थानां वर्णनं स्तुतिस्तत्र यो भारः आग्रहस्तम् । अतिबहुलप्रमेयवर्णने । आग्रहस्याबोधादिना मध्ये मध्ये आयासहेतुत्वाद्भार इत्युक्तम् । **ऊढ्वा** धृत्वा । **अटतः** संचरतः । क्रमेण तानि सवाणि तीर्थान्यनुचिंतयत इत्यर्थः । **अस्मन्मृदुमानसस्य** आत्मकोमलचित्तस्य । भारासहिष्णुत्वादिद्योतनाय मृद्विति विशेषणम् । स्तोतुमसमर्थमनस इत्यर्थः । **आयासं** कथं स्तोतुं मम शक्तिर्भविष्यतीति चिंताल-

---

* स्मृत्वा गुरुं पूर्वगुरुमादिमूलगुरूंस्तथा ।
देवतां वासुदेवं च विद्याभ्यासी तु सिद्धिभाक् ॥
—इति तन्त्रसारसङ्ग्रहे (IV. 106)

---

[1] पा. सू. 2/1/13

क्षणं खेदम्। **मध्वरूपी** मध्वाचार्यात्मकः वायुः। **मुहुः** पदे पदे। **कृंततु** भिंद्यात्। भारतीपतित्वाज्ज्ञानबलपूर्णत्वाच्च स्तोतुं शक्तिं दत्त्वा चिंतां परिहरत्वित्यर्थः। कृती छेदन इति धातोः प्रार्थनायां लोट्। यथा शिरो निहितभारस्याध्वनि संचरतः पुरुषस्य खेदं वायुः परिहरति, तथा पदे पदे अबोधादिजनितमनस्तापं प्रबुद्धशिरोमणिः मध्वरूपी वायुः परिहरेदिति भावः। **उपमालंकारः**। **इंद्रवज्रावृत्तम्**। 'स्यादिंद्रवज्रा यदितौ जगौ ग' इति। ॥ ३ ॥

वागीशतीर्थमुनिवर्य भवद्दयांबुयोगेन पावय मनोगृहमन्वहं मे।
नागेंद्रतल्पमधिरोपय तत्पदाब्जरागेण रंजय कलिं जय तद्विविक्षुम्
॥ ४ ॥

स्वगुरुं प्रति मनोनैर्मल्यादिकं प्रार्थयते। **वागिशेति**। **हे वागीश-तीर्थमुनिवर्य** वागीशतीर्थाख्यमुनिश्रेष्ठ। **भवद्दयांबुयोगेन** भवतः कृपाजल-संबंधेन। मे मनोगृहं हृदयगृहम्। **अन्वहं** प्रतिदिनम्। **पावय** निर्मलं कुरु। यथा जलसेकेन गृहं निर्मलं कुर्वंति तद्वदिति भावः। पूञ् पवन इति धातोर्णिजंताल्लोट्। **नागेंद्रतल्पं** शेषपर्यंकं श्रीनारायणम्। **अधिरोपय** प्रापय। रुह बीजजन्मनि प्रादुर्भावे च इत्यस्माद्धातोर्णिजंताल्लोट्। तत्पदा-ब्जरागेण तस्य मनोगृहं प्रविष्टस्य श्रीनारायणस्य—पदाब्जं पदारविंदम्। तस्य रागेणानुरागेण रक्तिम्ना। मन्मनो रंजय अलंकुरु। यथा गैरिकादि-रागेण गृहमंडनं कुर्वंति तद्वदिति भावः। रंज राग इत्यास्माद्धातोर्णिजं-ताल्लोट्। **तद्विविक्षुं** तत् मनोगृहं विविक्षुं प्रवेष्टुमिच्छुं। **कलिं** मनोदोष-हेतुं कल्याख्यासुरश्रेष्ठम्। जय अपाकुरु। जि जय इति धातोर्लोट्। गुरुकृपा हि सकलपुरुषार्थकरीति भावः। रूपकानुप्रासयोः **संसृष्टिः**। **वसंततिलका वृत्तम्**। 'उक्ता वसंततिलका तभजाजगौग' इत्युक्तत्वात्।
॥ ४ ॥

विषयनिर्देशः

तीर्थक्षेत्रतदीशानां माहात्म्यानि यथामति ।
वादिराजो यतिः स्तौति पद्यैः कतिपयैः कविः ॥ ५ ॥

कविः वादिराजः यतिः प्रबंधकरणे प्रयत्नवान् वादिराजख्ययतिरिति यावत् । **तीर्थक्षेत्रतदीशानां** तीर्थानि गंगादिनि । क्षेत्राणि श्रीरंगादीनि । तदीशास्तत्स्वामिनो देवास्तेषां । **माहात्म्यानि** पवित्रीकरणज्ञानभक्त्यादि-पुरुषार्थप्रदत्वादिरूपसामर्थ्यानि । **कतिपयैः** परिमितैः । **पद्यैः** छंदोबद्ध-वाक्यैः । **यथामति** मतिमनतिक्रम्य । बुद्ध्यनुसारेणेत्यर्थः । **स्तौति** स्तुतिं करोति । ष्टुञ् स्तुताविति धातोर्लट् । गर्वपरिहाराय प्रथमपुरुषप्रयोगः । ॥ ५ ॥

जन्मभूमिः

कर्णे पदन्यस्तरुची रिरंसुर्वाराशिवस्त्रं जघनाद्धि यस्याः ।
अमूमुचद्बाणकरेण भूमेः श्रीभार्गवः सा जयति क्षितिर्नः ॥ ६ ॥

आजन्मभूमेरित्युक्तिमनुसृत्येदानीं स्वजन्मभूमिं स्तौति । **कर्ण** इति । **भूमेः कर्णे** गोकर्णे । **पदन्यस्तरुचिः** पदेन पादेन न्यस्ता रुचिः कांतिर्येन स तथोक्तः । स्वपादतलविन्यासेन समुत्पादितकांतिरित्यर्थः । रहसि नायिकायाः कर्णे पदैः सुप्तिङंतरूपस्वचाटुवचनैः निवेदितस्वानुरागः कामुकोऽनेन ध्वन्यते । **श्रीभार्गवः** परशुरामः । **रिरंसुः** सन् रंतुमिच्छुःसन् । **यस्याः** भूमेः । जघनात् समुद्रतीरे तथा जघनशब्दवाच्यात्सह्याचलप्रत्यंतप्रदेशात् । चाटूक्त्याऽभिमुखीभूतायाः । नितंबप्रदेशादिति ध्वनिः । **वाराशिवस्त्रं** समुद्रवसनम् । **बाणकरेण** शराख्यहस्तेन । **अमूमुचद्धि** मोचितवान् । "मुच्लृ मोक्षण" इत्यस्माद्धातोर्णिजंतात्लुङ् । करेण नायिकायाः नीवीश्लथनरूपो नायकव्यापारोऽनेन व्यज्यते । श्रीपरशुरामः समस्तां भूमिं ब्राह्मणेभ्यो दत्वा स्वनिवासार्थं गोकर्णे स्थित्वा बाणप्रयोगं कृत्वा स्वबाणो यावति प्रदेशे

पतति तावत् पर्यंतं सह्याद्रिप्रदेशात् समुद्रं निष्कासितवानिति पौराणिकीं प्रसिद्धिं हि शब्देनाह । **सा नः** अस्माकम् । **क्षितिः** अस्मज्जन्मभूमिः । **जयति** उत्कृष्टा वर्तते । "[1]जिजय"इत्यस्माद्धातोरकर्मकाल्लट् । अत्र रिरंसुरित्यादिविशेषणसाम्यादप्रस्तुतनायकव्यापारप्रतीत्या **समासोक्तिरलंकारः**। तदुक्तम्—विशेषणसाम्यादप्रस्तुतस्य गम्यत्वे समासोक्तिरिति । ॥ ६ ॥

रजतपीठपुरम्

काशीतले कृतपदाऽपि सरित् सुराणामायाति यद्गतपवित्रसरोऽधुनाऽपि ।
रुद्रादिदेवगणसेवितसर्वभागं तद्दूप्यपीठपुरमप्रतिमं त्रिलोक्याम् ॥ ७ ॥

रजतपीठपुरं स्तौति । **काशीतल** इति । **सुराणां सरित्** सुरसरित् गंगा । **काशीतले** काशीक्षेत्रे । **कृतपदाऽपि** कृतस्थानाऽपि । उत्तमस्थले स्थिता अपीत्यर्थः । **यद्गतपवित्रसरः** यद्गतं रजतपीठपुरगतम् । पवित्रं पावनम् । सरः मध्वसरोवरम् । **अधुनापि**[2] इदानीमपि । **आयाति** श्रीमदाचार्यस्थानार्थं अनंतेश्वराज्ञया आगच्छति । **रुद्रादिदेवगणसेवितसर्वभागम्** । रुद्रादिदेवगणेन सेवितः आश्रितः सर्वभागः सर्वप्रदेशो यस्मिन् । **तद्दूप्यपीठपुरं** अपभ्रष्टभाषया "उडुपी" नाम्ना सर्वजनप्रसिद्धं क्षेत्रम् । **त्रिलोक्यां** त्रयाणां लोकानां समाहारः त्रिलोकी तस्याम् । **अप्रतिमं** असदृशम् । श्रीभागीरथीसन्निधानयुक्तसरोवरवत्त्वाद्रुद्रादिदेवगणसेव्यत्वाच्च लोकत्रयेप्येतत्क्षेत्रसदृशं क्षेत्रं नास्तीत्यर्थः । **काव्यलिंगमलंकारः** । ॥ ७ ॥

---

[1] जयेर्जयाभिभवयोराद्येऽर्थेऽसावकर्मकः ।
उत्कर्षप्राप्तिराद्योऽर्थो द्वितीयार्थे सकर्मकः ॥
—इति मायावादखण्डनटीकायाम् ।

[2] 'ततः परं द्वादशवत्सरान्तरे सदाऽऽव्रजेत् सा तदनुग्रहांकिनी ।'
—इति सुमध्वविजये (4/42)

यस्मिन् वाग्वज्रधारा दुरितकुलमहातूलदाहेऽतिशूरा
दंडप्रोद्भासिहस्ताः स्फुरदसिसमसन्मार्गसक्ताः समस्ताः ।
श्रीकृष्णस्नेहपाशाः श्रमहरगतयः शांतिभाजो विरक्ता
योगींद्राश्चित्रलोकाधिपनिभविभवा मध्वदासा जयन्ति ॥ ८ ॥

तदेव वर्णयति । **यस्मिन्** रजतपीठपुरे । **मध्वदासाः** । **योगींद्राः** यतींद्राः । **समस्ताः** अष्टावपि प्रत्येकम् । **वाग्वज्रधाराः** 'विश्वं सत्यं हरिः कर्ता जीवोऽन्यः परमार्थतः । वेदस्सत्यं पुराणं च' इत्यादिरूपवागेव वाक्यमेव वज्रधारा येषां ते । शास्त्राभ्यासपाटवेनातिनिशितवाक्यवज्र-धारया विरुद्धसिद्धांतपर्वतपक्षविच्छेदनसमर्था इत्यर्थः । अनेन वज्रधर-स्येंद्रस्य विभवः संपादितः । **दुरितकुलमहातूलदाहे** दुरितानां कुलं समूहस्तदेव महातूलं कार्पासराशिः तस्य दाहे भस्मीकरणे । **अतिशूराः** अत्यंत शौर्योपेताः । 'अग्निचित् कपिलस्सत्री राजा भिक्षुर्महोदधिः । दृष्टमात्राः पुनंत्येते तस्मात् पश्येत नित्यशः' । 'दर्शनादेव साधवः[1]' इत्यादिवचनात् पापनिर्हरणे समर्था इत्यर्थः । अनेन दाहकस्याग्नेर्विभवः संपादितः । **दंडप्रोद्भासिहस्ताः** दंडेन प्रोद्भासिनः हस्ताः येषां ते । गोसर्पनिर्हरणार्थं करधृतवेणुदंडा इत्यर्थः । अनेन दंडधरस्य यमस्य विभवः संपादितः । **स्फुरदसिसमसन्मार्गसक्ताः** स्फुरदसेः निशितखड्ग[2]स्य समस्स-न्मार्गोऽतितीक्ष्णतपश्चरणादिरूपः तत्रासक्ताः । असिवदतितीक्ष्णानशनादि-व्रतचर्यानिष्ठा इत्यर्थः । अनेन खड्गधारिणो निर्ऋतेर्विभवस्संपादितः ।

---

[1] न ह्यम्मयानि तीर्थानि न देवा मृच्छिलामयाः ।
ते पुनन्त्युरुकालेन दर्शनादेव साधवः ॥
—इति भागवते (10/84/11)

[2] क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तद् कवयो वदन्ति'
—इति कठोपनिषदि ॥

श्रीकृष्णस्नेहपाशाः श्रीकृष्णेस्नेहो भक्तिस्स एव पाशो येषां ते । श्रीकृष्ण-भक्ता इत्यर्थः । अनेन पाशधारिणो वरुणस्य विभवस्संपादितः । **श्रमहरगतयः** श्रमः संसारखेदः तं हरंतीति श्रमहराः । गतयः संचारा येषां ते । *परानुग्रहाय संचारयुक्ता इत्यर्थः । अनेन श्रमहरस्य वायोर्वि-भवस्संपादितः । **शांतिभाजः** शांतिं भजंतीति शांतिभाजः । अनेन शीतकरस्य चंद्रस्य विभवस्संपादितः । **विरक्ताः** वैराग्योपेताः । अनेन विरक्तशिरोमणेरिशवस्य विभवः संपादितः । **चित्रलोकाधिपनिभविभवाः** एकैकस्याष्टलोकपालविभवसंपत्तेर्वर्णनाच्चित्रेत्युक्तम् । चित्राः वज्रधरत्वदाह-कत्वादिनानाधर्मोपेताः लोकाधिपाः इंद्राद्यष्टलोकपालाः । तेषां निभस्समानो विभवः संपत् येषां ते तथोक्तास्संतः । **जयंति** उत्कृष्टा वर्तते । **अभूतोप-मालंकारः** । उक्तविधया वज्रधरत्वाद्यैश्वर्यसंपन्नस्यैकैकलोकपालस्य प्राग-भूतत्वात्—तदुक्तम् । 'यस्य कस्यचिद्गुणो यस्मात्कस्मादपूर्वाद्धर्मात् सादृश्यस्य गम्यत्वे अभूतोपमालंकारः' इति । **स्रग्धरावृत्तम्** । 'म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तिता सा' इत्युक्तत्वात् । ॥ ८ ॥

द्वारावतीं सकलभाग्यवतीमुपेक्ष्य
गोपालबाललललनाकरपूजनं च ।
वार्धिं वधूगृहमतीत्य स मध्वनाथो
यत्रास्ति तद्व्रजतपीठपुरं गरीयः ॥ ९ ॥

द्वारावतीमिति । **स** प्रसिद्धः । **मध्वनाथः** मध्वाचार्याणां स्वामी श्रीकृष्णः **सकलभाग्यवतीं** समस्तैश्वर्योपेतां । दुस्त्यजत्वद्योतनायेदं विशेषणम् । एवं विशेषणांतरस्यापि प्रयोजनं द्रष्टव्यम् । **द्वारावतीं** द्वारावतीनामककृष्ण-

---

* जनस्य कृष्णाद्विमुखस्य दैवादधर्मशीलस्य सुदुःखितस्य ।
अनुग्रहायेह चरन्ति नूनं भूतनि भव्यानि जनार्दनस्य ॥
—इति भागवते (3/5/3)

नगरीं । **उपेक्ष्य** त्यक्त्वा **गोपालबाललललनाकरपूजनं च** गोपालबाललनाः गोपकुमार्यस्तासां करपूजनं च । **उपेक्ष्य** । **वधूगृहं** वध्वा लक्ष्म्याः गृहं जन्मगृहम् । **वार्धिं** समुद्रम् । **अतीत्य** अतिक्रम्य । **यत्र** यस्मिन् रजतपीठपुरे । **अस्ति** तिष्ठति । अतः तद्रजतपीठपुरं **गरीयः** अतिशयेन गुरुः । सकलक्षेत्रोत्तममित्यर्थः । गरीयस्त्वे कृष्णनिवासस्य हेतुत्वप्रतीत्या **काव्यलिंगमलंकारः** । ॥ ९ ॥

रूप्यात्मकस्य भवतस्तुलनां न भेजुः
क्षेत्राणि भारतमहीरचितान्यमूनि ।
ईशाचलं च जयसीश्वरमात्रवासं
श्रीमध्वहस्तकमलार्चितकृष्णमूर्त्या ॥ १० ॥

रूप्यात्मकत्येति । हे रूप्यपीठपुर । **भारतमहीरचितानि** भारतभूम्यां कृतानि । **अमूनि क्षेत्राणि** । **रूप्यात्मकस्य** रजतरूपस्य । **भवतः** तव । तुलनां साम्यम् । न भेजुः नापुः । भज सेवायामितिधातोर्लिट् । **ईश्वर-मात्रवासं** केवलरुद्रनिवासं । **ईशाचलं** च कैलासपर्वतं च । **श्रीमध्वहस्त-कमलार्चितकृष्णमूर्त्या** श्रीमध्वाचार्यकरकमलपूजितकृष्णमूर्त्या । जयसि विजयसे । सकलक्षेत्रासदृशत्वे रूप्यात्मकस्येति विशेषणस्य रजताचलादा-धिक्ये मध्वहस्तकमलेतिविशेषणस्य च पृथगेव वाक्यमर्यादया हेतुप्रतिपाद-कत्वात् **काव्यलिंगमलंकारः** ॥ ॥ १० ॥

श्रीकृष्णः

निर्मथ्योग्रभवार्णवे निजमनोभीष्टं दिशामीति यः
सम्यग्ज्ञापयितुं करेण विलसन्मंथानमन्येन च ।
रम्यं दाम दधन्महेशरजतग्रामश्रियोऽलंकृतिः
कर्मदीश्वरभक्तिबंधनवशः प्रीतोऽस्तु कृष्णः प्रभुः ॥ ११ ॥

निर्मथ्येति । **उग्रभवार्णवे** क्रूरसंसारसमुद्रे । **निर्मथ्य** प्रतिबंधकी-

भूतदुरदृष्टादिकमालोड्य । **निजमनोभीष्टं** स्वभक्तमनोभीष्टं ज्ञानभक्तिसुख-संपदादि । **दिशामि** ददामि । दिश अतिसर्जन इतिधातोर्लट् । **इति** इममर्थम् । **सम्यग् ज्ञापयितुं** करपल्लवमुद्रया प्रत्यक्षतोऽपि दर्शयितुम् । **करेण** दक्षिणहस्तेन । **विलसन्मंथानं** स्फुरन्मथनदंडम् **अन्येन** वामेन करेण । **रम्यं** मनोहरम् । **दाम** दंडवेष्टनरज्जुम् । **दधत्** दधानः । नाभ्यस्ताच्छतु[1]रितिनुमभावः । **महेश्वरजतग्रामश्रियः** *शिव(व)ल्यारव्यग्रामश्रियः । **अलंकृतिः** अलंकारभूतः । ननु शिवदेवस्तदलंकारोऽस्तु किमनेनेत्यत्रापीदमेवोत्तरम् । महेशस्य रजतग्रामवत् रजतसमूहवत् या श्रीः अंगकांतिः तस्याः अलंकारभूतः । मौक्तिकांतरितेंद्रनीलरत्नवदंतर्यामितया तमपि भासयन्नित्यर्थः । ननु रुद्रस्यांतर्यामित्वं कृष्णस्य कुत इत्यत्रापीदमेवोत्तरम् । महेशस्य यो रजतग्रामः कलासः तत्र या श्रीः तस्याः अलंकृतिः प्रलये निराकरणं यस्मात्स तथोक्तः । प्रलये शिवस्यापि संहर्तृतया शिवादप्युत्तमत्वाद्धरिरेव तदंतर्यामीति भावः । **कर्मदीश्वरभक्तिबंधनवशः** कर्मदिनां संन्यासिनां ईश्वराः श्रेष्ठाः यतीश्वराः इत्यर्थः । 'भिक्षुः परिव्राट् कर्मदी' इत्यमरः । तेषां भक्तिबंधनवशः भक्त्यधीनः । **प्रभुः** कृष्णः । **प्रीतः** संतुष्टः । **अस्तु** । **उत्प्रेक्षालंकारः** वृत्तं तु **शार्दूलविक्रीडितम्** । 'सूर्याश्वैर्मसजस्तताःसगुरवश्शार्दूलविक्रीडितं' इति । ॥ ११ ॥

चांचल्यं पृष्ठदेशे कठिनकृतिरधोवक्रता कापि कोपो
याञ्चा कस्मादकस्मादपकृतिरुपकारिष्वपि प्राज्ञमौले ।
स्त्र्यर्थेऽन्यस्त्रीष्ववज्ञा किमिति रमण ते चौरता मायिकत्वं
चित्रं रोहावरोहाविति विरसगिराऽप्याद्दतः पातु कृष्णः ॥१२॥

---

* शिवळ्ळीति अपभ्रष्टभाषायाम् ।

—इति सुमध्वविजयभावप्रकाशिकायाम् (II. 10)

[1] पा. सू. 7/1/78

तमेव कृष्णं श्लिष्टोक्त्या स्तुत्वा स्वेष्टं च प्रार्थयते। **चांचल्यमिति**। कस्याश्चिद्गोपालबालिकायाः स्वोदासीनदशायामीषदीर्ष्यासहितप्रियोक्तिरियम्। **प्राज्ञमौले** प्राज्ञानां मौलिः श्रेष्ठः हे प्राज्ञमौले रमण। उपरिकथ्यमान-विपरीतचरित्रं महाप्राज्ञस्य तव नोचितमिति सूचनायादौ प्राज्ञमौल इति विशेषणमुपात्तम्। **ते** तव। **चांचल्यं** एकदा एकस्यां प्रीतिः पुनस्तां विहाय अन्यस्यां प्रीतिरित्येवं चंचलता। कस्मात् कारणात्। निष्कारणमंगीकृत-परित्यागस्तव नोचित इति भावः। **पृष्ठदेशे** पृष्ठभागे। **कठिनकृतिः** कठिना च सा कृतिश्च कठिनकृतिः। कठोरं कर्म वा तत्प्रयत्नो वा कस्मात्। निष्कारणं मुखतः प्रियमुक्त्वा पृष्ठदेशे तन्निंदनादिकं च नोचितामिति भावः। **अधोवक्रता** अधः वक्रं यस्य स तस्य भावोऽधोवक्रता। किमर्थमेवं करोषीति बहुधा कथितेऽपि प्रत्युत्तरमदत्त्वाऽधोमुखतयैव स्थितिः। कस्मात् नोचितेति-भावः। **क्वापि** कस्मिंश्चित्समये। **कोपः** क्रोधश्च। कस्मात् कदाचिद्बहूक्ते सति भक्तायामेवं मयि हुंकारादिना क्रोधः क्रियते सोऽपि नोचित इति भावः। **अकस्मात्** कारणाभावेऽपि। **याञ्चा** मां विहाय अन्यस्त्रीप्रार्थनं **कस्मात्** अनुकूलायां सत्यां अननुकूलायाः प्रार्थनं च नोचितमिति भावः। **उपकारिष्वपि** स्त्रीजनेषु। **अपकृतिः** अपकारः कस्मात्। दासीवत्कर्म-कर्त्र्यामपि मयि अन्यांगनाप्रेरितस्सन्वस्त्रभूषणादिकं न ददासि तदपि नोचित-मिति भावः। **स्त्र्यर्थे** एकस्त्रीकृते। **अन्यस्त्रीष्ववज्ञा** तत्प्रार्थनादिकं श्रुत्वाप्य श्रुत्वेव गमनं कस्मात् तदपि नोचितमिति भावः। **ते चोरता** परवधूप्रियं कृत्वा समागते सति कुत्र गतोऽसीति प्रश्ने आपणं प्रति गतोऽस्मीत्यनृत-वचनम्। **किमिति** किमर्थम्। इयमपि नोचितेति भावः। **मायिकत्वं** माया छद्म अस्य वर्तत इति मायी। माय्येव मायिकः तस्य भावो मायि कत्वम्। परांगनालिंगनजातनखक्षतादीनां वस्त्रादिनाऽऽच्छादनम्। **कस्मात्** इदमपि नोचितमिति भावः। **रोहावरोहौ** एकस्याः शुभगृहादिदानेन नीचत्व-प्रापणं अवरोहः। **इमौ चित्रं** विचित्रम्। वैषम्यादिदोषरहितस्य तव इमौ

च नोचितावितिभावः । **इति** पूर्वोक्तप्रकारेण । **विरसगिराऽपि** विगतो रसः स्नेहः यस्याः सा विरसा सा च सा गीश्च तथा तयाऽपि । अपि पदं गर्हायां अनादरसंभावनायां वा । **आदृतः** आदरविषयीकृतः । अनया मर्यादैव कृतेति मन्वान इत्यर्थः । एतादृशः **कृष्णः पातु** रक्षतु इति **एका योजना** ।

ननु विरसवचनस्य कथं सादरवचनत्वमिति शंकायामपि इदमेवोत्तरम् । तथाहि । **चांचल्यं** भूमयीं नावं कृत्वा प्रलयांबुनि मत्स्यावतारेण इतस्ततःपर्यटनं कस्मात्कारणात् । **पृष्ठदेशे** कूर्मावतारस्य तव पृष्ठदेशे । **कठिनकृतिः** कठिना कृतिः आकृतिः । पृष्ठदेशे काठिन्यमिति यावत् । यद्वा । कठोरस्य मंदरगिरेः-कृतिर्धारणाख्यं कर्म तद्विषयकव्यापारो वा कस्मात् । **अधोवक्रता** अधः वक्रं यस्य स तस्यभा वोऽधोवक्रता । हिरण्याक्षसंहारार्थं कृतवराहावतारेण अधो-मुखत्वम् । अधोमुखवराहावतार इति यावत् । अथवा अधः रसातलं प्रति वक्रं यस्य स तस्य भावः कस्मात् । **क्वापि** कस्मिंश्चित्समये । **कोपः** हिरण्यक-शिपोरुदरविदारणार्थं कृतनृसिंहावतारस्य । तव कोपः कस्मात् । **अकस्मात् याच्ञा** वामनरूपेण बलेः पदत्रययाच्ञा कस्मात् । उपकारिषु धारणपोषणा-दिना स्वोपकारिषु मातृप्रमुखेषु गुरुदारेषु । अथवा **उपकारिषु** दत्तात्रेय-रूपिणः स्वस्योपकारिषु कार्तवीर्यादिषु । **अपकृतिः** अपकारः शिरश्छेद इति यावत् । कस्मात् । **स्त्र्यर्थं** रामावतारे स्वस्त्रीभूतसीतार्थम् । **अन्यस्त्रीषु** शूर्पणखमंदोदर्यादिदैत्यस्त्रीषु । **अवज्ञा** नासिकानिकृंतनं पतिव-धादिना वैरूप्यवैधव्यादिकरणम् । कस्मात् । **चोरता** कृष्णावतारे नवनीता-दिचोरता । **किमिति** किमर्थम् । **मायिकत्वं** बुद्धावतारे* मायारूपेण

---

* ततः कलौ सम्प्रवृत्ते संमोहाय सुरद्विषाम् ।
बुद्धो नाम्ना जिनसुतः कीकटेषु भविष्यति ॥

—इति भागवते (I. 3. 24)

दुश्शास्त्रवत्त्वम् । तत्प्रवर्तनमिति यावत् । किमिति किमर्थम् ! **रोहावरोहौ** कल्क्यवतारे अश्वारोहावरोहणचमत्कारौ चित्रम् । इति मम दशावतारेषु विचित्राणां कारणान्येव विचारितवती नत्वाक्षिपतीति मन्वानस्य कृष्णस्य सैव वाक् सादरवागभूत् । अर्थलब्धस्तुत्यंगभूतत्वात् । एवमनुकूलार्थस्यैवोद्भावनेन स्वस्तुतिरूपं संबोधनद्वयबीजमिति द्रष्टव्यम् । इति **द्वितीया योजना** ।

अथवा । **चांचल्यं** व्याप्तस्यैव तव इतस्ततो गमनागमनाख्यम् । श्वेतद्वीपे तव दिदृक्षयैवागतानां वक्षसि सकृत्स्थित्वा तदा तत्रैव ततश्चलनाख्यां विश्वरूपाख्यस्थूलमूर्त्यात्मकदृग्गोचरतया स्थितस्य तव सूक्ष्ममूर्त्या ततश्चलनाख्यां चांचल्यम् । कुवलयापीडाख्यमहागजस्य कदाचिन् पृष्ठतः कदाचित् पार्श्वतः कदाचिदुरसो भागे कदाचिदग्रतः संचारचातुर्याख्यं चांचल्यं **चित्रम्** ! **ईशे** भस्मासुरकृतोपद्रवात् भीत्या पृष्ठभागं प्राप्ते महादेवे । **पृष्ठद** पृष्ठं ददातीति-पृष्ठदः तस्य संबुद्धिः । पृष्ठ एव तिष्ठेति स्थापयित्वा तयोर्मध्ये स्थित इति भावः । तव **अकठिनकृतिः** मृदुवचनव्यापारः प्रियोक्त्या वशीकरणमित्यर्थः । पुनः कठिना अतिक्रूरभस्मासुरभस्मीकरणरूपा कृतिः कर्म च । ईशे ईशरूपे शेषे पक्षिणामीशे गरुडे वा । पृष्ठद हे कृष्ण ते । कठिनकृतिःशेषांगे शयानस्यैव महीधरादिकठिनजगत्करणम् । गरुडकंठे स्थितस्य चातिक्रुरमहा-दैत्यसंहारकरणम् । मेषरूपतया वाहनीभूतस्वपृष्ठदे ईशे महादेवे स्थितस्य । तादर्थ्ये वा सप्तमी । ईशार्थमित्यर्थः । मेषरूपशंकरवाहनभूतस्य तव कठिन-कृतिः दुष्टशक्तिसहस्रभुगित्युक्तयोगिनीसंहरणकर्म । **कठिनकृतिः** योगिनी-त्रस्तगिरीशत्रातृत्वरूपं स्वकर्मचरित्रम् । **अधोवक्रता** शिशुमाररूपस्य तव

देवद्विषां निगमवर्त्मनि विष्टितातां
पूर्भिर्मयेन विहिताभिरदृश्यतूर्भिः ।
लोकान् घ्नतां मतिविमोहमतिप्रलोभं
वेषं विधाय बहु भाष्यत औपधर्म्यम् ॥

—इति भागवते (2/7/37)

सूर्यचंद्रनक्षत्रग्रहात्मकज्योतिश्चक्रधारणायाधोमुखता साऽपि चित्रम् । जरा-व्याधभृगुशुक्रकालीयादिभक्तानामपि कुत्रचिदभक्तवदपराधसाम्येऽपि । **क्वापि** अभक्तेष्वेव किंचित्कोपः भक्तेषु कोपोऽपि क्व । इदं पृष्ठद याञ्चा तव रुद्रादियाञ्चा कस्मात् । न कस्मात् कारणात् । किंतु **अकस्मादेव** लीलयैव कारणं विनैव । रुद्ररक्षकस्य तव पुत्रार्थं रुद्रार्चनयाञ्चादिकं लील-यैवेति भावः । **उपकारिष्वपि** जगत्सर्जनदशायामुप स्वसमीपे स्थित्वा कारिषु कारणभूतेषु देशकालप्रकृत्यादिषु । **अपकृतिः** "किंस्विदासीदधिष्ठान" [1]मित्यादिश्रुत्युक्तमार्गेण धिक्काराख्यापकारः । अप्रधानतया स्वस्मादधः-करणमिति यावत् । नित्यानामपि तेषां पराधीनविशेषावास्यादिरूपजनन-मरणाद्यपकारश्चित्रम् । अर्थे कस्मिंश्चित् प्रयोजने सति । अमृतपरिवेषण-कार्यायेत्यर्थः । तादर्थ्ये सप्तमी । या स्त्री नारायणी सा चित्रम् । **अन्नी** देवानां परिवेषणसमये अमृताख्यान्नवांस्त्वम् । **अस्त्री** तदैव राहोंश्शिरश्छेदा-यास्त्रवान् । दर्वीमेवास्त्रमकरोः तच्च । **इष्ववज्ञा** शार्ङ्गशराद्यनपेक्षा च चित्रम् । तथा **अन्यस्त्रीष्ववज्ञा** अन्निनां अन्नेनोदरंभराणाम् । "रिपवोन्नषु-जागृधुः" इति श्रुतेः । नानास्त्रवतां दैत्यानां इषुषु शरसंघातेषु अवज्ञा तृणीकरणम् । अन्यासां स्वनारायण्याख्यस्त्रीरूपाद्विलक्षणानाम् । तादृश-लावण्यरहितानामित्यर्थः । स्त्रीणामष्टमहामहिषीणां षोडशसहस्रपत्नीनां गोपीनां च । **इष्ववज्ञा** कटाक्षपाताख्यशरावज्ञा । तैस्त्वमनोभंगाभाव इत्यर्थः । **कस्मा**च्चित्रम् । "न स्त्रीकृतं कश्मलमश्नुवीते" [3]तिस्मृतेर्न चित्रमित्यर्थः । नहि परमान्नरसं भुंजानस्य कदन्नरसे राग उदेतीति भावः । अथवा । **अन्निन** अन्नदातुर्जरासंधस्य विद्यमानेषु **अस्त्रीषु** स्त्रीविलक्षणेषु पुरुषरूपे-ष्वित्यर्थः । स्त्रीवैलक्षण्येनैव पुंस्त्वं नतु पौरुषं किंचिदपीति भावः । यद्वा ।

---

[1] (ऋग्वेद X. 81/2) सूत्रभाष्योदाहृतश्रुतिः (II i. 15)

[3] भागवते (V. 19/6)

अस्त्रिषु अस्त्रवत्सु *त्रयोविंशदक्षौहिणीपरिमितेषु । **इषुभिः** स्वशरसमूहैः । **अवज्ञा** सर्वांगपूरणेन तृणीकरणम् । 'एकैकस्मिन् दश दश भटे चाश्वे शतं शतम् । रथे रथे सहस्रं च अयुतं च गजे गजे ।' इति स्मृतेः । सा चित्रम् । **ते चौरता** अनंतजन्मपापतस्करत्वम् । 'प्रसिद्धचोरः कथितः पृथिव्यां '[1] इति स्मृतेः । **किमिति** किमर्थं कस्मै प्रयोजनायेत्याक्षेपः । भक्तेषु कृपयैव तत्पापं संहरतीति भावः । **अचः** अकारादिषोडशस्वराः । **अरताः** अकारसंबद्धाः । अकारसाहित्यनियमवंतः कादयो हलश्च । एवं एकपंचाशदक्षरात्मकश्रुतिपुराणशास्त्राणीत्यर्थः । **ते** तव **कस्मात्**पुरुषात् न कस्मादपि पुरुषात्त्वया पाठिताः किंतु स्वशक्त्यैव तानुच्चारयसि करोषि चेति भावः । अथवा । तव जिह्वायां परिवर्तमानाः अचो हलश्च चित्रम् । अनंतश्रुतिस्मृतिरूपत्वादाश्चर्यमिति भावः । **अमायिकत्वं** मायामयशरीरादिषु वर्तमानस्यापि तव मायालेशाभावेनैव यदमायिकत्वं तत् । यद्वा । **मायाः** लक्ष्म्याः सकाशात् **आयः** अस्य वर्तत इति मायी । **कः** पूर्णसुखरूपः । मायी चासौ कश्च मायिकः तस्य भावः मायिकत्वम् । लक्ष्म्या सह विनोदकरणं चेति भावः । इदं चित्रम् । **रोहावरोहौ** अनंतजीवराशिषु योग्यानां मुक्तिपदारोहणं रोहः । अयोग्यानां अंधे तमसि अवरोहः । मिश्राणां स्वर्गनरकादौ-रोहावरीहौ§ च । इति रोहावरोहौ तवाधीनौ । तेषामुक्तविधया त्रिविध-

---

* अक्षोहिणीत्र्यधिकविंशयुतोऽतिवेलं
दर्पोद्धतः सपदि कृष्णपुरीं जगाम ॥
—इति महाभारततात्पर्यनिर्णये (14/15)

§ शृण्वे वीर उग्रमुग्रं दमायन्नन्समन्यमतिनेनीयमानः ।
एधमानद्विळुभयस्य राजा चोष्कूयते विश इन्द्रो मनुष्यान् ॥
—इति म. भा. ता. निर्णयोद्धृता श्रुतिः (I. 101)—ऋ. 6/47/16
ऋ. 10/81/2 ; वा. य. 17, 18 ; तै. सं. 4, 6, 2, 4)

---

[1] कृष्णामृतमहार्णवे 89

रोहावरोहौ च **चित्रं** अनंतानंतजीवेष्वपि कदाचित् क्वचित् व्यत्यासाभावादाश्चर्यमित्यर्थः । अथवा । ते रोहावरोहौ । 'प्रदर्श्यातप्ततपसामवितृप्तदृशां नृणाम् । आदायांतरधाद्यस्तु स्वबिंबं लोकलोचनं 'इति श्रीभागवते[1] वर्णितो रोहः । स्वदिव्यदेहेन सहैव स्वर्गारोहणम् । 'ब्रह्मा भवश्च तत्रैत्य मुनिभिर्नारदादिभिः । देवैः सानुचरैः सार्धं गीर्भिर्विष्णुमथास्तुवन् ' इति श्रीभागवतो[2]क्तरीत्या गर्भस्थशिशुभावेऽपि ब्रह्मादिभिरभिष्टुतस्य तव । 'तदा वां परितुष्टोऽहममुना वपुषाऽनघे । प्रादुरासं वरदराड् युवयोः कामदित्सया ' इति श्रीभागवते[3] भगवद्वचनेनैव कृष्णावतारात् प्रागपि विद्यमानतया प्रत्यभिज्ञायमानेनानादिभूतदिव्यदेहेनैव अवरोहः अवतारश्च । इति यौ रोहावरोहौ तावपि चित्रम् । प्राकृतपुरुषांतरे ईदृङ्महिमादर्शने नाश्चर्यमिति योजना । **इति विरसगिरा** विशेषेण रसः अध्यात्मज्ञानरसः यस्यां सा विरसा । सा च सा गीश्च तया विरसगिरा । दशावतारारव्यरसभरितगिरा । इदानीमुक्तरीत्या रसभरितगिरेत्युभयसंग्रहार्थमपि पदम् । **आदृतः श्रीकृष्णः पात्विति तृतीया योजना ।**

विस्तरस्त्वस्य पद्यस्य गुरुमुखादेव श्रोतव्यः । तदीयकौशलसमुद्रालेशमात्रं प्रदर्शितम् । तदपि तच्छिक्षयैव नोत्प्रेक्षया । ॥ १२ ॥

रूप्यात्मकामरपुरस्सर सन्निरूप्य
रूप्यात्मकं च भवतः कृपया गतस्य ।
रूप्यात्मकालयकृतालय यत् त्वमेव
रूप्यात्मनो गतिरिहापि तदीश पाहि ॥ १३ ॥

पुनरपि स्वकीयस्वाम्नपद्येन तमेव कृष्णं स्तौति **रूप्यात्मकेति रूप्यात्मकामरपुरस्सर** । रूप्यः रूपयितुं योग्यः । रूपकालंकारे प्रतिपादयितुं योग्य इत्यर्थः । आत्मा स्वरूपं येषां ते रूप्यात्मकाः स्वार्थे क प्रत्ययः ।

---

[1] (III. 2. 11) [2] (X. 2. 25) [3] (X. 3. 37)

ते च ते अमराश्च रूप्यात्मकामराः । ऐश्वर्ये इंद्रः । व्याख्याने शेषः । सौंदर्ये कंदर्पः । धने कुबेरः । विद्यायां गिरीशः । वेदे चतुर्मुखः । इति प्रौढं सौभाग्यं कंचन महापुरुषं स्तुवंतः कवयो वर्णयंति । 'एकत्व-रूपणं यत्स्यादुपमानोपमेययोः । रूपकं नाम तच्च' इति वचनात्, इमानि वाक्यानि **रूपकालंकारबद्धानि** । तत्र चोक्तरीत्या ब्रह्मादिदेवानामेव निरू-पणादिति भावः । तेषां पुरस्सरः श्रेष्ठस्तस्य संबुद्धिः । **सन्निरूप्य** सद्भिर्निरूप्यस्तस्य संबुद्धिः । **हे रूप्यात्मकालयकृतालय** रजतपीठपुरस्थ-देवालये कृतमंदिर हे **ईश** स्वामिन् कृष्ण । **यत्** यस्मात् कारणात् । **भवतः** । **कृपया रूप्यात्मक** रूपी मुक्तौ प्रशस्तनिजरूपवान् । प्राशस्त्ये मतुपोऽनुशासनात् । 'स्वेन रूपेणाभिनिष्पद्यते' इति श्रुतेश्च । आत्मा जीवः मुक्तजीव इत्यर्थः । तस्य योग्यं कं सुखम् । गतस्य च प्राप्तस्य च । मौक्तस्वयोग्यमहासुखमनुभवत इत्यर्थः । **आत्मनः** मुक्तजीवसमुदायस्य । त्वमेव गतिः इति प्रमेयं **रूपि** 'मुक्तानां परमा गतिः (विष्णुसहस्रनामसु) इत्यादिवचनैर्निरूपितम् । **तत्** तस्मात् । **इहापि** संसारेऽपि । **पाहि** रक्षेति योजना । सकलदेवोत्तमत्वात् मुक्तानां गतित्वाच्च हरिरेव संसारेऽपि गतिरित्येवं प्रार्थ्य इति भावः । ॥ १३ ॥

अनन्तेश्वरः

शिवांतर्यामितां स्वीयां प्रियान् प्रति निबोधयन् ।
दयावारिनिधिः शैवीं शिलामाश्रित्य शोभते ॥ १४ ॥

रजतपीठपुरस्थितमनंतेश्वरदेवं* वर्णयति । **शिवांतर्यामितामिति** । **दयावारिनिधिः** । दयया कृपया वारिनिधिः समुद्रः श्रीकृष्णः । **स्वीयां** स्वस्य विद्यमानाम् । **शिवांतर्यामितां** रुद्रान्तर्यामित्वम् । 'शिवरूपी शिवे-स्थितः' इति स्मृतेः । **प्रियान्** भक्तान् । **प्रति निबोधयन्** सन् **शैवीं** शिवस्य

---

* रजतपीठपुरस्थस्य नारायणत्वं निश्चीयते ।—

विद्यमानां लिंगाकृतिमित्यर्थः । **शिलामाश्रित्य** अधिश्रित्य । **शोभते** लिंगाकृतिरप्यनंतासन इति प्रथया विराजते । शुभ शोभायामिति धातोर्लट् ॥

ईशस्याहीशपदवीं भावयन्निव भाविनीम् ।
अध्यास्ते शेषशयनः स्निग्धां लिंगशिलां हरिः ॥ १५ ॥

ईशस्येति । **शेषशयनः** अनंतशायी **हरिः** । **ईशस्य** शिवस्य । **भाविनीं** आगामिनीं । **अहीशपदवीं** शेषपदवीं 'रुद्रश्शेषात्मकः' इति वचनात् । **भावयन्** प्रकाशयन्निव । **स्निग्धां** मनोहराम् । **लिंगशिलां** लिंगाकारशिलाम् । **अध्यास्ते** लिंगशिलायां तिष्ठतीत्यर्थः । शेषशयनस्य शिवलिंगशायित्वे शिवस्य शेषात्मकत्वं प्रकाशितं भवतीति भावः । ॥ १५ ॥

पाजकक्षेत्रम्

पवित्रं पाजकक्षेत्रं को न सेवेत कोविदः ।
सत्यलोकेश्वरः प्राणो यत्रावातरदुत्सुकः ॥ १६ ॥

पाजकक्षेत्रं वर्णयति । **पवित्रमिति** । **पवित्रं** पावनम् । **पाजकक्षेत्रं** पाजकाख्यक्षेत्रम् । **कः कोविदः** विद्वान् । **न सेवेत** नाश्रयीत । सेवेतैवेत्यर्थः । 'सेवृ सेवायाम्' इति धातोर्लिङ् । **यत्र** पाजकक्षेत्रे । **सत्यलोकेश्वरः** सत्यलोकाधिपतिः । **प्राणः** मुख्यप्राणः । **उत्सुकः** सन्

स्वदर्शनोत्सुकतिने निशीथे प्राप्ताय भोगींद्रगतो हरिः प्रभुः ।
स्वं दर्शयित्वा खलु कुंजमाधवद्विजाय तद्वत्प्रतिमां न्यधापयत् ॥
—इति सुमध्वनिजयभावप्रकाशिकायाम् (II. 15) ।

[2] ईशेन्द्रादिसुरेन्द्राणामीशः श्रीरमणप्रियः ।
यत्र प्रादुरभूद्वायुः क्षेत्रं तत् पाजकं शुभम् ॥
जडस्य गङ्गाद्यभिधस्य केवलं तीर्थस्य मूलं हिमवन्नगाधिपः ।
मत्सौख्यतीर्थस्य जडेतरस्य वै मूलं पवित्रं तदतीव पाजकम् ॥
—इति सम्प्रदायपद्धतौ (1, 2) ।

अवातरत् मध्वाचार्यरूपेणावततार । 'तॄ प्लवनतरणयोः' इति धातोर्लङ् । सत्यलोकेश्वरस्य मुख्यप्राणस्य तस्मिन्नवतर्तुमौत्सुक्यस्य कारणात् पाजकक्षेत्रस्य महिमा किं वर्णनीय इति भावः । ॥ १६ ॥

विमानगिरिस्था दुर्गा

परश्वधधनुर्बाणगदातीर्थोपशोभिते* ।
गिरौ यत्र सुतप्रेम्णेवास्ते नित्यं हरिस्वसा ॥ १७ ॥

तत्र विमानगिरिस्थां दुर्गां वर्णयति । **परश्वधेति** । **परश्वधधनुर्बाणगदातीर्थोपशोभिते** गिरेश्चतुर्दिक्षु श्रीपरशुरामकृतैः परश्वधधनुर्बाणगदातीर्थैः उपशोभिते अलंकृते । **यत्र** पाजकक्षेत्रे । **गिरौ** विमानाख्यपर्वते । **हरिस्वसा** दुर्गा । **सुतप्रेम्णेव** सुते श्रीमदाचार्यरूपे वायौ प्रेम्णेव स्नेहेनेव । **नित्यमास्ते** तस्मिन् पर्वते परशुरामस्थापितदुर्गा तिष्ठतीत्यर्थः । **उत्प्रेक्षालंकारः** । ॥ १७ ॥

त्रिशूलधारिणी दैत्यगजकुंभविदारिणी ।
गिरींद्रशिखरावासा दुर्गा स्वर्गापवर्गदा ॥ १८ ॥

त्रिशूलेति । **त्रिशूलधारिणी** त्रिशूलधरा । **दैत्यगजकुंभविदारिणी** दैत्यो महिषासुरः स एव गजः तस्य कुंभो मस्तकदेशस्तं विदारयतीति तथोक्ता । **गिरींद्रशिखरावासा** गिरींद्रस्य विमानाख्यपर्वतश्रेष्ठस्य शृंगे आवासो यस्याः सा । **दुर्गा स्वर्गापवर्गदा** भक्तानां स्वर्गं अपवर्गं मोक्षं च ददातीति तथोक्ता । ॥ १८ ॥

---

* यत्रत्य तीर्थेषु निमज्जतां सतां धर्मश्चतुर्भिश्चरणैः सहैधते ।
इति प्रबोधाय चकार माधवश्चत्वारि तीर्थानि भृगोः कुलोद्भवः ॥
परश्वादीन्यायुधानि यथा पापहराणि वै ।
तीर्थानि च तथेत्येवं बोधयन्त्यभिधा इमाः ॥

—इति सम्प्रदायपद्धतौ (3. 4) ।

प्रलये जलदुर्गाऽसि सर्गादौ गिरिविस्तृतिः ।
इदानीं स्थलदुर्गाऽसि दुर्गा त्वं सद्गुणार्णवे ॥ १९ ॥

राजन्यरचितजलगिरिस्थलदुर्गसाम्याद् दुर्गायाः दुर्गात्वमुपपादयन्नाह । **प्रलय इति** । **सद्गुणार्णवे** संतो निर्दुष्टाः गुणाः ज्ञानादय एव । स्वच्छत्वादर्णांसि जलानि अस्याः संतीति सद्गुणार्णवा । तस्याः संबुद्धिः । **प्रलये जलदुर्गाऽसि** । प्रलयकाले दुर्गादेवी प्रलयार्णवरूपेण तिष्ठतीति भागवतोक्तेः । अनेन जलदुर्गत्वमुपपादितम् । **सर्गादौ** सृष्टिकाले । **गिरिविस्तृतिः** गिरि वाचि वेद इत्यर्थः । विस्तृतिर्विस्तरो यस्यास्सा । 'तत्पुरुषे कृति बहुलम्'[1] इति बहुलोक्तेः सप्तम्या अलुक् । सर्गादौ दुर्गा वेदवाक्यैः परमात्मानं स्तौतीति [2]भागवतोक्तेरिति भावः । गिरौ पर्वते विस्तृतिः विस्तारोऽस्य दुर्गस्येति समासे सति गिरिविस्तृतिरिति शब्दसाम्याद्गिरिदुर्गत्वमनेनोपपादितम् । **इदानीं स्थलदुर्गाऽसि** अस्मिन् स्थले दुर्गा नाम्ना वर्तसे । तत्र वर्तमानगिरेरल्पत्वाद्वा पुण्यक्षेत्रत्वाद्वा स्थलत्वोक्तिः । तस्मात्त्वयि **दुर्गात्वं** उपपद्यत इति भावः । **अथवा** सर्गादौ विमानगिरिस्थलदुर्गास्थानस्य सर्ग एव आदिर्यस्य प्रतिष्ठापूजादेः स सर्गादिः तस्मिन् वर्तमाने सति गिरौ विमानपर्वते विस्तृतिः । महिम्नां विस्तारो यस्याः सा तथोक्ता । **इदानीं** तीर्थप्रबंधकरणसमये । **स्थलदुर्गा** भक्तस्य मम सप्तधात्वावृतहृदयगुहारूप्यस्थले दुर्गा । अस्मिन् पक्षे स्पष्टं गिरिदुर्गत्वं चाभूदिति भावो द्रष्टव्यः । ॥ १९ ॥

दुर्ज्ञेयत्वाद् दुःखगत्वाद् दुष्प्राप्यत्वाच्च दुर्जनैः ।
सतामभयभूमित्वाद् दुर्गा त्वं हृद्गुहाश्रयात् ॥ २० ॥

अधुना दुर्गात्वं निर्वक्ति । **दुर्ज्ञेयत्वादिति** । दुर्ज्ञेयत्वात् दुःखेनायासेन गम्यते ज्ञायत इति दुर्गा । गत्यर्थकधातोर्ज्ञानार्थकत्वात् । तस्माद् दुर्गा ।

---

[1] (II. 3. 8.) [2] (X 87/18)

'ब्रह्मादयो बहुतिथं यदपांगमोक्षकांक्षा'[1] इति भागवतोक्तेः । **दुःखगत्वात्** दुःखं गमयति दुर्जनान् प्रापयतीति व्युत्पत्तेरिति भावः । **दुर्जनैः दुष्प्राप्यत्वाच्च** दुःखेनापि गंतुं अयोग्येति व्युत्पत्तेरिति भावः । **सतां** ज्ञानिनाम् । **अभयभूमित्वात्** अभयस्य भूमिः स्थानम् । वैकुंठादिलोकत्रयम् । तद्रूपत्वान्मोक्षकारणत्वादित्यर्थः । शत्रुभयपरिहाराय रचितस्थलविशेषस्य दुर्गपदाभिधेयत्वादिति भावः । **हृद्गुहाश्रयात्** नियामकतया सर्वहृदयगुहाश्रयात् । **त्वं दुर्गा** 'अर्शआदिभ्योऽच्'[2] इति दुर्गवती दुर्गेति व्युत्पत्तिरुक्ता भवति । दुर्गमस्थानस्थितत्वादिति भावः । एवमुक्तनिमित्तचतुष्टयाद् दुर्गाभिधेयत्वं युक्तमिति भावः । अनेन दुर्गायाः दुर्ज्ञेयत्वादिमाहात्म्यं वर्णितं बोध्यम् ।

॥ २० ॥

पाजकक्षेत्रसमीपस्थः विश्वनाथः

रक्षोगणक्षपणदक्षमहात्रिशूलं त्र्यक्षं वलक्षतनुमुल्लसदक्षमालम् ।
रूक्षाघशिक्षणविचक्षणशक्तियूथं दक्षाध्वरक्षयदमाश्रय विश्वनाथम् ॥

पाजकक्षेत्रमध्यवाटयोर्मध्ये विश्वनाथक्षेत्रं प्रसिद्धं तत्रत्यं विश्वनाथं वर्णयति । **रक्ष** इति । **रक्षोगणक्षपणदक्षमहात्रिशूलं** रक्षसामंधकासुरादिमहाराक्षसानाम् । गणस्य समूहस्य । क्षपणे नाशने । दक्षं समर्थं । महत् त्रिशूलं यस्य स तथोक्तस्तम् । **त्र्यक्षं** त्रिनेत्रम् । **वलक्षतनुं** वलक्षा धवला तनुः यस्य स तथोक्तस्तम् । 'वलक्षो धवलोऽर्जुन' इत्यमरः । **उल्लसदक्षमालं** उल्लसंती शोभमाना अक्षमाला जपमाला यस्य स तथोक्तस्तम् । **रूक्षाघशिक्षणविचक्षणशक्तियूथं** रूक्षाणां क्रूराणां महादुःखप्रदत्वेन

---

*[1] दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥
—इति भगवद्गीतासु (VII 14) ।

---

[1] I 16. 33. [2] 5/2/12 ।

असह्यानां अघानां पापानां शिक्षणे निरसने विचक्षणः समर्थः शक्तियूथः सामर्थ्यसमूहो यस्य स तथोक्तस्तम् । **दक्षाध्वरक्षयदं** दक्षस्य अध्वरो यज्ञस्तस्य क्षयदं नाशप्रदम् । **विश्वनाथं** तन्नामकं रुद्रम् **आश्रय सेवस्व** स्वचित्तादिसाधुवर्गं संबुद्ध्यैतद्वचनम् । ॥ २१ ॥

अंगानुषंगतभुजंगमतुंगभोगं गंगातरंगकृतमंगलमौलिभागम् ।
संगीतलोलयतिपुंगवगीतगाथं त गौर्यपांगरसमाश्रय विश्वनाथम् ॥२२॥

अंगेति । अंगानुषंगतभुजंगमतुंगभोगं अंगेषु अवयवेषु अनुषंगताः संबद्धाः । भुजंगमानां सर्पाणां तुंगा उन्नता भोगा देहा यस्य स तथा तम् । 'अहेश्शरीरं भोगः स्यात्' इति हलायुधः । **गंगातरंगकृतमंगलमौलिभागं** गंगाया जाह्नव्याः तरंगैरूर्मिभिः कृतमंगलः संपादितशोभनः मौलिभागो यस्य स तथा तम् । 'तीर्थेन मूर्ध्न्यधिधृतेन शिवश्शिवोऽभूत्'* इति वचनात् । **संगीतलोलयतिपुंगवगीतगाथं** संगीते गांधर्वविद्यायां लोलैः रसिकैः यतिपुंगवैः यतिश्रेष्ठैः गीता गाथा त्रिपुरसंहारादिकथा यस्य स तथोक्तस्तम् । **गौर्यपांगरसं** गौर्याः पार्वत्याः अपांगस्य कटाक्षस्य रसः सारभूतस्तम् । गौर्या सादरं निरीक्षित इत्यर्थः । **तं विश्वनाथं आश्रय** सेवस्व । ॥२२॥

इंद्रादिदेवगणवंदितपादपद्मं चंद्रार्धचूडमरविंददलायताक्षम् ।
कंदर्पवैरिणमनिंद्यममंदबोधं तं देवदेवमिममाश्रय विश्वनाथम् ॥ २३ ॥

इंद्रादीति । इंद्रादिदेवगणवंदितपादपद्मं इंद्रादिदेवसमूहनतचरणारविंदम् । **चंद्रार्धचूडं** चंद्रार्धो भालचंद्रः चूडायां केशबंधे यस्य स तथा तम् । **अरविंददलायताक्षं** पद्मदलवत् आयते अक्षिणी यस्य स तथा तम् । **कंदर्पवैरिणं** मन्मथशत्रुम् । **अनिंद्यं** गर्हाया अयोग्यम् । **अमंदबोधं** अमंदः

---

* यच्छौचनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्न्यधिधृतेन शिवः शिवोऽभूत् ।
—इति भागवते (III. 20/2)

पूर्णः ज्ञानं यस्य स तथा तम् । **देवदेवं** देवानामिंद्रादीनामपि दैवतम् । तमिमं **विश्वनाथं आश्रय** सेवस्व । ॥ २३ ॥

वंदारुनारदसनंदनमुख्ययोगिवृंदैः प्रवंद्यचरितैः परितश्च सेव्यम् ।
इंदिंदिरोपमसितेतरकंठकांतिं सौंदर्यमूर्तिममुमाश्रय विश्वनाथम् ॥२४॥

वंदार्विति । **प्रवंद्यचरितैः** स्तुत्यचरित्रैः । **वंदारुनारदसनंदनमुख्य योगिवृंदैः** वंदारवो वंदनशीलाः । 'शृवंद्योरारुः'* इत्यारुप्रत्ययः । ते च ते नारदसनंदनमुख्याश्च ते योगिनश्च तेषां वृंदैः समूहैः **परितश्च** समंतादपि । **सेव्यं** । **इंदिंदिरोपमसितेतरकंठकांतिं** । इंदिंदिरो भ्रमरः । 'इंदिंदिरश्चंचरीक' इति धनंजयः । तेन उपमा सादृश्यं यस्याः सा तथोक्ता । सितात् शुभ्रात् इतरा नीला कंठस्य कांतिर्यस्य स तथा तम् । **सौंदर्यमूर्तिं** लावण्ययुक्तदेहम् । **अमुं विश्वनाथं आश्रय** सेवस्व । ॥ २४ ॥

छंदश्चयस्तुतचरित्र पुरत्रयारे कुंदप्रसूनकृतसेवनतृप्तचित्त ।
त्वां दीनबंधुमरुणेंदुलसत्कपर्दं वंदेऽरिमर्दन सुहृद्धन विश्वनाथ ॥ २५ ॥

छंद इति । **छंदश्चयस्तुतचरित्र** छंदसां श्रीरुद्रादि—वेदानां चयेन समूहेन स्तुतचरित्र प्रशस्तचरित्र । **पुरत्रयारे** त्रिपुरशत्रो । **कुंदप्रसूनकृतसेवनतृप्तचित्त** कुंदप्रसूनैः कुंदपुष्पैः कृतसेवनेन कृतपूजया तृप्तं मनो यस्य तत्संबोधनम् । **अरिमर्दन** शत्रुसंहारिन् । **सुहृद्धन** सुहृदां भक्तानां धनरूप निक्षेपरूप । **हे विश्वनाथ** । **दीनबंधु** अनाथबंधुं । **अरुणेंदुलसत्कपर्दं** अरुणेंदुना रक्तवर्णचंद्रेण लसन् शोभमानः कपर्दः जटाबंधो यस्य स तथा तम् । 'कपर्दोऽस्य जटाजूटः' इत्यमरः । **त्वां वंदे** नमामि । ॥ २५ ॥

नन्दिकेश्वरः

सुचारुकर्णलांगूलशृंगांघ्र्युदरदृङ्मुखम् ।
ककुद्मंतं वृषं श्वेतं नौमि शंकरवाहनम् ॥ २६ ॥

---

* (III 10. 8.)

तत्रत्यं नंदिकेश्वरं वर्णयति । **सुचार्विति** । **सुचारुकर्णलांगूलशृंगांघ्र्युदरदृङ्मुखं** कर्णौ च लांगूलं च शृंगे च अंघ्रयश्च उदरं च मुखं च तानि सुचारूणि सुष्ठुमनोहराणि कर्णलांगूलशृंगांघ्र्युदरदृङ्मुखानि यस्य स तथा तम् । **ककुद्मंतम्** । ककुत् स्कंधोपरि ऊर्ध्वाकारेण परिणतमांसग्रंथिरस्यास्तीति ककुद्मान् तम् । **श्वेतं शंकरवाहनं वृषं नौमि** स्तौमि । 'णु स्तुतौ' इति धातोर्लट् । ॥ २६ ॥

मध्यवाटाख्यं वेदव्यासस्थानम्

भवघर्मभावार्तिघ्नः स मठः सेव्यतां सता ।
कृष्णद्वैपायनघनो यत्रागाद्वायुवर्त्मना ॥ २७ ॥

मध्यवाटाख्यं वेदव्यासस्थानं वर्णयति । **भवघर्मेति** । **कृष्णद्वैपायनघनः** ज्ञानानंदात्मकत्वात् कृष्णवर्णत्वाच्च कृष्णः । द्वीपसंबंधी द्वैपं अयनमाश्रयं यस्य तथा कृष्णश्चासौ द्वैपायनश्च कृष्णद्वैपायनः वेदव्यासः स एव घनो मेघः । **यत्र** मध्यवाटमठं प्रति । **वायुवर्त्मना** श्रीमध्वाचार्यरूपवायुद्वारा । **अगात्** अगमत् । 'इण् गतौ' इति धातोर्लुङ् । घनो वायुद्वारा यथा आयाति तथेत्यर्थः । यत्र मध्यवाटे श्रीमध्वाचार्यः वेदव्यासमूर्तिं स्थापितवानित्यर्थः । अत एव **भवघर्मभवार्तिघ्नः** भवःसंसारस्स एव घर्मस्तापस्तस्माद्भवामुत्पन्नामार्तिं क्लेशं हंतीति भवघर्मभवार्तिघ्नः **स मठः** 'मठश्छात्रादिनिलयः' इत्यमरः । **सता** सत्पुरुषेण । '**सेव्यतां** सेवृ सेवायां' इति धातोः कर्मणि लोट् । वेदव्याससन्निधानपात्रत्वात् सज्जनैः सेव्योऽयं मठ इति भावः । **रूपकमलंकारः** । ॥ २७ ॥

मध्यवाटस्थः वेदव्यासः

स्नेहार्द्रमध्वहृदयाख्यदशानुषक्तं मोहाख्यसंतमसकृंतनतीव्रशक्तिम् ।
श्रीमध्यवाटमठपौरुटभाजनस्थं व्यासप्रदीपमिममादरतो भजध्वम् २८

स्नेहार्द्रेति । स्नेहार्द्रमध्वहृदयाख्यदशानुषक्तं स्नेहेन भक्तिरसेन

तैलेनेति ध्वनिः । 'स्नेहस्तैलादिके रस' इति विश्वः । आर्द्रं मध्वहृदयं मध्वाचार्यहृदयमित्याख्या यस्यास्सा तथा तादृशी दशा धृतिः । 'दशा वर्त्यामवस्थायाम्' इति विश्वः । तया अनुषक्तं संबद्धं । अनेन आचार्याणां मठे वेदव्यासे च उभयत्र स्नेहोऽस्तीति द्योत्यते । नित्यापरोक्षित्वं[1] च वायोरस्तीत्यपि द्योत्यते । यथा दशानुषक्त एव दीपस्तिष्ठति तथा अयमपि मध्वहृदयानुषक्त एव तिष्ठतीति भावः । **मोहाख्यसंतमसकृंतनतीव्रशक्तिं** मोहाख्यमज्ञानाभिधं संतमसं अंधकारः । 'अवतमसमंधतमसंसंतमसंध्वांतमंधकारश्च' इति हलायुधः । तस्य कृंतने छेदने तीव्रा शक्तिः सामर्थ्यं यस्य स तथा तम् । अनेन गुरुसन्निहित[2] एव कृष्णोऽज्ञानं निरस्यतीति सूच्यते । **श्रीमध्यवाटमठपौरुटभाजनस्थं** श्रीमध्यवाटमठाख्यसौवर्णपात्रस्थं । हे जन **आदरतः** आदरेण । **भजध्वं** सेवध्वम् । भज सेवायां इति धातोर्लोट् । **रूपकमलंकारः** । ॥ २८ ॥

वेदव्यास गुणावास विद्याधीश सतां वश ।
मां निराशं गतक्लेशं कुर्वनाशं हरेऽनिशम् ॥ २९ ॥

अंत्यानुप्रासाख्यशब्दालंकारभरिततया वेदव्यासं स्तौति । **वेदव्यासेति** । **गुणावास** गुणानामावासभूत । आसमंताद्वसंत्यस्मिन्नित्यावासः । **विद्याधीश** विद्यानामधीश । **सतां** सज्जनानां **वश** अधीन । हे वेदव्यास हरे । **अनिशं** नित्यं । **मां निराशं** निर्गता आशा दुर्विषयेच्छा यस्मात् स तथा तम् । वैराग्यवंतमित्यर्थः । **अनाशं** नाशरहितम् । मुक्तमित्यर्थः । गतक्लेशं गताः क्लेशाः सांसारिकदुःखानि यस्य स तथा तम् । कुर्विति संबंधः ॥

चिन्तामणिनरसिंहः

भून्यस्तवामांकगवामपाणिमुत्क्षिप्तदक्षोरुगतान्यहस्तम् ।
चक्रायुधं वेत्रवतीतटस्थं चिंतामणिं श्रीनरसिंहमीडे ॥ ३० ॥

---

1 'एवं प्रलयकालेऽपि प्रतिभातपरावरः । मुख्यवायुः'—इत्यनुव्याख्याने (2/3/8)

2 'अप्यच्युतो गुरुद्वारा प्रसादकृदहं त्विति ।'—इति म भा. ता. नि. (26/52)

चिंतामणिनरसिंहं वर्णयति । **भून्यस्तेति** । **भून्यस्तवामांकगवाम-पाणिं** भुवि भूमौ न्यस्ते निक्षिप्ते वामांके सव्येरौ गतः वामपाणिः वामहस्तो यस्य स तथा तम् । **उत्क्षिप्तदक्षोरुगतान्यहस्तं** उत्क्षिप्ते उद्धृते दक्षोरौ दक्षिणांके गतः अन्यहस्तः यस्य स तथा तम् । **चक्रायुधं** चक्रमेव आयुधं यस्य स तथा तम् । **वेत्रवतीतटस्थं** वेत्रवत्याख्यनदीतीरे स्थितम् । **चिंतामणिं** चिंतामणिनामकम् । **श्रीनरसिंहं ईडे** स्तौमि । 'ईड स्तुतौ' इति धातोर्लट् । ॥ ३० ॥

उद्धृत्य पातालतलात् करस्थचक्रेण चक्रं खलयोगिनीनाम् ।
निहत्य गौरीवरकामदोऽभूदुन्नम्रकर्णो नरसिंह एषः ॥ ३१ ॥

उद्धृत्येति । उन्नम्रकर्णः उद्धृतकर्णः । **एष नरसिंहः** । **पाताल-तलात्** । पातालप्रदेशात् । ऊर्ध्वमागत्य **उद्धृत्य करस्थचक्रेण** करगत-सुदर्शनेन । **खलयोगिनीनां** खलानां दुष्टानां योगिनीनां पिशाचानां । **चक्रं** समूहं । **निहत्य** संहृत्य । **गौरीवरकामदः** गौरीवरस्य उमापतेश्शिवस्य **कामदः** अभीष्टप्रदः । **अभूत्** । चिंतामणिनरसिंहः शिवं ग्रसितुमागतां योगिनीं निहत्य शिवं ररक्षेति **पौराणिकी प्रथा** । ॥ ३१ ॥

नेत्रावती

वराहनयनानंदधारा नेत्रावती सरित् ।
शुष्कां तद्भक्तिलतिकां पुष्णाति कथमन्यथा ॥ ३२ ॥

नेत्रावतीं वर्णयति । **वराहेति** । **नेत्रावती सरित्** वराहनेत्रोत्पन्ना नेत्रावती नाम नदी । **वराहनयनानंदधारा** वराहस्य हरेर्नयनानंदधारा आनंदाश्रुप्रवाहरूपा भवति । न तु दुःखाश्रुधारा । तस्य आनंदपूर्णत्वात् । **अन्यथा** आनंदाश्रुधारा न भवेच्चेत् । **शुष्कां** विषयस्नेहलक्षणतापाभितप्ताम् । **तद्भक्तिलतिकां** तस्मिन् वराहे भक्तिरेव लतिका लता ताम् । **कथं पुष्णाति**

पोषयति । 'पुष पुष्टौ' इति धातोर्लट् । नेत्रजलस्य आनंदजलान्यत्वे-लतांकुरादिशोषकत्वमेव भवेत् न तु पोषकत्वम् । इयं शुष्कां तद्भक्तिलतिकां पुष्णातीत्यानंदाश्रुधारैव भवेदित्यर्थः । नेत्रावतीस्नानेन विष्णुभक्तिरभिवर्धत इति भावः । 'ये पिबंति जलं तासां मनुजा मनुजेश्वर । प्रायो भक्ता भविष्यंति वासुदेवेऽमलाशयाः'* इति वचनात् । **अर्थापत्तिरलंकारः** । ३२

कोललोलकृपाशीललोचनांबुजचुंबिनि ।
मज्जन्नेत्रावतीतोये तद्दयेक्षास्पदं न कः ॥ ३३ ॥

कोलेति । **कोललोलकृपाशीललोचनांबुजचुंबिनि** कोलस्य वराहस्य । 'वराहस्सूकरो घृष्टिः कोलः पोत्री किरिः किटिः' इत्यमरः । लोलं च चलं कृपाशीलं लोचनमेवांबुजं तच्चुंबति स्पृशतीति तथोक्तं तस्मिन् । **नेत्रावतीतोये मज्जन् कः** पुमान् । **तद्दयेक्षास्पदं** न तस्य वराहस्य दयेक्षायाः कृपावलोकनस्य आस्पदं विषयः **न** भवेत् । भवेदेवेत्यर्थः । तन्नेत्रस्थजले मज्जतः तदवलोकनविषयत्वस्य अवश्यं भावादिति भावः । नेत्रावतीस्नानेन-हरिकृपाविषयो भवतीति तात्पर्यार्थः । **वृत्त्यनुप्रासाख्यः शब्दालंकारः**। ३३

कुमारधारानेत्रावतीसङ्गमः

कुमारधारासरिता समेता नेत्रावती भाति तरंगिणीयम् ।
त्रिमार्गगातीरगतोप्यवात्सीत् त्रिलोचनो यत्र सहस्रमूर्तिः ॥ ३४ ॥

कुमारधारानेत्रावतीसंगमं वर्णयति **कुमारधारेति** । **कुमारधारासरिता** कुमारधाराख्यनद्या । **समेता** संयुक्ता । **इयं नेत्रावती** नाम । **तरंगिणी** नदी । **भाति** शोभते । **यत्र** कुमारधारानेत्रावतीसंगमे । **त्रिलोचनः** त्रीणि लोचनानि यस्य सः त्रिलोचनः शिवः । **त्रिमार्गगातीरगतोऽपि** त्रिमार्गगायाः भागीरथ्याः । 'भागीरथी त्रिपथगा' इत्यमरः । तीरं गतोऽपि । **सहस्रमूर्तिः** सहस्रं मूर्तयो यस्य स तथा । **अवात्सीत्** अवसत् ।

* भागवतपुराणवचनमिदम् (XI 5/40)

'वस निवास' इति धातोर्लुङ्। गंगातीरगतस्यापि शिवस्य सहस्रधा वस्तुमभिरुचिमुत्पादयतोऽस्य कुमारधारानेत्रावतीसंगमस्य महिमातिशयः कथं कथनीय इति भावः। ॥ ३४ ॥

कुमारधारा

कुमारधारे सुजनोद्धारे विज्ञानधारया ।
पुनीहि मामघस्तोमं लुनीहि सदनीहितम् ॥ ३५ ॥

कुमारधार इति। **सुजनोद्धारे** सुजनानां सज्जनानां उद्धारः संसारादुद्धरणं यस्याः इति पंचम्यर्थे बहुव्रीहिः। तस्याः संबुद्धिः। **हे कुमारधारे**। **विज्ञानधारया** परमात्मविषयकज्ञानपरंपरया। **मां पुनीहि** पवित्रं कुरु। 'पूङ् पवने' इति धातोर्लोट्। **सदनीहितं** सतामनिष्टभूतं सत्कर्मविरोधि[1] वा। **अघस्तोमं** पापसमूहम्। **लुनीहि** छिंधि। 'लूञ् छेदनेति धातोर्लोट्। ३५

कुमारधारे त्वत्तीरे मुक्तिद्वारे गुणाकरे ।
तपस्तपंतः सन्मंत्रं जपंतः स्याम संततम् ॥ ३६ ॥

कुमारधारा इति। हे **कुमारधारे**। **गुणाकरे** पावित्र्यादिगुणाश्रये **मुक्तिद्वारे** मोक्षोपाये। **त्वत्तीरे**। **वयं**। **संततं** अनवरतम्। **तपः** [2]कृच्छ्रादितपः। **तपंतः** चरंतः। **सन्मंत्रं** उत्तमप्रणवहयग्रीवादिमंत्रं। **जपंतः**। 'जप अव्यक्तशब्दे' इति धातोर्लटः शत्रादेशः। **स्याम भवेम**। 'अस भुवि' इति धातोर्लिङ्। ॥ ३६ ॥

सुब्रह्मण्यः

सुब्रह्मण्यस्य महिमा वर्णितुं केन शक्यते ।
यत्रोच्छिष्टमपि स्पष्टं श्वित्रिणः शोधयत्यहो ॥ ३७ ॥

सुब्रह्मण्यं वर्णयति। **सुब्रह्मण्यस्येति**। **सुब्रह्मण्यस्य** सुतरां ब्रह्मसु ब्राह्मणेषु साधुरिति सुब्रह्मण्यः। 'तत्र साधुः' इति (4/4/98) यत्प्रत्ययः।

---

1 'प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते'—इति गीतासु (17/26)

2 'तपस्विभ्यः—कृच्छ्रादिचारिभ्यः'—इति गीतभाष्योक्तिः (6/46)

तस्य षण्मुखस्य । **महिमा** माहात्म्यम् । **वर्णितुं** स्तोतुम् केन शक्यते केन वा शक्यते स्तोतुं न कोऽपि शक्नोतीत्यर्थः । 'शकॢ शक्तौ' इति धातोः कर्मणि लट् । **यत्र** सुब्रह्मण्यक्षेत्रे । **उच्छिष्टमपि** । **श्वित्रिणः** कुष्ठव्याधियुक्तान् । **स्पष्टं** यथा भवति तथा । **शोधयति** शुद्धान् करोति । **अहो** आश्चर्यं । 'शुच शौचे' इति धातोर्ण्यंतालट् । सुब्रह्मण्यक्षेत्रे ब्राह्मणोच्छिष्टलेपेन कुष्ठव्याधिर्नश्यतीति प्रसिद्धः । उच्छिष्टस्याप्येतादृशसामर्थ्यम् । किमु देवस्येति भावः । ॥ ३७ ॥

ब्रह्महत्यादोषशेषं ब्राह्मणानामयं हरन् ।
विरोधे तु परं कार्यमिति न्यायममानयत् ॥ ३८ ॥

ब्रह्महत्येति । **अयं** सुब्रह्मण्यक्षेत्राधिपतिः स्कंदः । **ब्राह्मणानां** । **ब्रह्महत्यादोषशेषं** ब्रह्महत्यायाः ब्राह्मणवधाज्जातो यो दोषस्तस्य शेषं नरकभोगावशिष्टं कुष्ठव्याधिरूपम् । जन्मांतरकृतब्रह्महत्यादोषशेषेण कुष्ठव्याधियुक्ता भवंतीति **स्मार्तप्रसिद्धिः** । **हरन्** परिहरन् । **विरोधे तु** विप्रतिषेधे तु । परं **कार्यं** परसूत्रेण कार्यं । इति न्यायं 'विप्रतिषेधे परं कार्यम्'* पूर्वपरसूत्रयोर्विरोधे परसूत्रमेवांगीकर्तव्यमिति वैयाकरणनीतिम् । **अमानयत्** अंगीकृतवान् । 'मान पूजायां' इति धातोर्लट् । अयं भावः । पूर्वकृतब्राह्मणवधजनितकुष्ठव्याधिपरिहारे एतद्धृतस्य ब्राह्मणस्य विरोधः । अपरिहारे शरणागतस्येदानींतनस्य ब्राह्मणस्य विरोधः । एवं विरोधे प्राप्ते । 'विप्रतिषेधे परं कार्यम्' इति अंगीकृत्येदानींतनशरणागत एव ब्राह्मणः पालनीय इति निश्चित्य कुष्ठव्याधिं परिहृत्य शरणागतं पालयतीति । **युक्तिरलंकारः** । 'दुर्घटार्थस्य घटना चातुरी युक्तिरिष्यते' इत्युक्तत्वात् । ॥३८॥

---

* विप्रतिषेधे परं कार्यम् । पा. सू. 1/4/2

सुब्रह्मण्य सुराग्रगण्य कुजनारण्यज्वलत्पावक
प्रब्रूयात् तव विक्रमं भुवि कविः को वाऽमरो वा दिवि ।
यः प्रागप्रतिमल्लतारकमहादैत्यं सुदृप्तं भवान्
विप्रौघप्रिय सुप्रभाव समरे क्रीडन्नजैषीद्द्विषम् ॥३९॥

सुब्रह्मण्येति । सुराग्रगण्य सुरश्रेष्ठ । **कुजनारण्यज्वलत्पावक** कुजना दुर्जना एव अरण्यं विपिनम् तस्य ज्वलत्पावक प्रदीप्तानल ! दुर्जनसंहर्त इत्यर्थः । हे **सुब्रह्मण्य** स्कंद । **तव विक्रमं** पराक्रमं । **भुवि को वा कविः** नरः । **दिवि** स्वर्गे **को वा अमरः** देवः । **प्रब्रूयात्** वदेत् । 'ब्रूञ् व्यक्तायां वाचि' इति धातोर्लिट् । न कोऽपि वक्तुं समर्थ इत्यर्थः । तत्र चैकं पराक्रमं वर्णयति । **हे सुप्रभाव** हे **विप्रौघप्रिय** हे सुब्रह्मण्य । यो **भवान् प्राक्** पूर्वं । **समरे** देवासुरयुद्धे । **सुदृप्तं** अत्युद्धतम् । **द्विषं** शत्रुं । **अप्रतिमल्लतारकमहादैत्यं** न विद्यते प्रतिमल्लः प्रतिभटो यस्य स तथोक्तः । स चासौ तारकमहादैत्यश्च तम् । तारकाख्यं महादैत्यम् । **क्रीडन्** अनायासेनेत्यर्थः । **अजैषीत्** अजयत् । जयतेर्लुङ् । ॥ ३९ ॥

अन्नं ददासि विदधास्यखिलस्य रक्षां
क्लिन्नं पुनासि विलुनासि समस्तदोषान् ।
हे स्कंद वंद्य भवतो भुवने भवानी-
सूनो कृपाजलनिधे कतमः समः स्यात् ॥ ४० ॥

अन्नमिति । भवानीसूनो । भवान्याः पार्वत्याः सूनो पुत्र । **वंद्य** स्तुत्य । **हे स्कंद** त्वम् । **अन्नं ददासि** अन्नदोऽसि **अखिलस्य** समस्तस्य ब्राह्मण्यस्य । **रक्षां विदधासि** अन्नदानेन अखिलान् पालयसीत्यर्थः । **क्लिन्नं** कुष्ठव्याधिनार्दं । **पुनासि** कुष्ठव्याधिं परिहृत्य पवित्रं करोषि । समस्तदोषान् ब्रह्महत्यादीन् । **विलुनासि** छिनत्सि । *विष्णुचक्रात्मकत्वाद्धिति भावः ।

---

* कामः पुनः श्रीरमणाद्रमायाम् । प्रद्युम्ननामाऽभवदेवमीशात् स स्कंदतामाप स वक्तां च । —इति म. भा. ता. निर्णये (III 74/75)

'लूञ् छेदने' इति धातोर्लृट्। इति यतः अतः कारणात् **कृपाजलनिधे** दयासमुद्र। **हे स्कंद**। भुवने लोके। **भवतः** तव। **कतमः** को वा। **समः** सदृशः। स्यात्। अन्नदानादिषु त्वत्सदृशः कोपि नास्तीत्यर्थः। 'तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम्' [1]इति तृतीयानिषेधाच्छेषे षष्ठी॥

प्रवर्तितस्कांदमतः पृथिव्यां जगत्पतिं श्रीपतिमात्मनाथम्।
रहस्युपाराधयितुं गुहाद्य गुहाश्रितोऽसीति मम प्रतर्कः ॥ ४१ ॥

प्रवर्तीतेति। **हे गुह** स्कंद। **पृथिव्यां** भूम्यां। **प्रवर्तितस्कांदमतः**। प्रवर्तितं स्कांदमतं स्कंद एव सर्वोत्तम इति मतं येन स तथा। **त्वम्** अद्य अधुना। **जगत्पतिं आत्मनाथं** आत्मनः स्वस्य नाथम्। **श्रीपतिं** लक्ष्मीपतिं। **रहसि** एकांते। **उपाराधयितुम्**। **गुहाश्रितः** गुहां वल्मीक-गुहां आश्रितः। **असि** अनेन पूर्वं स्कंदमतं कृत्वा तत्राहमेव सर्वोत्तम इति सिद्धांतयित्वा इदानीं स्वेन अन्यः पूज्यते चेदस्मत्प्रतारणायैव[2] इदं शास्त्रं कृतमिति बुद्ध्या जनानां स्वशास्त्रे प्रवृत्तिर्न स्यादिति धियैव रहसि उपाराधयितुं गुहां समाश्रितोऽसि। **इति मम**। **प्रतर्कः** ऊहः। सुब्रह्मण्यक्षेत्रे वल्मीकगुहायां स्कंदस्तिष्ठतीति प्रसिद्धिमनुसृत्येयमुत्प्रेक्षा। ॥ ४१ ॥

श्रीविष्णुतीर्थमुनिमित्र सुरारिजैत्र
श्रीकृष्णपज्जलजभृंग कृताघभंग।
सह्येश देहि सकलैरुपजीव्यमन्नं
संहर्तृ सर्वभुवनस्य कुमार मह्यम् ॥ ४२ ॥

श्रीविष्णुतीर्थेति। **श्रीविष्णुतीर्थमुनिमित्र** श्रीविष्णुतीर्थमुनिसख।

---

[1] पा. सू. (2,3/72)

[2] स्कंदसूर्यगणेशादिमतानि न्यायतोऽमुतः।
निराकृतान्यशेषेण सिद्धांतस्याविशेषतः॥

—इत्यनुव्याख्याने (2-2-41)

विष्णुतीर्थश्रीचरणः सुब्रह्मण्ये मठं कृत्वा अतिष्ठदिति प्रसिद्धिः । एकत्रावासेन परस्परमैत्री भवतीति गुहस्य विष्णुतीर्थमुनिमित्रत्वं । **सुरारिजैत्र** सुरारिस्तारकासुरः तं जयतीति सुरारिजैत्रः तस्य संबुद्धिः । **श्रीकृष्णपज्जलजभृंग** श्रीकृष्णपज्जलजे श्रीकृष्णपादारविंदे भृंगः भ्रमरः तस्य संबुद्धिः । **कृताघभंग** कृतः अघानां पापानां भंगः येन स तथोक्तस्तस्य संबुद्धिः । **सह्येश** सह्यपर्वतस्येश स्वामिन् । हे **कुमार** स्कंद । **सकलैः** ब्रह्मादिभिः । **उपजीव्यं** आश्रयणीयं **सर्वभुवनस्य** समस्तलोकस्य । **संहर्तृ** संहारकं । **अन्नं** अद्यतेऽनेनेति निमित्तेन अन्नशब्दवाच्यं श्रीनारायणं[1] । 'अद्यतेऽत्ति च भूतानि तस्मादन्नं तदुच्यते' इति श्रुतेः अद्यते उपजीव्यते, अत्ति च संहरति च । यतस्तस्मात् । नारायणाख्यं ब्रह्म अन्नमित्युच्यते इति श्रुत्यर्थः । **मह्यं देहि** दिश । त्वमन्नदोऽसीति प्रसिद्धः । मह्यमप्यन्नमेव दिशेति औचित्योक्तिः । श्रीनारायणं ममापरोक्षं कुर्विति तात्पर्यार्थः । ॥ ४२ ॥

यत्र संपुटमस्फोटं कृष्णस्य स्फोरयत्यहो ।
अग्राह्यत्वमदृश्यत्वं किं पुनस्तत्र पंडिताः ॥ ४३ ॥

यत्रेति । **यत्र** यस्मिन् सुब्रह्मण्ये । **अस्फोटं** अविश्लिष्टं । **संपुटं** शालग्रामस्थापनकरंडम् कर्त । **कृष्णस्य** हरेः । **अग्राह्यत्वं** ग्रहीतुमशक्यत्वं । **अदृश्यत्वं** दर्शनाविषयत्वं[2] । **स्फोरयति** प्रकाशयति । 'स्फुर प्रकाशे' इति धातोर्लट् । संपुटस्य संश्लिष्टत्वादंतःस्थितश्रीकृष्णमूर्तेरग्राह्यत्वं अदृश्यत्वं च व्यनक्तीति भावः । **अहो** जडस्य विष्णुगुणप्रतिपादकत्वमाश्चर्यं । **तत्र**

---

[1] 'अन्नमन्नाद एव च' ।

—इति च विष्णुसहस्रनामसु ।

[2] यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मम् ।

—इति आथर्वणोपनिषदि (I 6)

सुब्रह्मण्ये । **पंडिताः** विद्वांसः । **किं पुनः** हरेरदृश्यत्वादिगुणान्प्रतिपाद-यंतीति किं वक्तव्यम् ॥ ॥ ४३ ॥

अभेद्यमतियत्नेनाप्यस्खलत्कृष्णविग्रहम् ।
तत्पूजाभाजनं भाति माध्वं हृदिव संपुटम् ॥ ४४ ॥

अभेद्यमिति । अतियत्नेनाप्यभेद्यं भेत्तुमशक्यम् । मध्वाचार्य-हृदयमपि । ' य एवायं मुख्यःप्राणस्तमुद्गीथमुपासां चक्रिरे' इति[1] श्रुत्यनुसारेण मुख्यप्राणः असुराणां भेत्तुमशक्यस्तत्र कदाऽप्यसुरावेशाभावादिति[2] भावः । **अस्खलत्कृष्णविग्रहम् ।** अस्खलन्न चलन् कृष्णस्य विग्रहो मूर्तिर्यस्मात्त-त्तथोक्तम् । आचार्यहृदयमपि सदा सन्निहितकृष्णमूर्ति । **तत्पूजाभाजनं** तस्य कृष्णस्य पूजापात्रम् । **संपुटं** देवस्यास्फोटसंपुटांतःपातित्वात् संपुटो-पर्येव गंधपुष्पादिकमर्चयंतीति भावः । **माध्वं** मध्वाचार्यसंबंधि । **हृदिव** चित्तमिव । **भाति** अत्र विशेष्यस्यासंश्लिष्टत्वात् **तुल्ययोगित्वमलंकारः** । ॥ ४४ ॥

पयस्विनी

पयस्विनि जगत्स्वामी त्वयि सन्निहितो ध्रुवम् ।
न चेत् तत्प्रेयसी तीरे कथं तेऽवतरिष्यति ॥ ४५ ॥

पयस्विनीं वर्णयति । **पयस्विनीति । हे पयस्विनि** पयस्विन्या-ख्यतरंगिणि । **जगत्स्वामी** श्रीनारायणः । **त्वयि सन्निहितः ध्रुवं** निश्चयः । **न चेत्** त्वयि सन्निहितो न भवति चेत् । **तत्प्रेयसी** तस्य नारायणस्य प्रेयसी प्रियतमा महालक्ष्मीः । **ते** तव । **तीरे कथमवतरि-ष्यति** दुर्गारूपेण अवतारं करिष्यति । दुर्गारूपेण महालक्ष्मीः पयस्विनी-

---

[1] (छांदोग्योपनिषत् 1/2/7)

[2] 'प्राणस्य नासुरावेशः आखणाश्मसमो हि सः ।'
—इति भगवत्पादोदाहृतस्मृतिः ।

तीरेऽवतरिष्यतीति **पुराणप्रसिद्धिः**[1] । स्वभर्त्रवस्थितिमवलोक्य महालक्ष्म्या त्वत्तीरेऽवतरिष्यमाणत्वात् त्वयि विष्णुस्सन्निहित इति निश्चय इति भावः ।

॥ ४५ ॥

सुवर्णा

वेदाचलहृदुद्भूतां सुवर्णां कोऽनु वर्णयेत् ।
अंहसो दह्यमानस्य श्रावयंतीं स्वनं जनान् ॥ ४६ ॥

सुवर्णां वर्णयति । **वेदेति** । **वेदाचलहृदुद्भूतां** वेदाचलस्य वेद-पर्वतस्य हृदः हृदयगुहायाः उद्भूतामुत्पन्नाम् । **दह्यमानस्य** भस्मीभावं गच्छतः । **अंहसः दुष्कृतस्य** । अंहो दुरितदुष्कृतमित्यमरः । **स्वनं** चटचटध्वनिं । **जनान्** स्वाप्सु मज्जमानान् जनान् । **श्रावयंतीं सुवर्णां** नदीं । **को नु वर्णयेत्** कः पुमाननुवर्णयेत् स्तुतिं कुर्यात् । वर्ण स्तुताविति धातोर्लिङ् । स्नानमात्रेण दुरितध्वंसमनुभावयंतीं सुवर्णां नदीं न कोऽपि स्तोतुं समर्थ इत्यर्थः ।

॥ ४६ ॥

कुम्भासि क्षेत्रम्

भासि कुंभासिसंज्ञ त्वं क्षेत्र श्रीशगिरीशयोः ।
यत्र कुंभासुरस्यासिरभासीद्द्रौपदीपतिः ॥ ४७ ॥

कुंभासिं वर्णयति । **भासीति** । **कुंभासिसंज्ञ** कुंभासीति संज्ञा यस्य स तस्य संबुद्धिः । **श्रीशगिरीशयोः** । **क्षेत्र त्वं भासि** शोभते । भा दीप्ताविति धातोर्लट् । कुंभासिक्षेत्रं शैववैष्णवात्मकमिति **पुराणप्रसिद्धं** ।

---

[1] दुर्गा पुनर्विप्रकुलेऽवतीर्णा हनिष्यति व्रातमथासुराणाम् ।'

—इति म. भा. ता. निर्णये (32/164)

स्वहेलया पातितपार्थिवव्रजां धीशुद्धिहां केरळभूषणायिताम् ।
पयस्विनीं प्रेक्ष्य पथि द्विजार्थितां स भाविनोमस्मरदत्र चण्डिकाम् ।

—इति सुमध्वविजये (V 35)

यत्र कुंभासिक्षेत्रे । **द्रौपदीपतिः** भीमः । **कुंभासुरस्य** कुंभाख्यासुरस्य । **असिः** खड्ग इव । **अभासीत्** । यथा खड्गः मारको भवेत् तथा भीमोऽपि कुंभासुरमारकोऽभवदित्यर्थः । भा दीप्ताविति धातोः कर्तरि लुङ् । कुंभासि-क्षेत्रे भीमसेनः कुंभासुरं जघानेति **पुराणप्रसिद्धिः** । ॥ ४७ ॥

गुहामुखं तीर्थनेत्रं वेदस्थानं वनायनम् ।
यत्यर्थ्यं गौतमक्षेत्रं चित्रं तत्तनुवद्बभौ ॥ ४८ ॥

पुनरपि कुंभासिं वर्णयति । **गुहामुखमिति** । **गुहामुखं** गुहैव मुखं यस्य तद्गुहामुखम् । तस्मिन् क्षेत्रे **यमगुहाभिधा** काचन **गुहा वर्तते** । तस्मादेवमुक्तं । **तीर्थनेत्रं** शूद्राणां ब्राह्मणानां च द्विधाकृतं तीर्थमेव नेत्रं यस्य तत् तीर्थनेत्रम् । **वेदस्थानं** बहुशो वेदाध्ययनं तत्र कुर्वंतीति भावः । **वनायनं** वनस्यायनं वनायनं । **तत्र मधुवनाख्यं वनमस्तीति** भावः । वनमेव अयनमिति मुनिशरीरे योजना । **यत्यर्थ्यं** यतिभिरर्थ्यं । माघस्नानार्थं यतयोऽपि तत्र यांतीति भावः । **गौतमक्षेत्रं** गौतमाख्यऋषेः क्षेत्रमित्यर्थः । अनावृष्टौ सत्यां गौतममुनिना स्वशक्त्या गंगामाहूय मुनीन् स्थापयित्वा तत्र स्थितमिति **पौराणिकी कथा** । **तत्तनुवत्** तस्य ऋषेः शरीरवत् । **बभौ** शुशुभे । मुनिशरीरमपि सुमुखं सुनेत्रं वेदपारायणपरं वनप्रियं यतिभिरर्थ्यं च भवति तस्मात् तत्तनुवदित्युक्तं । **चित्रं** आश्चर्यं । जडस्य क्षेत्रस्य मुनिसाम्यं चित्रमिति भावः । ॥ ४३ ॥

कोटीश्वरस्थानम्

चारु कोटीश्वरस्थानं शोभते यत् पुरत्रयम् ।
पुरारिरिव निर्जित्य ध्वजेनाद्यापि जृम्भते ॥ ४९ ॥

कोटीश्वरस्थानं वर्णयति । **चार्विति** । **चारु** मनोहरम् । **कोटी-श्वरस्थानं** कोटीश्वराख्यशिवस्थानं । **शोभते** शुभ दीप्ताविति धातोर्लट् । **यत्** कोटीश्वरस्थानं । **पुरारिरिव** त्रिपुरारिः शिव इव । **पुरत्रयं** स्कंद-

पुरगजपुरब्रह्मपुराख्यं स्वनिकटस्थितग्रामत्रयं । **निर्जित्य** ग्रामत्रयात् करं गृहीत्वा । **अद्यापि** अधुनाऽपि । **ध्वजेन** ध्वजोत्सवेन । **जृंभते** शोभते । जृंभि शोभायामिति धातुः । **उत्प्रेक्षालंकारः** । ॥ ४९ ॥

नमस्ते शितिकंठाय कोटिसंख्यर्षितोषणात् ।
यः कोटीश्वरसंज्ञोऽभूस्स किं नैकर्षिकामधुक् ॥ ५० ॥

इदानीं कोटीश्वरनामार्थं सूचयंस्तस्माद्देवात् स्वाभीष्टसिद्धिं कैमुत्येन साधयति । **नमस्त** इति । **शितिकंठाय** नीलकंठाय । **ते नमः** तुभ्यं नमः । **यः** त्वम् । **कोटिसंख्यर्षितोषणात्** कोटिसंख्याकानामृषीणां तोषणात् **कोटीश्वरसंज्ञः** कोटीश्वर इति संज्ञा यस्य स तथोक्तः । **अभूः** कोटिसंख्यैर्मुनिभिः तपसि क्रियमाणे सति तेषामनुग्रहाय तत्र शिवः प्रादुर्बभूवेति **पुराणप्रसिद्धोऽयमर्थः** । **सः** त्वम् । **नैकर्षिककामधुक्** एकस्य ऋषेर्मम कामधुक् कामधेनुर्न किमिति संबंधः । कोटिसंख्याकमुनिकामदायकस्य एकमुनेर्मम कामितार्थप्रदत्वं कैमुत्यसिद्धमिति भावः । **स्वाम्नमिदं पद्यम्** । ॥ ५० ॥

क्रोडमुन्याश्रमः

क्रोडयोगीश्वरक्षेत्रं भाति शुक्तिमतीतटे ।
सतां मता द्विता यत्र स्पष्टोमेशरमेशयोः ॥ ५१ ॥

क्रोडमुन्याश्रमं वर्णयति । **क्रोडेति** । **क्रोडयोगीश्वरक्षेत्रं** क्रोडयोगीश्वरस्य क्रोडमुनीश्वरस्य क्षेत्रम् । **शुक्तिमतीतटे** शुक्तिमत्याख्यनदीतीरे । **भाति** शोभते । **यत्र** क्रोडयोगीश्वरक्षेत्रे । **सतां** सज्जनानां । **मता** अभिमता । **उमेशरमेशयोः** शंकरनारायणयोः । **द्विता** द्वैतं भेद इत्यर्थः । **स्पष्टा** स्फुटा । भिन्नभिन्नस्थानगतयोः शंकरनारायणयोरवयवरूपो भेदः सर्वैरनुभूयत इत्यर्थः । क्रोडयोगीश्वरक्षेत्रे शंकरनारायणौलिंगे तिष्ठतः । तत्र नारायणलिंगं स्थूलं शंकरलिंगं तु कृशम् । ॥ ५१ ॥

शंकरनारायणयोर्भेदः

द्वासुपर्णेति वेदार्थभूतौ तौ प्रायशोऽमरौ ।
यदेकोऽश्नाति बहुशोऽनश्नन्योऽभिवर्धते ॥ ५२ ॥

तत्र अर्चकाश्शैवाः शंकराय पूजोपहारादिकं वहु प्रयच्छंति नारायणाय न प्रयच्छंति । एवं स्थिते शैवानां कुत्सितव्यापारेणैव शंकरनारायणयोर्भेदं साधयितुमाह । **द्वासुपर्णेति** । **तौ** तस्मिन् क्षेत्रे स्थितौ । **अमरौ** शंकर-नारायणाख्यौ देवौ । **प्रायशः** निश्चयेन । **द्वासुपर्णेति वेदार्थभूतौ** । "द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्यनश्नन्यो अभिचाकशीती"ति श्रुत्यर्थभूतौ जीवपरमात्मानौ भवेतां । तयोर्मध्ये **एकः** शंकरः जीवकोटिप्रविष्टो भवेत् । **यत्** यस्मात् कारणात् । **वहुशः** अर्चकैर्दत्तमन्नादिकं । **अश्नाति** अत्ति । अश भक्षण इति धातोर्लट् । **अन्यः** शंकराद्भिन्नो नारायणः परमात्मा भवेत् । यद्यस्मात् कारणात् । **अनश्नन्** अभुंजानस्सन् । **अभिवर्धते** । अतो द्वासुपर्णेति वेदार्थभूताविति श्लोकार्थः । ॥ ५२ ॥

श्रुतिशतवर्णितचरितं यतिहृन्निरतं यथेष्टगुणभरितम् ।
किंकरवरदमनिंद्यं शंकरनारायणं वंदे ॥ ५३ ॥

पुनरपि शंकरनारायणयोर्मूर्तिं वर्णयति । **श्रुतीति** । **श्रुतिशतवर्णि-तचरितं** । श्रुतीनां शतेन वर्णितानि चरितानि यस्य स तथा तम् । **यतिहृन्निरतं** यतीनां हृदि चित्ते । निरतं नितरां रतिमंतम् । **यथेष्टगुण-भरितं** यथेष्टं इष्टमनतिक्रम्य । गुणाः ज्ञानानंदादिगुणाः । तैर्भरितं पूर्णं । अनेन अनिष्टभूतदुःखादिगुणानां निरासः । **किंकरवरदं** । किंकराणां वरदं

---

* द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वत्यनश्नन्यो अभिचाकशीति ॥
—इति आथर्वणोपनिषदि (V. I) ।

वरदायकं । **अनिंद्यं** निंद्यो न भवतीत्यनिंद्यः तम् । **शंकरनारायणं** शंकरश्च नारायणश्च शंकरनाराणाविति द्वंद्वसमासं कृत्वा अस्य चैकवद्भावः कर्तव्यः । *युवोरनाकावित्यत्र युवोरित्येकवद्भावेऽपि पुल्लिंगदर्शनान्नपुंसकविधानमनित्यम् । एकस्मिन्नुच्यमाने यथैकवचनं तथा द्वयोरुच्यमानयोस्सतोरप्येकवचनमेव वक्तव्यमित्येकवद्भावः भावः । एकवचनांतशब्दवाच्यत्वरूपा एकस्य वस्तुनः उपमेत्यर्थः । न तु स्वरूपैक्यं । शंखपटहमित्यत्रापि तद्दर्शनात् तथा सत्येकभाव इति स्यात् । तद्धि एकवस्तुरूपायामेव घटेत न तु तदैक्ये । उपमार्थकवतैवैय्यर्थ्यप्रसंगात् । शंकरेण सहितो नारायण इति मध्यमपदलोपी तत्पुरुषो वा । भिन्नोपाधिविशिष्टतया भिन्नयोश्शंकरनारायणयोर्घटपटयोरिव सामानाधिकरण्यायोगात् । शंकरश्चासौ नारायणश्चेति कर्मधारयोऽप्ययुक्त एव । स हि विशेषणं विशेष्येण बहुलमिति सूत्रात्[2] विशेषणविशेष्ययोर्विशेषणयोर्वा दृष्टः । भिन्नयोः परस्परनिरपेक्षयोः विशेष्ययोः कथं स्यात् । तस्मादुक्त एव समासः । अयमेव न्यायो हरिहरेऽपि । **वंदे** नमस्करोमि वदि अभिवादनस्तुत्योर्लट् । ॥ ५३ ॥

शूलसुदर्शनसुरुचं बालेंदूज्वलकिरीटशोभितशिरसम् ।
पंकजमुखकरचरणं शंकरनारायणं वंदे ॥ ५४ ॥

शूलेति । शूलसुदर्शनसुरुचं शूलं च सुदर्शनं च शूलसुदर्शने ताभ्यां शोभमाना रुक् यस्य स तथा तम् । गमकत्वाद्व्यधिकरणेऽपि बहुव्रीहिः । **बालेंदूज्वलकिरीटशोभितशिरसं** बालश्चासाविंदुश्च बालेंदुः । उज्वलं च तत्किरीटं च उज्ज्वलकिरीटं ताभ्यां शोभितं शिरः यस्य स तम् । **पंकजमुखकरचरणं** पंकजवत् मुखं करचरणौ च यस्य स तम् । शिवस्य शूलं बालेंदुश्च । अन्यत् समानं । शेषं पूर्ववत् । ॥ ५४ ॥

पीनोरुकटिसुनाभं ध्यानार्हौरःस्थिताहिफणहारम् ।
शंखाभ्रवर्णमनघं शंकरनारायणं बंदे ॥ ५५ ॥

---

[1] पा. सू. 7/1/1 । [2] पा. सू. 2/1/57 ।

पीनेति । **पीनोरुकटिसुनाभं** पीनाः ऊरुकटिशोभननाभयः यस्य स तम् । **ध्यानार्होरस्थिताहिफणहारं** ध्यानार्हे उरसि स्थितः अहिफणः हारश्च यस्य स तम् । **शंखाभ्रवर्णं** शंखश्च अभ्रं मेघश्च शंखाभ्रे तयोर्वर्ण इव वर्णो यस्य स तम् । **अनघं** निर्दोषं । शेषं पूर्ववत् । ॥ ५५ ॥

कुटाचल मूकाम्बिका

मूकांबिका कृपालोकादाकांक्षितफलप्रदा ।
मूकानकृत मे शश्वनेकांतिकजनप्रिया ।' ५६ ॥

कुटजाचलदेवतां मूकांबिकां स्तौति । **मुकांबिकेति** । **कृपालोकात्** कृपावलोकनात् । **आकांक्षितफलप्रदा** आकांक्षितानि फलानि प्रददातीति तथोक्ता । **एकांतिकजनप्रिया** । एकः नारायणः अंते अवसाने येषां ते । एकस्मिन्नारायणे अंतः अध्यवसायः निश्चय इति यावत्, येषामिति वा । एकांतिनः विष्णवेकनिष्ठाः, स्वार्थे क प्रत्ययः । एकांतिकास्त एव जनास्ते प्रिया यस्यास्सा तथोक्ता । **मूकांबिका मे शत्रून्** । **मूकानकृत** स्वभक्त-शत्रून् मूकयतीति व्युत्पत्त्या सर्वज्ञांबिकायाः मूकांबिकात्वमिति तत्कृपयैव मम-नुभवसिद्धमिति ज्ञापयितुमेवमुक्तम् । एतत्प्रबंधकर्तुः वादिराजमुनेः मह-त्म्यमसहमानास्तौलवदेशस्थाः दुर्जनाः भिक्ष्वादिविप्राः कंचन बालकं मूकांबिकां प्रति प्रेषयित्वा वादिराजमुनीश्वरास्तं बालं हिंसितवंत इत्यपप्रथां प्रथयां चक्रुः । तदा तदसहमाना मूकांबिका तं बालं स्वप्ने जाग्रद्वस्थायां च कशाताडनसर्पादिना बहुधा भीषयित्वा वादिराजमुनिचरणसमीपमेव

---

* मूकाम्बिका महादेवी प्रसन्ना स्वयमेव हि ।
आसदापादितावर्णं वादिराजे समक्षिणोत् ॥
मूकीचकार तच्छत्रंस्ततस्तेन स्तुताऽभवत् ।
विष्णुदासस्यानुकूलाः स्वयमेव हि देवताः ॥
—इति रघुनाथाचार्यकृत (श्रीवादिराज)वृत्तरत्नसंग्रहे (I. 64–65) ।

प्रापितवती किलेति वादिराजमुनयस्तमेव बालं जनसंसदि दर्शयित्वा स्वापवादं परिहृतवंत इति **कथां** सूचयितुं इयं स्तुतिः कृता । ॥ ५६ ॥

क्वचित् पृथिव्यां परितश्चरंती नभस्थलं चापि मुहुर्व्रजंती ।
विपक्षविध्वंसविधौ स्फुरंती कात्यायनी कंदुकवद्विभाति ॥ ५७ ॥

पुनश्च तामेव स्तौति । **क्वचिदिति** । **विपक्षविध्वंसविधौ** विपक्षस्य दैत्यसमूहस्य विध्वंसविधौ हननकर्मणि **क्वचित्** कदाचित् । तेषु भूम्यामेव चरत्सु स्वयमपि **पृथिव्यां** भूमौ । **परितः** इतस्ततः । **चरंती** संचरंती । तेषु नभस्थलं गतेषु सत्सु । **नभस्थलं चापि मुहुः व्रजंती** अत एव **स्फुरंती** । **कात्यायनी कंदुकवद्विभाति** । कंदुको यथा भूमौ वियति च मुहुर्मुहुः संचरति तथा संचरणात् इयमपि कंदुकवद्विभातीति भावः । **समस्यापूरकमिदं पद्यम्** । ॥ ५७ ॥

सह्यपर्वतः

सह्योऽप्यसह्योऽसि गिरे पापानामस्तु तत् तथा ।
अचलस्त्वं चलसि मन्मनसस्तन्न रोचते ॥ ५८ ॥

सह्यपर्वतं वर्णयति । **सह्योऽपीति** । **हे गिरे** सह्यपर्वत । **त्वं सह्योऽपि** सह्यनामकोऽपि । सहनयोग्योऽपीति ध्वनिः । **पापानां** दुरितानाम् । **असह्योऽसि** सहनायोग्योऽसि पापपरिहारकोऽसीत्यर्थः । सह्यस्यासह्यत्वं विरुद्धं विषयभेदेन विरोधपरिहारः । अत एव **विरोधाभासालंकारः** । 'आभासत्वे विरोधस्य विरोधाभास इष्यत' इत्युक्तेः । इति यत् । **तत् तथाऽस्तु** । तव पापासह्यत्वमंगीकृतम् । पापपरिहारस्येष्टत्वादिति भावः । **अचलः त्वं** चलनरहितस्त्वम् । **मन्मनसः** ममांतःकरणात् । **चलसि** इति यत् । अस्मन्मनोगोचरो न भवसीतिं यत् । **तन्न रोचते** तदनुकूलं न भवतीत्यर्थः । अयं विरोधो नांगीक्रियते । उत्तमवस्तुविस्मरणस्यानिष्टत्वादिति भावः । पापं परिहृत्यास्मद्ध्यानविषयो भवेति तात्पर्यार्थः । ॥ ५८ ॥

हरिहरक्षेत्रम्

मुरपुरहर लक्ष्मीपार्वतीकेलिलोल स्फुरदसितसितांगासह्यचक्रत्रिशूल ।
परतरगुरुमूर्ते पावनापारकीर्ते हरिहर तव पादांभोजयुग्मं नतोऽस्मि ५९

हरिहरमुपवर्णयति । **मुरपुरहरेति । हे मुरपुरहर** मुरं मुरनामकमसुरं । पुराणि असुराधिष्ठितानि त्रिपुराणि हरतीति मुरपुरहरस्तस्य संबुद्धिः । अत्र मुरहरो हरिः । पुरहरो हरः । एवमुत्तरत्रापि द्रष्टव्यम् । **लक्ष्मीपार्वतीकेलिलोल** लक्ष्म्याः पार्वत्याश्च केल्यां क्रीडायां लोलः आसक्तः तस्य संबुद्धिः । लोलश्चंचलसतृष्णयोरित्यमरः । **स्फुरदसितसितांग** स्फुरदुज्वलत् असितं श्यामं सितं शुभ्रं चांगं यस्य स तथोक्तस्तस्य संबुद्धिः । **असह्यचक्रत्रिशूल** असह्यं सोढुमशक्यं चक्रं सुदर्शनं त्रिशूलं च यस्य स तथा तस्य संबुद्धिः । **परतरगुरुमूर्ते** परतरः सर्वोत्तमः गुरुर्ज्ञानोपदेष्टा इति मूर्तिः यस्य स तथा तस्य संबुद्धिः । **पावनापारकीर्ते** पवित्रनिरवधिककीर्ते । **हरिहर** हरिणा सहितो हरः हरिहरः तस्य संबुद्धिः । हरिहरयोर्वैलक्षण्यद्योतनायेमानि विशेषणानि । **तव पादांभोजयुग्मं नतोऽस्मि । जातिरलंकारः ।**

॥ ५९ ॥

हरे भवहरे तेंऽघ्रौ भक्तिर्मुक्तिप्रदाऽस्तु मे ।
[1]वैराग्यभाग्यं वितर हर गौरीमनोहर ॥ ६० ॥

हर इति । हरे श्रीनारायण । **भवहरे** संसारनिवर्तक । **ते** तव । **अंघ्रौ** चरणे । **मुक्तिप्रदा भक्तिः मे** मम **अस्तु** भूयात् । हरेर्मोक्षप्रदत्वात्[3]

---

[1] 'यमवायुशिवेन्द्राश्च ज्ञेया धर्मादिदेवताः ।
—इति तन्त्रसारसङ्ग्रहे (I. 48) ।

[2] वैराग्याभिमानिने रुद्राय नमः ।
—इति तन्त्रसारोक्तपूजापद्धतौ ।

[3] 'विष्णुर्हि दाता मोक्षस्य वायुश्च तदनुज्ञया ।'
—इति म. भा. ता. निर्णयोद्धृत भविष्यत्पर्ववचनम् (I. 78) ।

तं प्रति तत्साधनयाच्ञा युक्तेति भावः । **गौरीमनोहर** पार्वतीप्रिय । **हे हर वैराग्यभाग्यं** हरिभक्तिसाधनविरक्तिसंपदम् । **[मे]** मह्यं **वितर** देहि । हरस्य वैराग्याभिमानित्वादिति भावः । ॥ ६० ॥

यदेकेन न वध्योऽरिस्ततो हरिहरावुभौ ।
सहागतावर्धदृश्यावैक्यं चेच्छत्रुणा जितम् ॥ ६१ ॥

केचन मूर्खाः हरिहरयोरेकमूर्तिगतत्वेनैक्यमिति वदंति । तान् प्रति युक्त्या तयोरैक्यं दूषयितुमाह । **यदिति** । **यत्** यस्मात् कारणात् । **अरिः** शत्रुः गुहाख्यो दैत्यः । **एकेन** हरिणा हरेण वा । **न वध्यः** हंतुं योग्यो न भवति तादृशवरदानादिति भावः । **ततः** तस्मात् कारणात् । **उभौ हरिहरौ अर्धदृश्यौ** मूर्तेरेकैकभागदृश्यौ संतौ **सहागतौ** शत्रुं हंतुं मिलित्वा प्राप्तौ । तस्मात् कारणान्न तयोरैक्यमिति भावः । विपक्षे बाधकमाह । ऐक्यं चेदिति । **ऐक्यं चेत्** हरिहरयोरैक्यं चेत् तदा । **शत्रुणा** गुहाख्य-दैत्येन । **जितं** विजितं एकेनावध्यत्वादिति भावः । ॥ ६१ ॥

अर्धनारीश्वरः शंभुर्यथा भेदेऽपि दृश्यते ।
मूर्तेरेकैकभागस्थौ तथा हरिहरावुभौ ॥ ६२ ॥

एकशरीरस्थयोरपि भेदं दृष्टांतमुखेन दर्शयति । **अर्धनारीश्वर** इति । **यथा शंभुः** शिवः । **भेदेऽपि** पतिपत्नीभावात् स्त्रीपुंभावाद्वा स्वस्य स्त्रीसकाशाद्भेदे सत्यपि । **अर्धनारीश्वरः** अर्धे शरीरार्धभागे स्थिता नारी अर्धनारी तस्या ईश्वरः । शरीरार्धभागे स्थिता नारी यस्य सः अर्धनारिः स चासावीश्वर इति वा । तादृशस्सन् नारीभूतार्धशरीरस्सन्नित्यर्थः । **दृश्यते** नारीपुरुषोभयात्मकस्सन्दृश्यते । **तथा उभौ हरिहरौ** । **मूर्तेः** प्रतिमायाः ।

---

* 'अभजद् भुवनप्रभू हरीशौ ।'

—इति सुमध्वविजये (13/44) ।

एकैकभागस्थौ सव्येतरप्रदेशस्थौ दृष्टांतमुखेन दृश्येते । अतः एकमूर्तिगत्वेऽपि न हरिहरयोरैक्यमिति भावः । ॥ ६२ ॥

निर्विषं वत्सनाभिश्च यथैकामाश्रितौ लताम् ।
तथा हरिहरौ भिन्नतरावप्येकमूर्तिगौ ॥ ६३ ॥

पुनरपि तयोर्भेदं दृष्टांतांतरेण साधयति । **निर्विषमिति** । **निर्विषं** विषनिवर्तकौषधविशेषः । **वत्सनाभिश्च** विषभेदश्च । **भिन्नतरावपि यथैकां लतामाश्रितौ** एकस्यां लतायामूर्ध्वाधोभागमाश्रित्य स्थितौ । **तथा हरिहरौ भिन्नतरावपि** निर्विषवत्सनाभिवद्विरुद्धधर्माधिकरणत्वेनात्यंतभिन्नावपि । **एकमूर्तिगौ** एकप्रतिमामाश्रित्य तिष्ठतः । गमेर्डप्रत्ययः । हरिहरयोर्लोकप्रसिद्ध्या पालकत्वसंहर्तृत्वद्योतनाय निर्विषवत्सनाभिदृष्टांतः । ॥६३॥

वेणुपुरस्थः अश्वत्थः

मा याहि पुष्करमहीमथवा प्रयागं
काशीं गयां बदरिकाश्रममत्यसाध्यम् ।
सेतुं च राघवकृतं वरतुंगभद्रा-
तीरस्थपिप्पलगृहं हरिमेहि सिद्ध्यै ॥ ६४ ॥

वेणुपुरस्थाश्वत्थं वर्णयति । **मा याहिति** । [हे तैर्थिकजन] । **सिद्ध्यै** हरिभक्त्यादिसकलपुरुषार्थसिद्ध्यै । **पुष्करमहीं** पुष्करक्षेत्रं **अथवा प्रयागं** प्रयागक्षेत्रं । **काशीं** काशीक्षेत्रं । **गयां** गयाक्षेत्रं । **अत्यसाध्यं** अत्यायासगम्यं । **बदरिकाश्रमम्** । **राघवकृतं** श्रीरामरचितं । **सेतुं च मा याहि** मा गच्छ । तद्यात्रां माकुर्वित्यर्थः । [किंतु] **वरतुंगभद्रातीरस्थपिप्पलगृहं** । वरा श्रेष्ठा तुंगभद्राख्यनदी तस्यास्तीरे तिष्ठतीति वरतुंगभद्रातीरस्थः स चासौ पिप्पलोऽश्वत्थश्च स एव गृहं यस्य स तथोक्तः । अश्वत्थसन्निहित इत्यर्थः तम् । **हरिं एहि** आगच्छ । तद्यात्रां कुर्वित्यर्थः ।

आङ्पुर्वात् इण् गताविति धातोर्लोट् । अत्यायाससाध्यपुष्करादिक्षेत्रयात्रया लभ्यं पुण्यमल्पायाससाध्याश्वत्थसन्निहितहरियात्रया भवतीति भावः । ॥६४॥

पादस्थानल्पपादस्तनुनिहिततनुः कोमलाग्रस्थितास्यः
स्कंधस्कंधोऽग्रशाखास्थितकरनिकरः श्रीधराश्लिष्टपार्श्वः ।
व्याप्याश्वत्थं मुकुंदस्त्रिदशपरिवृतस्तुंगभद्रातिभद्रे
वेणुग्रामे सदाऽऽस्ते सकलजनमनोऽभीष्टदायी दयालुः ॥६५॥

पुनरपि श्लोकत्रयेण अश्वत्थं वर्णयति । **पादस्थेत्यादिना** । **पादस्थानल्पपादः** पादेषु वृक्षमूलेषु स्थिताः अनल्पाः बहवः पादाः हरिचरणाः यस्य सः । **तनुनिहिततनुः** तनौ वृक्षमध्ये निहिता तनुः शरीरं यस्य स तथा । **कोमलाग्रस्थितास्यः** कोमलेषु वृक्षाग्रेषु स्थितानि आस्यानि वदनानि यस्य सः । **स्कंधस्कंधः** स्कंधेषु स्थूलशाखमूलेषु स्कंधाः अंसाः यस्यः सः । **अग्रशाखास्थितकरनिकरः** अग्रासु वृक्षशाखासु स्थिताः करनिकरः हस्तसमूहः यस्य सः । **श्रीधराश्लिष्टपार्श्वः** श्रीश्च धरा च श्रीधरे ताभ्यामाश्लिष्टे पार्श्वे यस्य स तथा । **त्रिदशपरिवृतः** त्रिदशैर्देवैः परिवृतः । **सकलजनमनोऽभीष्टदायी** सकलसज्जनानां मनसोऽभीष्टानि ददातीति तथोक्तः । **दयालुः** दयाशीलः । **मुकुंदः** पुरुषसूक्तप्रतिपाद्यः श्रीनारायणः । **तुंगभद्रातिभद्रे** तुंगभद्रायाः महानद्याः अत्यंतं भद्रे मनोहरे । **वेणुग्रामे** अपभ्रष्टभाषया **बिदरहल्लिसंज्ञिके ग्रामे**। **अश्वत्थं व्याप्य सदा आस्ते** इति संबंधः । यावंतो वृक्षमूलस्कंधशाखादयः तावदवयवैः तं व्याप्य तिष्ठतीति भावः । **स्वभावोक्तिरलंकारः** । ॥ ६५ ॥

***मध्यस्थकृष्ण परिपालय भक्तवर्गं रुद्राश्रिताग्र रुजमर्दय सेवकस्य ।**
पद्मासनावसथमूल सृजास्य तंतुं सद्बंध पिप्पलतरो वितराखिलेष्टम् ६६

---

* मूलतो ब्रह्मरूपाय मध्यतो विष्णुरूपिणे ।
अग्रतः शिवरूपाय वृक्षराजाय ते नमः ॥—इति अश्वत्थमंत्रः ।

मध्यस्थेति । **हे मध्यस्थकृष्ण** मध्ये तिष्ठतीति मध्यस्थः कृष्णः यस्य सः तस्य संबुद्धिः । **मध्यतो विष्णुरूपायेति** स्मृतेः । **भक्तवर्गं** भक्तजनसमूहं । **परिपालय** । विष्णोः पालकत्वादिति भावः । **रुद्राश्रिताग्र** रुद्रेण आश्रितं अग्रं यस्य स तस्य संबुद्धिः । **अग्रतः शिवरूपायेति** स्मृतेः । **सेवकस्य रुजं** रोगं **अर्दय** नाशय । रुद्रस्य संहारहेतुत्वादिति भावः । रुजं द्रावयतीति* व्युत्पत्तेश्च । **पद्मासनावसथमूल** पद्मासनस्य ब्रह्मणः आवसथं निवासस्थानभूतं मूलं यस्य तस्य संबुद्धिः । **मूलतो ब्रह्मरूपायेति** स्मृतेः । **अस्य** सेवकस्य । **तंतुं** संतानं । **सृज** उत्पादय । ब्रह्मणः सृष्टिकर्तृत्वादिति भावः । **सद्वंद्य** सद्भिर्वंद्य । **पिप्पलतरो** हे अश्वत्थवृक्ष । **अखिलेष्टं** सर्वाभीष्टं । **वितर** प्रयच्छ । पिप्पलतरो इति पूर्वोक्तान्वयत्रयेऽपि विशेष्यतया संबंधः । ॥ ६६ ॥

तुंगातरंगपरिनर्तनपूतवात-
संगेन तेंऽघ्रिप दलानि चलंति भांति ।
जन्मांतरोत्थदृढमूलदुरंतदुष्कृ-
त्युन्मूलनोद्यतकरांगुलिकांतिमंति ॥ ६७ ॥

तुंगेति । **हे अंघ्रिप** अश्वत्थवृक्ष । **तुंगातरंगपरिनर्तनपूतवातसंगेन** तुंगायास्तरंगेषु परितो नर्तनेन पूतो वातस्तस्य संगेन । **चलंति** इतस्ततो गच्छंति । **ते दलानि** । **जन्मांतरोत्थदृढमूलदुरंतदुष्कृत्यन्मूलनोद्यतकरांगुलिकांतिमंति** जन्मान्तरोत्थाः दृढमूलाः दुरंताः याः दुष्कृतयः स्वभक्तदुष्कर्माणि तासां उन्मूलने उत्पाटने उद्यतानां करांगुलीनां कांतिर्येषु वर्तते इति तथोक्तानि । **भांति** विराजंते । यथा दृढतरोरुत्पाटनाय तद्ग्राहिस्वहस्तांगुलिमितस्ततश्चालयति तथा त्वमपि स्वहस्तस्थानीयशाखाग्रस्थितानि अंगुलीयस्थानोयपत्राणि चालयसीत्युपमागर्भोत्प्रेक्षालंकारः । जन्मांतरीयदृढपापान्यपि तव प्रदक्षिणादिना नश्यंतीति भावः ॥ ६७ ॥

---

* 'रुजं द्रावयते यस्मात्' इति ब्र. सू. भा. (1/3/3) वचनात् ।

वेणुपुरस्थः सोमेश्वरः

सोमेश्वराय सितभूतिविकस्वराय प्रेमप्रवृद्धगिरिजाहृदि भास्वराय ।
तुंगोल्लसत्पवनपावितवंशपल्लीमांगल्यहेतुचरिताय नमःशिवाय ॥६८॥

तत्रत्यं सोमेश्वरं स्तौति । **सोमेश्वरायेति** । **सितभूतिविकस्वराय** सितया भूत्या भस्मना विकस्वराय विकसनशीलाय । **प्रेमप्रवृद्धगिरिजाहृदि** प्रेम्णा प्रवृद्धं प्रेमप्रवृद्धम् । तच्च तत् गिरिजायाः पार्वत्याः हृच्च तस्मिन् । **भास्वराय** भासनशीलाय । [1]स्थेशभासेत्यादिना वरच् प्रत्ययः । **तुंगोल्लसत्पवनपावितवंशपल्लीमांगल्यहेतुचरिताय** । तुंगायाः उल्लसत्पवनेन पावितायाः वंशपल्याः बिदरहळ्ळीनामकग्रामस्य । मांगल्यहेतुः मांगल्यकारणं चरितं यस्य स तथा तस्मै । **सोमेश्वराय शिवाय नमः** इति संबंधः । **अंते शिवमंत्रभूतनमःशिवायेति[2] पंचाक्षरीगर्भितमिदं पद्यम्** । ॥ ६८ ॥

बंकापुरस्थः केशवः

शंखांभोजगदासुदर्शनधरं संकीर्त्यमानं सुरैः
कैंकर्यप्रियलक्ष्मणेंद्ररचितालंकारपूजोत्सवम् ।
पंकोद्भूतसमानलोचनयुगं बंकापुरश्रीकरं
हुंकारध्वनिधिक्कृताश्रितजनातंकं भजे केशवम् ॥६९॥

बंकापुरस्थं केशवं वर्णयति । **शंखेति** । **शंखांभोजगदासुदर्शनधरं** दक्षिणोर्ध्वकरे शंखः । तदधःकरे पद्मं । वामाधःकरे गदा । तदूर्ध्वकरे सुदर्शनमिति विवेकः । अनेन केशवमूर्तिलक्षण[3]मुक्तं भवति ।

---

[1] (पा. सू. 3/2/175) ।

[2] उद्देशनतियुङ्मंत्रः स्वयमेव शिवस्य तु ।

—इति तंत्रसारसङ्ग्रहे (4/73) ।

[3] केशवो मधुसूदनः संकर्षणदामोदरौ ।
सवासुदेवप्रद्युम्ना दक्षोच्च(र्ध्व)करशंखिनः ॥

—इति तंत्रसारसङ्ग्रहे (I. 2८) ।

सुरैः ब्रह्मादिदेवैः । **संकीर्त्यमानं** सम्यक् स्तूयमानं । कृत संशब्दन इति धातोर्ण्यत् । प्रत्ययः लटः शानजादेशः । **कैंकर्यप्रियलक्ष्मणेंद्ररचितालंकारपूजोत्सवं** किंकरस्य भावः कैंकर्यं । तदेव प्रियं प्रीतिविषयः यस्य स तथोक्तः । स चासौ लक्ष्मणेंद्रश्च तेन रचितः कृतः । अलंकारपूजोत्सवः यस्य स तथा तम् । **पंकोद्भूतसमानलोचनयुगं** पंकोद्भूतस्य पंकजस्य समानं सदृशं लोचनयुगं यस्य स तथा तम् । **बंकापुरश्रीकरं** बंकाख्यनगरस्य संपत्करं । **हुंकारध्वनिधिक्कृताश्रितजनातंकं** हुंकारध्वनिना धिक्कृतः निराकृतः आश्रितजनातंकः भक्तजनभयं येन स तथा तम् । **केशवं** । अहं **भजे** सेवे । ॥ ६९ ॥

वरदानदी

स्मरदाश्रितदुष्कर्मगुरुदाहविदारिणीम् ।
वरदां हरिदासेष्टवरदानरतां भजे ॥ ७० ॥

वरदानदीं वर्णयति । **स्मरदाश्रितसत्कर्मगुरुदाहविदारिणीं** स्मरंतश्च आश्रिताश्चेति वा । तेषां दुष्कर्माण्येव गुरुदाहस्तीव्रसंतापः । तं विदारयतीति तथोक्ता ताम् । जलस्य दाहनिवर्तकत्वादिति भावः । **हरिदासेष्टवरदानरतां** हरिदासानां इष्टवरदाने रता ताम्, अत एव । **वरदां** वरदानाम्नीं अहं **भजे** । ॥ ८० ॥

वरदातीरस्थ मधुलिंगम्

हर सायकनिर्दग्धपुर गायकधूर्धर ।
सुरनायक दैत्येंद्रवरदायक पाहि माम् ॥ ७१ ॥

वरदातीरस्थं मधुलिंगं वर्णयति । **हर** इति । **सायकनिर्दग्धपुर**

केशवस्याम्बुजं शंखं चक्रं दण्डस्तथाऽऽयुधम् ।

—इति पञ्चरात्रे ।

'श्रीमत्पङ्कजशंखचक्रगदया सम्भूषिते केशवे ।'

—इति श्रीवादिराजश्रीचरणरचित केशवादिचतुर्विंशतिमूर्तिस्तुतौ ।

सायकेन नितरां दग्धानि पुराणि येन सः, तस्य संबुद्धिः । **गायकधूर्धर** गायकानां भक्तानाम् । धुरं धारयतीति तथोक्तः तस्य संबुद्धिः । **दैत्येंद्र-वरदायक** दैत्येंद्रस्य मधुनायकदैत्यश्रेष्ठस्य वरदायकस्तस्य संबुद्धिः । **सुर-नायक** सुराणां इंद्रादिदेवानां । नायकः श्रेष्ठः । तस्य संबुद्धिः । **हे हर** शंभो । **मां पाहि** । इति संबंधः । ॥ ७१ ॥

धर्मगङ्गा

हे धर्मगंगे पापौघभंगे तुङ्गतरंगिणि ।
चेतो मदीयं सद्धर्मकर्मण्येव स्थिरं कुरु ॥ ७२ ॥

धर्मगंगां स्तौति । **हे धर्मगंग** इति । **पापौघभंगे** पापानां ओघानां भंगो नाशो यया स तस्याः संबुद्धिः । **तुंगतरंगिणि** तुंगास्तरंगाः अस्या वर्तंत इति तुंगतरगिणी तस्याः संबुद्धिः । **हे धर्मगंगे** धर्मनदि गंगासां-निध्याद्गंगेत्युक्तं । **मदीयं** मम विद्यमानम् । **चेतः** मनः । **सद्धर्मकर्मण्येव** संतश्च ते धर्माश्च सद्धर्माः तेषां कर्म तस्मिन्नेव । **स्थिरं कुरु** । इति संबंधः । धर्मगंगापदेन धर्मे स्थिरीकरणशक्तिरस्तीति सूचनाय **हेतुमदलंकारः** ॥

शाल्मलीनदी

नदी मुदेऽस्त्वियं प्रत्यङ्नदीनहृदयंगमा ।
गंगोत्तुंगा दृश्यतेऽद्धा रम्याऽष्टम्यां यदंभसि ॥ ७३ ॥

इदानीं पश्चिमसमुद्रगामिनीं शाल्मलीनदीं स्तौति । **नदीति** । **प्रत्यङ्नदीनहृदयंगमा** नदीनामिनः स्वामी नदीनः समुद्रः । प्रत्यङ् चासौ नदीनश्च प्रत्यङ्नदीनः । पश्चिमसमुद्रः । तस्य हृदयंगमा प्रिया । इयं शाल्मलीति संज्ञिता । **नदी** । **मुदे** संतोषाय । **अस्तु** । **यदंभसि** यस्याः **अंभसि** उदके । **रम्या** मनोहरा । **उत्तुंगा गंगा** भागीरथी । **अष्टम्यां** गंगाष्टमीति संज्ञितायां अष्टमीतिथौ । **अद्धा** प्रत्यक्षतयैव **दृश्यते** । गोकर्णक्षेत्रसमीपे समुद्रसंगमस्थले लवणजलभरितेऽप्येतस्मिन्नदीजले भाद्रपद-

शुद्धाष्टम्यां गंगा आयातीति **पौराणिकीकथा** । तदा लवणजलमध्ये स्वादु गंगोदकं दृश्यते किल । तदिदमुक्तमुत्तरार्धेन । ॥ ७३ ॥

भर्तुरग्रे स्वलावण्यविस्तृतेरविवेकिनीम् ।
स्वासेवितां सखीमेतां सर्वसेव्यां करोति सा ॥ ७४ ॥

प्रकारांतरेणापि तामेव वर्णयति । **भर्तुरिति** । **भर्तुः** समुद्रस्य । **अग्रे स्वलावण्यविस्तृतेः** स्वस्मिन् स्वसंबंधिजले यल्लावण्यं समुद्रसंगमेन जातो-लवणभावः । तस्य विस्तृतेः विस्तारात् । **अविवेकिनीं** इदं नदीजलमिदं समुद्रजलमिति विवेचयितुं अशक्यां । अत एव **स्वासेवितां** स्वैः स्वकीयैः । स्नानपानादिना असेवितां अपूज्यां । **सखीं** सपत्नीत्वेन प्रेयसीं एतां नदीं । **सा** पूर्वोक्ता भागीरथी । **सर्वसेव्यां** अष्टमीदिने सर्वैः स्नानपानादिना सेव्यां । **करोति** । 'आत्मीयज्ञातिधनवाची' स्वशब्द इति स्वीयार्थेऽपि स्वशब्दः । इति नदीनां स्वभाववर्णनं । भर्तुरग्रे स्वसौंदर्यविस्तारेण गर्ववतीयमिति स्वभर्तृबंधुभिश्चोपेक्षितां विवेकशून्यां कांचन नारीं तस्याः बुद्धिमती सखी स्वयमेवागत्य प्रियोक्त्यादिना **भर्त्रा** अन्यैश्च सत्कृतां यथा करोति तथेति ध्वनितोऽर्थः । ॥ ७४ ॥

सोदाग्रामस्थः त्रिविक्रमः

गंगा माध्वयतेः कीर्त्यै स्थानश्रीभूमनोहरम् ।
कृत्वा त्रिविक्रमं चक्रे पितृमात्रग्रजोत्सवम् ॥ ७५ ॥

सोदाग्रामे वादिराजमुनिना स्वेनैव देवालयतटाकादिनिर्माणादिना पूजितस्य तस्यैवोपरि कृपया गंगातीरादागतस्य त्रिविक्रमस्य वर्णनं करोति । **गंगेति** । **गंगा** भागीरथी । **माध्वयतेः** मध्वमुनिसंबंधिनो वादिराजयतेः । **कीर्त्यै** । स्वप्रेषितं **त्रिविक्रमं** । **स्थानश्रीभूमनोहरं** स्थानश्रियः देवालय-सम्पदः भुवः निवासभूम्याश्च । मनोहरं मनःप्रियं । **कृत्वा** स्वयोग्य-

देवालयश्रीभूम्योरुभयोरपि प्रीतिं कृत्वेत्यर्थः । **पितृमात्रग्रजोत्सवं** पितुः स्वांगुष्ठनखात् स्वजनकस्य त्रिविक्रमस्य । मात्रोः मातृस्थानीययोः पितृपत्न्योः श्रीभूम्योः अग्रजस्य स्वजन्मनः पूर्वं स्वनखाग्रादपि अग्रभागस्थनाभिकमलाद्युत्पन्नत्वेन द्वेधाऽप्यग्रजस्य वायुरूपमध्वस्य च उत्सवं संभ्रमं **चक्रे** इति संबंधः । स्वभक्तप्रियस्य प्रीतिकरणात् गंगापित्रोरेव स्वपितृत्वात् स्वपितृमातृप्रीतिकरणात् मध्वस्योत्सवः । स्वपुत्रस्य मनःप्रीतिकरणात् श्रीभूम्योः । स्वपत्नीसंयोगकरणात् स्वभक्तप्रीतिकरणाच्च स्वपितुरिति त्रेधाविभागो द्रष्टव्यः । **उत्प्रेक्षालंकारः । अद्भुतोऽयं रसः ।** ॥ ७५ ॥

त्रिविक्रमं रम्यगदारिशंखसरोजमालाधरमिंदुवर्णम् ।
मनोहरांगं यतिवादिराजप्रतिष्ठितं नौमि सदा प्रसन्नम् ॥७६॥

पुनरपि त्रिविक्रमं वर्णयति। **त्रिविक्रमेति । रम्यगदारिशंखसरोज-मालाधरं** गदा च अरिश्च शंखं च सरोजं च माला चेति द्वंद्वः। रम्यास्ताः दक्षोर्ध्वादिहस्तचतुष्टयेन धरतीति तथोक्तः । पद्मधारिहस्ताग्रे माला तिष्ठतीति भावः । **इंदुवर्णं** इंदोर्वर्ण इव वर्णो यस्य स तथा तम् । बहुमाणिक्यशिलारूपत्वतोऽतिधवलत्वादेवमुक्तं । **मनोहरांगं** मनोहराणि अंगानि हस्तपादादीनि यस्य स तथा तम् । **यतिवादिराजप्रतिष्ठितं** देवालयनिर्माणेन स्थापितम् । **सदाप्रसन्नं** सदाप्रसादाभिमुखम् । **त्रिविक्रमं नौमि** इति संबंधः । ॥ ७६ ॥

मंजुगुणिग्रामस्थो वेंकटेशः

मनोहरगिरिद्रोणीवासं श्रीशं सतां वशम् ।
धनुर्बाणधरं भाग्यकरं पापहरं भजे ॥ ७७ ॥

मंजुगुणिग्रामस्थं वेंकटपतिं स्तौति । **मनोहरेति । मनोहरगिरिद्रोणीवासं** मनोहरगिरिद्रोण्यां मंजुगुणिग्रामस्थरम्यपर्वतगुहायां वासो यस्य स तथा तम् । तत्स्थलस्य मनोहरत्वादेव वासः । अन्यथा पादुकाशोभि-

पादत्वात् गमनमेव न संभावितमिति भावः । **धनुर्बाणधरं** इति ध्यानम् । एतच्चोपलक्षणम् । चक्रशंखावपि ग्राह्यौ । प्रसिद्धत्वात् तदनुक्तिः । **भाग्यकरं पापहरं** । **सतां** सज्जनानां । **वशं** अधीनं । **श्रीशं** लक्ष्मीरमणं वेंकटपतिं । अहं **भजे** सेवे । **स्वभावोक्तिरलंकारः** । ॥ ७७ ॥

खलमृगमृगयार्थं पादुकाशोभिपादः
करधृतशरचक्रोद्दामशंखाग्र्यचापः ।
सकलभुवि चरित्वा मंजुगुण्याख्यरम्य-
स्थलसदनगतोऽभूद्वेंकटेशो मुकुंदः ॥ ७८ ॥

पुनरपि मूर्तिध्यानपूर्वकं तमेव स्तौति । **खलमृगेति** । **पादुकाशोभिपादः** पादुकाभ्यां शोभितौ पादौ यस्य स तथा । **करधृतशरचक्रोद्दामशंखाग्र्यचापः** । करैर्धृताः शरः चक्रं उद्दामशंखः अग्र्यचापश्च येन स तथोक्तः । **वेंकटेशो मुकुंदः** । **खलमृगमृगयार्थं** । **सकलभुवि** समस्तभूम्यां । **चरित्वा** । संचारं कृत्वा । **मंजुगुण्याख्यरम्यस्थलसदनगतः** । मंजुगुण्याख्यरम्यस्थले यत्सदनं मंदिरं तत्र गतः स्थितः **अभूत्** । इति संबंधः । ॥ ७८ ॥

एणभैरवक्षेत्रस्थो भैरवः

यस्य भैरवनादेन विद्रवंत्यघराशयः ।
एणा इव भयान्नित्यं तं नतोऽस्म्येणभैरवम् ॥ ७९ ॥

गोकर्णपूर्वभागे सह्याचलशृंगे एणभैरवाख्यं पुण्यक्षेत्रमस्ति । तदधिपतिं भैरवं स्तौति । **यस्येति** । **यस्य भैरवनादेन** भयंकरगर्जितध्वनिना **अघराशयः** पापसमूहाः **भयान्नित्यं** । **एणा इव** कृष्णमृगा इव । **विद्रवंति** । अत एव । **एणभैरवं** एणभैरवनामकं । **तं** भैरवं **नतोऽस्मि** । इति संबंधः । ॥ ७९ ॥

गोकर्णस्थः शिवः

ये विष्णोः पदपद्मचिंतनरतास्तत्कर्मनिष्ठाश्च ये
ये तद्भक्तपरायणाः शुभधियो येऽर्चंति मां चानिशम् ।
एकांते तदभीष्टमाशु वसुधे देहीति गां बोधयन्
श्रीगोकर्णकृतालयो विजयते देवः स गौरीधवः ॥ ८० ॥

गोकर्णस्थितं शिवं वर्णयति । **य इति ये** जनाः । **विष्णोः** । **पदपद्मचिंतनरताः** पादारविंदस्मरणासक्ताः । **तत्कर्मनिष्ठाः** तस्य विष्णोः कर्मणि पूजारूपकर्मणि निष्ठाः आसक्ताः । **ये** जनाः । **तद्भक्तपरायणाः** विष्णुभक्ताश्रयाः **ये शुभधियः** जनाः । **मां च** मामपि । **अनिशं** । **अर्चंति** विष्णुभक्तत्वेन पूजयंति । अर्च पूजायामिति धातोर्लट् । **हे वसुधे** वसुंधरे । **तदभिष्टं** तेषां पूर्वोक्तविष्णुपदचिंतनादिगुणयुक्तानां । अभीष्टं मनोरथं । **आशु** शीघ्रं । **देहि** दिश । दिश अतिसर्जन इति धातोर्लोट् । **इति** **एकांते** रहसि । प्रकाशतया कथने स्वस्य शैवमतप्रवर्तकत्वेन मूर्खाणां शैवमते प्रवृत्तिर्न स्यादिति भावः । **गां** भूमिं । **बोधयन्** उपदिशन् । बुध ज्ञान इति धातोर्णिजंताच्छत्रादेशः । **श्रीगोकर्णकृतालयः** भूमेः कर्णस्थाने गोकर्णाख्यक्षेत्रे कृतावास इत्यर्थः । एकांतोक्तेः कर्णप्रदेश एवोचितत्वादिति भावः । **गौरीधवः** पार्वतीपतिः । धवः प्रियः पतिर्भर्तेत्यमरः । **स देवः** शिवः **विजयते** उत्कृष्टो वर्तते । वि पूर्वाज्जि जय इति धातोः *विपराभ्यां जेरित्यात्मने पदे लट् । यथा कस्यचिदेकांते बोधयन् पुरुषः दूरे स्थित्वा बोध्यते चेत्, अन्येषां श्रवणं स्यादिति भीत्या कर्णसमीप एव स्थित्वा बोधयति तथैवैष महादेवोऽप्यन्येषामनधिकारिणां श्रवणं स्यादिति भयेन गोकर्णशब्दवाच्यायाः भूमेः कर्णसमीप एव कृतालयस्सन्नुपदिशतीति भावः । **उत्प्रेक्षालंकारः** । ॥ ८० ॥

---

* विपराभ्यां जेः । (पा. सू. 1/3/19) ।

गोकर्णभासितांगः प्रत्युपकुर्वन्निवांबिकारमणः ।
गोकर्णसंज्ञमधुना भासयति क्षेत्रमंबुधेस्तीरे ॥ ८१ ॥

गोकर्णेति । गोकर्णभासितांगः गौः नेत्रमेवश्रवणं येषां ते गोकर्णाः सर्पाः । "स्वर्गेषु पशुवाग्वज्रदिङ्नेत्रघृणिभूजले । लक्ष्यदृष्ट्या स्त्रियां पुंसि गौ"रिति । कर्णशब्दग्रहौ श्रोत्रमिति च । "कुंडली गूढपाच्चक्षुंश्रवाः काकोदरः फणीति" चामरः । तैर्भासितान्यंगानि यस्य स तथोक्तः । सर्पाभरणत्वादिति भावः । **अंबिकारमणः** पार्वतीपतिः रुद्रः । 'अपर्णा पार्वती दुर्गा मृडानी चंडिकांऽबिके'त्यमरः । **अधुना प्रत्युपकुर्वन्निव** गोकर्णतो भासनलक्षणमुपकारं प्राप्तः स्वयं च तद्गोकर्णस्य भासनलक्षणं प्रत्युपकारं कुर्वन्निव । **अंबुधेः** समुद्रस्य । **तीरे गोकर्णसंज्ञं** गोकर्ण इति संज्ञा यस्य तत् । **क्षेत्रं भासयति** । प्रकाशयति । भास दीप्तावित्यस्माद्धातोर्णिजंताल्लट् । गोकर्णभासितः स्वयमपि गोकर्णं भासयतीति **श्लेषोज्जीवितेयमुत्प्रेक्षा** । **आर्यावृत्तमिदं पद्यम्** । ॥ ८१ ॥

पूर्णेंदुवर्ण गोकर्णाकार मारभयंकर ।
भवाय भव मे देव भवानीप्रिय शंकर ॥ ८२ ॥

तमेव वर्णयति । **पूर्णेंदुवर्ण** पूर्णेंदोरिव वर्णो यस्य स तथा तस्य संबुद्धिः । **गोकर्णाकार** गोः धेनोः कर्णवदाकारो यस्य तस्य संबुद्धिः । **मारभयंकर** मारस्य मन्मथस्य भयंकरः तस्य संबुद्धिः । **भवानीप्रिय** भवान्याः पार्वत्याः प्रिय । **हे शंकर** । **देव** त्वम् । **मे भवाय** मंगलाय । **भव** । भू सत्तायामिति धातोर्लोट् । ॥ ८२ ॥

गोकर्णस्थो विघ्नेश्वरः

दुष्टानां विघ्नकर्ता सुचरितसुजनस्तोमविघ्नापहर्ता
तस्माद्विघ्नाधिपोऽहं मत इति सुधियां स्पष्टमाज्ञापनाय ।
पौलस्त्येच्छांतरायः सुरमुनिनिकराभीष्टसंप्राप्त्युपायः
श्रेयो विघ्नाधिराजः प्रदिशतु सततं भूरि गौरीतनूजः ॥ ८३ ॥

अथ तत्समीपस्थं विघ्नेश्वरं वर्णयति । **दुष्टनामिति** । [यतः] **अहं दुष्टानां** दुर्जनानां **विघ्नकर्ता** तन्मनोरथहंतेत्यर्थः । नित्यसापेक्षत्वात् समासः । [1]तृजकाभ्यां कर्तरीति षष्ठीसमासनिषेधाच्छेषषष्ठ्या समासो बोध्यः । **सुचरितसुजनस्तोमविघ्नापहर्ता** शोभनं चरितं येषां ते सुचरिताः पुण्यकर्माणः ते च ते सुजनाश्च । तेषां स्तोमः समूहः । तस्य विघ्नापहर्ता । सुजनेष्टांतरायपरिहर्तेत्यर्थः । **तस्माद्विघ्नाधिपः** विघ्नेश इति । **मतः** प्रसिद्धः । यो यत् स्वेच्छयैव ददाति स्वेच्छयैव न ददाति च स तदधिपः । अहं च स्वेच्छयैव विघ्नान् ददामि न ददामि च । अतश्च विघ्नाधिप इति भावः । **इति सुधियां** ज्ञानिनां । [2]न भू सुधियोरिति यण्निषेधः । सुधीः कोविदो बुध इत्यमरः । **स्पष्टं** यथा भवति तथा । **आज्ञापनाय** सम्यक् प्रदर्शनाय । **पौलस्त्येच्छांतरायः** पौलस्त्यस्य पुलस्त्यकुलोत्पन्नस्य रावणस्य इच्छायाः ईश्वरदत्तलिंगं स्वपुरं प्रति नेष्यामीत्येवंरूपायाः इच्छायाः अंतरायो विघ्नो यस्मात् स तथोक्तः । **सुरमुनिनिकराभीष्टसंप्राप्त्युपायः** सुराश्च मुनयश्च सुरमुनयः तेषां निकरस्य समूहस्य यदभीष्टं तस्य संप्राप्तौ उपायस्थानीभूतः । एतादृशः **गौरीतनूजः** पार्वतीपुत्रः । **विघ्नाधिराजः** अधिकश्चासौ राजा च अधिराजः । विघ्ननामधिराजः । [3]राजाहःसखिभ्यष्टच् । **भूरि** बहु । **श्रेयः** पुण्यं । **सततं प्रदिशतु** दद्यात् । दिश अतिसर्जन इति धातोर्लोट् । **पुरा** किल रावणतपसा प्रसन्नश्शिवः स्वसन्निधानयुक्तलिंगं दत्वा एतल्लिंगं यावत्कालपर्यंतं भवद्गृहे तिष्ठति तावत्कालपर्यंतं त्वां न कोपि जेष्यति । लिंगं तु त्वया मार्गे न स्थापनीयं । स्थापितं चेत् पुनर्नेतुं न शक्यमित्युक्त्वा दत्तवान् । रावणोऽपि लिंगं गृहीत्वा गच्छन्

---

[1] तृजकाभ्यां कर्तरि (पा. सू. 2/2/15)
[2] न भूसुधियोः (पा. सू. 6/4/85)
[3] राजाहःसखिभ्यष्टच् पा. सू. (5/4/91)

गोकर्णे मूत्रपीडितस्सन् विघ्नेश्वरहस्ते तल्लिंगं दत्वा मूत्रोत्सर्जनार्थं गतः । ततो भविष्यद्देवताकार्यं विजानता विघ्नेश्वरेण हस्तगतं लिंगं भूमौ निक्षिप्तमिति **पौराणिककथा**प्रमाणकोऽयं श्लोकार्थः । ॥ ८३ ॥

कोह्लापुरस्था लक्ष्मीः

अमानवनजस्थानसरसीकुलसंकुले ।
रमा कोह्लापुरक्षेत्रे वसतीति किमद्भुतम् ॥ ८४ ॥

कोह्लापुरस्थां लक्ष्मीं वर्णयति । **अमानेति** । **अमानवनजस्थान-सरसीकुलसंकुले** न विद्यते मानं मितिर्येषां तानि अमानानि । अरिपमिता-नीत्यर्थः । वनजानि कमलानि तेषां स्थानानि आवासभूतानि । सरसी-कलानि सरोवरसमूहाः । तैः संकुले संकीर्णे । **कोह्लापुरक्षेत्रे रमा** लक्ष्मीः । **वसतीति किमद्भुतं** किमाश्चर्यं । कमलायाः कमलवति स्थले निवास-स्थानाश्चर्यतमत्वादिति भावः । ॥ ८४ ॥

ध्याताऽऽध्यातांतशांतप्रियजनविभवायान्वहं या हृदंतः
ख्याताख्याताद्दशाभ्युन्नतिवितरणशक्त्यालया या पयोब्धेः ।
जाताऽजातादिदेवव्रजमनुजततेः श्रेयसे भूयसे सा
माता मातापासाराधितपदकमलाऽधोक्षजप्रेयसी स्यात् ॥ ८५ ॥

तामेव वर्णयति । **ध्यातेति** । **आध्यातांतशांतप्रियजनविभवाय** आधिर्मानसी व्यथा । पुंस्याधिर्मानसी व्यथेत्यमरः । तेन आतांताः संतप्ताः । शांताः ज्ञानिनः शांतियुक्ता वा । प्रियजनाः भक्तजनाः । तेषां विभवाय संपदे । **या हृदंतः** हृन्मध्ये । **अन्वहं** प्रतिदिनं । **ध्याता** । **ख्याताख्या** ख्याता प्रसिद्धा आख्या लक्ष्मीः श्रीर्भूर्मंगलदेवतेत्यादिरूपा अभिधा यस्यास्सा तथोक्ता । अत एव **या तादृशाभ्युन्नतिवितरणशक्त्या-लया** तादृशाभ्युन्नतिः स्वनामसदृशाभिवृद्धिः । तस्याः वितरणशक्तिः प्रति-पादनसामर्थ्यं । तस्याः आलया । स्वनामसदृशैश्वर्यप्रदेत्यर्थः । **या पयोब्धेः**

क्षीरसमुद्रात् । **जाता** । **या अजातादिदेवव्रजमनुजततेः** अः परमात्मा तस्माज्जयत इति अजातः चतुर्मुखः । स एव आदिर्येषां ते तेषां व्रजः समूहः । तेन सहिता मनुजततिः मनुष्यसमूहः । शाकपार्थिवादिवत्समासः । तस्याः । **माता** देवमनुष्यादिसकललोकमातेत्यर्थः । इंदिरा लोकमाता मेत्यमरोक्तेः । **या तापसाराधितपदकमला** तापसैः तपस्विभिः । ज्ञानिभिर्ब्रह्मादिभिर्वा । आराधितं पदकमलं पादपद्मं यस्यास्सा तथोक्ता । **या अधोक्षजप्रेयसी** अधोक्षजस्य नारायणस्य । प्रेयसी प्रियतमा । तापसाराधितपदकमलाधोक्षजप्रेयसीत्येकं पदं वा । **सा मा** महालक्ष्मीः । **भूयसे** बहुतराय । **श्रेयसे** संपदे **स्यात्** भूयांसि श्रेयांसि दद्यादिति भावः । **यमकालंकारः** । [1]**यमकालंकारलक्षणं तु रुग्मणीशविजयव्याख्याने विवृत्तमस्माभिः** । ॥ ८५ ॥

तापाख्या नदी

कथं तापाभिधा तेंऽब तापघ्न्या इति संशयः ।
अघतापप्रदायिन्यास्तव संदर्शनाद्धृतः ॥ ८६ ॥

तापाख्यां नदीं वर्णयति । **कथ**मिति **हे अंब** मातः । [2]अंबार्थनद्योर्ह्रस्व इति ह्रस्वः । अंबा सवित्री जननी च मातेति हलः । **तापघ्न्याः**

---

1 "यमकलक्षणं तु दण्डिनोक्तम्-

अव्यपेतव्यपेतात्मा व्याहृतिर्वर्णसंहतेः ।
यमकं तच्च पादानामादिमध्यांतगोचरम् ॥
एकद्वित्रिचतुष्पादयमकानां विकल्पना ।
आदिमध्यांतमध्यांतमध्याद्यांतसर्वतः ॥
अत्यंतबहवस्तेषां भेदाः संभेदयोनयः ।
सुकरा दुष्कराश्चैव वर्ण्यंते तत्र केचन ।" इति ।

—इति च रुग्मणीशविजयव्याख्यानवचनम् (IV. 53)

2 अम्बार्थनद्योर्ह्रस्वः । (पा. सू. 7/3/107)

स्नानपानादिना संतापहर्त्र्याः । **ते** तव । **तापाभिधा** तापेति नाम । **कथं** घटते । **इति संशयः** । तापेति लोकप्रसिद्धिः संतापहर्तृत्वं च संदेहबीजमिति भावः । **अघतापप्रदायिन्याः** अघानां पापानां तापप्रदायिन्याः । **तव संदर्शनात्** निरीक्षणात् । **गतः** नष्टः । अस्मत्संतापहर्त्र्या अपि पापसंतापहेतुत्वात् तापेत्यभिधानं घटत इति निश्चीयत इति भावः । दर्शनमात्रेण सकलपापहंत्री तापानदीति तात्पर्यार्थः । ॥ ८६ ॥

नर्मदानदी

स्वावगाहनमात्रेण या स्वर्गवनिताजनैः ।
सह नर्मगिरां दात्री भजे तां नर्मदानदीम्[1] ॥ ८७ ॥

नर्मदानदीं वर्णयति । **स्वावगाहनेति** । **या** नर्मदा । **स्वावगाहनमात्रेण** । **स्वर्गवनिताजनैः सह** स्वर्गस्थाप्सरोजनैः सह । **नर्मगिरां** विलासवचनानां । क्रीडा लीला च नर्म चेत्यमरः । **दात्री** । [2]कर्तृकर्मणोः कृतीति षष्ठी । **तां नर्मदानदीं** अहं **भजे** । ॥ ८७ ॥

---

[1] त्रैलोक्ये यानि तीर्थानि पुण्यान्यायतनानि च ।
सरिद्भनानि शैलेंद्रा देवाश्च सपितामहाः ॥
नर्मदायां कुरुश्रेष्ठ सह सिद्धर्षिचारणैः ।
स्नातुमायांति पुण्यौघैः सदा वारिषु भारत ॥
—इति महाभारते (III 89/3–4)

सद्यः पुनाति गांगेयं दर्शनादेव नार्मदम् ।
—इति पद्मपुराणे ।

नर्मदातीरसंजाताः सरलार्जुनपादपाः ।
नर्मदातोयसंस्पर्शात् ते यांति परमां गतिम् ।
नर्मदायां महाविष्णुं चतुर्बाहुं नृपोत्तम ।
—इति स्मृतिमुक्तावल्युद्धृत ब्रह्माण्डपुराणे ।

'कालिंद्यूना ततोऽधमा । नर्मदासिंधुसरितौ तत्समा— ।
—इति श्रीराघवेंद्रतीर्थकृत नदीतारतम्यस्तोत्रे ।

[2] 'कर्तृकर्मणोः कृति' । (पा. सू. 2/3/65)

प्रभासक्षेत्रम्

सरस्वतीहिरण्याभ्यां संगो यत्रापरांबुधेः ।
प्रभासाख्यं तदाभाति प्रभाऽऽस हि यतो भुवः ॥ ८८ ॥

प्रभासक्षेत्रं वर्णयति । **सरस्वतीति** । **यत्र** क्षेत्रे **अपरांबुधेः** पश्चिमसमुद्रस्य । **सरस्वतीहिरण्याभ्यां** नदीभ्यां सह । **संगः** संबंधो जातः । **तत् प्रभासाख्यं** क्षेत्रं । **आभाति** । भा दीप्ताविति धातोर्लट् । एतस्य प्रभासत्वं निर्वक्ति । **यतः** प्रभासक्षेत्रात् । **भुवः** भूमेः । **प्रभा** कांतिः । **आस** बभूव **हि** । अत एतस्य क्षेत्रस्य प्रभासत्वमित्यर्थः । भूमेः शोभाजनकमिदं क्षेत्रमिति भावः । आसोक्ति तिङंतप्रतिरूपकमव्ययम् । अन्यथा *अस्तेर्भूरिति भ्वादेशे बभूवेति स्यात् । ॥ ८८ ॥

प्रभासस्था वाणगंगा

बाणप्रयोगसंजाता बाणगंगा विभाति सा ।
स्वच्छा स्मरदघच्छेत्री कृष्णकीर्तिरिवोन्मुखी ॥ ८९ ॥

बाणगंगां वर्णयति । **बाणेति** । **या** नदी । **बाणप्रयोगसंजाता** बाणप्रयोगेण श्रीकृष्णकृतबाणप्रयोगेण संजाता समुत्पन्ना । **स्वच्छा** निर्मला । **स्मरदघच्छेत्री** स्मरतां अघच्छेत्री तापपरिहर्त्री । **उन्मुखी** ऊर्ध्वमुखी भूमिं निर्भिद्योर्ध्वं गच्छंतीत्यर्थः । **सा बाणगंगा** । **कृष्णकीर्तिरिव विभाति** । कीर्तिरपि शत्रुषु बाणप्रयोगेण संजायते । स्वच्छेत्यादिविशेषणानि कीर्ति-पक्षेऽपि योज्यानि । ॥ ८९ ॥

द्वारकाक्षेत्रम्

विश्वंभरां घनतरामपि भूरियत्नैर्निर्भिद्य यत्पदमुपेत्य बलींद्रगेहात् ।
आस्ते त्रिविक्रमतनुर्हरिरद्वितीया सा द्वारकेप्सितपुमर्थकरी पुरी नः ॥

---

* अस्तेर्भूः (पा. सू. 2/4/52)

द्वारकां वर्णयति । **विश्वंभरामिति** । **त्रिविक्रमतनुः** त्रिविक्रममूर्तिः । **हरिः** । **घनतरामपि** अत्यंतनिबिडामपि । **विश्वंभरां** भूमिं । "कुः पृथ्वी पृथिवी स्थिरा च धरिणी विश्वंभरा मेदिनी" ति हलायुधः । **भूरियत्नैः** मुसलप्रहारादिबहुलप्रयत्नैः । **निर्भिद्य** भित्वा । **बलींद्रगेहात्** महाबलिगृहात् । **यत्पदं** यस्यां द्वारकायां पदं स्थानं । **उपेत्य आस्ते** । महाबलेः **प्रसन्नस्तद्वारि** स्थितः त्रिविक्रमः कुशासुरवधार्थमृषिभिर्याचितस्सन् मुसलेनावनिं निर्भिद्य द्वारकामुपेत्य कुशासुरं हत्वां तत्रैवास्त इति **पौराणिकीप्रसिद्धिः** । अत एव **अद्वितीया** असदृशी । **सा द्वारका** नाम । **पुरी** । **नः** अस्माकं । **ईप्सितपुमर्थकरी** । अभिप्सितपुरुषार्थकरी भवेत् । [1]कृजो हेतुताच्छील्यानुलोम्येष्विति ट प्रत्ययः । [2]टिड्ढाणञित्यादिना ङीप् । अतस्तत्रबहुतरतपश्चरणादिना हयग्रीवप्रसादः स्वात्मना लब्ध इति भावः ॥

द्वारकास्थः त्रिविक्रमः

त्रिविक्रमो विजयते त्रयीविख्यातविक्रमः ।
यः कुशं दमयित्वेमां चक्रे विप्रकुशस्थलीम् ॥ ९१ ॥

त्रिविक्रमं[5] वर्णयति । **त्रिविक्रम इति** । **त्रयीविख्यातविक्रमः** त्रय्या वेदत्रयेण । [3]संख्याया अवयवे तयप् । [4]द्वित्रिभ्यां तयस्यायज्वा इति अयजादेशे टिड्ढाणञिति ङीप् । स्त्रियामृक्साम यजुषी इति वेदास्त्रयस्त्रयीत्यमरः । विख्यातः विशेषेण कथितः विक्रमः पराक्रमो यस्य स तथोक्तः ।

---

[1] कृजो हेतुताच्छील्यानुलोम्येषु । पा. सू. 3/2/20)

[2] टिड्ढाणञ्द्वयसंदघ्नमात्रच्तयष्ठक्ठञ्कञ्क्रपः । (पा. सू. 4/11/5)

[3] ' संख्याया अवयये तयप् । (पा. सू 5/2/42)

[4] द्वित्रिभ्यां तयस्यायज्वा । (पा. सू. 5/2/43)

[5] पुण्या द्वारावती तत्र यत्रासौ मधुसूदनः ।
साक्षाद् देवः पुराणोऽसौ स हि धर्मः सनातनः ॥
—इति महाभारते (3/80/24)

अनेन त्रिषु विक्रमो यस्येति त्रिविक्रमशब्दस्यार्थांतरमुक्तं भवति । वेदत्रय-प्रतिपाद्य इत्यर्थः । **त्रिविक्रमः** त्रिविक्रमरूपी हरिः । **विजयते** उत्कृष्टो वर्तते । तमेव विक्रमं दर्शयति । **य इति** । **यः** त्रिविक्रमः । **कुशं** कुशासुरं । **दमयित्वा** हत्वा । **इमां** कुशासुराधिष्ठितस्थलीं । **विप्रकुश-स्थलीं** ब्राह्मणोचितसत्क्रियासाधनदर्भस्थलीं **चक्रे** । इति **चातुर्योक्तिः** । ९१

सगदोऽपि ह्यसौ देवः संसारे ह्यगदतामगात् ।
त्रिविक्रमोऽप्यसौ योगिमनसोऽविक्रमोऽभवत् ॥ ९२ ॥

सगद इति । **असौ देवः** त्रिविक्रमः । **सगदोऽपि** गदया कौमोदक्या सहितोऽपि । **संसारे** भक्तजनसंसारे रोगे । **अगदतां** औषधत्वं । भेषजौ-षधभैषज्यान्यगदोजायुरित्यपीत्यमरः[1] **अगात्** । सगदस्यागदत्वमापाततो विरुद्धं । अगदशब्दस्यौषधार्थत्वेन विरोधपरिहारः । अत एव **विरोधा-भासालंकारः** । **असौ त्रिविक्रमोऽपि** त्रिषु लोकेषु विक्रमः पादविन्यासो यस्य । त्रयो विक्रमाः पादविक्षेपा यस्येति वा । तथोक्तोऽपि । **योगिमनसः** ध्यानासक्तमुनींद्रचित्तात् । **अविक्रमः** न विद्यते विक्रमः एकोऽपि पादविक्षेपो यस्य स तथोक्तः । **अभवत्** । योगिमनो विहाय पदमात्रमपि गंतुं न समर्थो जात इत्यर्थः । सदा योगिमनोगोचरोऽभवदिति भावः । त्रिविक्रम-स्याविक्रमत्वमापाततो विरुद्धं । तात्पर्यार्थमादाय विरोधपरिहारः । ॥ ९२ ॥

गोमतीनदी

श्रीकृष्णचरणांभोजरजोरंजितगोमतीम् ।
गोमतीमब्धिरमणीं भजे तापत्रयापहाम् ॥ ९३ ॥

तत्र गोमतीं वर्णयति । **श्रीकृष्णेति** । **श्रीकृष्णचरणांभोजरजो-**

---

[1] नित्यं पद्मगदारिशंखसहितश्चित्ते मम त्रिक्रमो....
—इति श्रीवादिराजश्रीचरणविरचिते चतुर्विंशतिमूर्तिभेदस्तोत्रे ।

रंजितगोमतीं श्रीकृष्णस्य चरणौ अंभोजे इवेत्युपमितसमासः । श्रीकृष्ण-चरणांभोजस्य । रजोभिः परागैः । रंजिता अलंकृता गौर्जलमस्यास्तीति तथोक्ता तां । अनेनासाधारण्येन व्यपदेशा भवंतीति गोमतीशब्दस्य निर्वचनं । 'गौः स्वर्गे वृषभे वज्रे रश्मौ चंद्रमसि स्मृतः । अर्जुने नेत्रदिग्बा-णभूवाग्वारिषु गौर्मतेति विश्वः । [1]तदस्यास्तीत्यादिना मतुप् । [2]उगितश्चेति ङीप् । **तापत्रयापहां** तापत्रयं आध्यात्मिकादित्रिविधतापं अपहंतीति ताप-त्रयापहा ताम् । अशिहनेतिडप्रत्ययः । **अब्धिरमणीं** समुद्रपत्नीं । **गोमतीं** नदीमहं **भजे** । ॥ ९३ ॥

फुल्लफेनसितांभोधिकल्लोलधृतया तया ।
वल्लभालिंगनसुखं दुर्लभं लभ्यतेऽनिशम् ॥ ९४ ॥

फुल्लेति । **फुल्लफेनसितांभोधिकल्लोलधृतया** । फुल्लैः विकसितैः फेनैः सिताः अंभोधिकल्लोलाः समुद्रोर्मयः । ऊर्मिरुत्कलिकालोलकल्लोल-लहरीस्तथेति हलः । तैर्धृतया आलिंगितया । **तया** गोमत्या । **दुर्लभं** असुलभं । नित्यं भर्त्रालिंगनस्य दुर्लभत्वादिति भावः । **वल्लभालिंगन-सुखं** वल्लभालिंगनाज्जातं सुखं । **अनिशं** अनवरतं । **लभ्यते** । अनेन नायकस्य अनुकूलत्वं नायिकायाः स्वाधीनपतिकात्वं च द्योत्यते । ॥ ९४ ॥

द्वारकास्थं चक्रतीर्थम्

चक्रतीर्थस्य महिमा वर्णितुं केन शक्यते ।
यच्छिलामपि संगेन विधत्ते विश्ववंदिताम् ॥ ९५ ॥

तत्र चक्रतीर्थं वर्णयति । **चक्रेति** । **चक्रतीर्थस्य** । **महिमा** सामर्थ्यं । **केन** कविना । **वर्णितुं** स्तोतुं । **शक्यते** न केनापीत्यर्थः ।

---

[1] तदस्यास्त्यस्मिन्निति मतुप् । (पा. सू. 5/2/94)
[2] उगितश्च । (पा. सू. 4/1/6)

यत् चक्रतीर्थं । **संगेन** स्वसंबंधेन । **शिलामपि** ज्ञानादिगुणशून्यपाषाणमपि । **विश्ववंदिताम्** विश्वैस्समस्तजनैरपि वंदितां नमस्कृतां । **विधत्ते** कुरुते । चक्रतीर्थे पतिताः शिला अपि चक्रांका भूत्वा शालग्रामवद्वंदिता भवंतीति **सर्वजनप्रसिद्धिः*** । जडस्याप्येतादृशमहत्त्वसंपादकस्य चक्रतीर्थस्य महिमातिशयः कथं कथनीय इति भावः । ॥ ९५ ॥

शंखोद्धारक्षेत्रम्

पापेनापि समावृतस्य विमलज्ञानोज्झितस्याप्यलं
मग्नस्यापि भवांबुधाविह भवेत् पूतस्य जात्योद्धृतिः ।
इत्याख्यापयितुं दरं मुरहरो यत्रोद्धारादरात्
शंखोद्धारपदं विभाति तदिदं क्षेत्रं पवित्रं भुवि ॥ ९६ ॥

शंखोद्धारक्षेत्रं वर्णयति । **पापेनेति** । **पापेन** दुष्कृतेन । **समावृतस्यापि** छन्नस्यापि । **विमलज्ञानोज्झितस्यापि** निर्मलज्ञानशून्यस्यापीत्यर्थः । **अलं** अत्यर्थं । **भवांबुधौ** संसारसमुद्रे । **मग्नस्यापि जात्या** स्वभावेन । **पूतस्य** शुद्धजीवस्येत्यर्थः । **इह** संसारात् । **उद्धृतिः** उद्धारः । धृङ् धारण इति धातोः क्तिन् । **भवेत्** स्यादेव । **मुरहरः** श्रीकृष्णः । **इत्याख्यापयितुं** इममर्थं ज्ञापयितुमिव । **आदरात् यत्र** क्षेत्रे । **दरं** शंखं **उद्धार** उद्धृतवान् । धृङो लिट् । शंखोऽपि पापिष्ठेनासुरेण पंचजनेनावृतः । जडत्वाज्ज्ञानशून्यः समुद्रे मग्नः जात्या पूतः शुभ्रः । एतादृशशंखोद्धारेणैतादृशजीवस्याप्युद्धारो भवेदित्ययमर्थो ज्ञापितो भवतीति भावः । **तदिदं पवित्रं**

---

* शालग्रामोद्भवो देवो **शिला चक्राङ्कमण्डिता** ।
यत्रापि नीयते तत्र वाराणस्याः शताधिकम् ॥
शालग्रामोद्भवो देवो **देवो द्वारवतीभवः** ।
उभयोः सङ्गमो यत्र तत्र मुक्तिर्न संशयः ।

—इति कृष्णामृतमहार्णवे (104, 105)

शंखोद्धारपदं शंखोद्धार इति पदं नाम यस्य तत् । **क्षेत्रं भुवि विभाति** शोभते । ॥ ९६ ॥

गोपीचंदनम

फाले यल्लिखितं धुनोति विविधां रेखां विधात्रा कृतां
यल्लीलातिलकीकृतं वितनुते विद्वल्ललामायितान् ।
ऊर्ध्वं यद्धृतमुच्चलोकपदवीसोपानमन्वेति तद्
गोपीचंदनमंजसा विजयते तापत्रयध्वंसनम् ॥ ९७ ॥

गोपीचंदनं वर्णयति । **फाल इति** । **यत्** गोपिचंदनं । **फाले** ललाटे । ललाटं निटिलं फालमिति विश्वः । **लिखितं** सत् **विधात्रा कृतां** लिखितां । **विविधां** जननमरणस्वर्गनरकादिसंपादिकां । **रेखां** लिपिं । **धुनोति** मार्ष्टि । पुनः संसारिणं न करोतीति भावः । **यत्** गोपीचंदनं । **लीलातिलकीकृतं** लीलार्थं शृंगारार्थं । तिलकीकृतं विशेषीकृतं सत् । 'तमालपत्रं तिलकं चित्रकं तु विशेषकं । पुंड्र'मिति हलः । [1]अभूततद्भाव

---

[1] ऊर्ध्वपुण्ड्रमृजुं सौम्यं ललाटे यस्य दृश्यते ।
स चण्डालोऽपि शुद्धात्मा पूज्य एव न संशयः ।
अशुचिर्वाऽप्यनाचारो मनसा पापमाचरन् ।
शुचिरेव भवेन्नित्यमूर्ध्वपुण्ड्रांकितो नरः ॥
ऊर्ध्वपुण्ड्रविहीनस्य श्मशानसदृशं मुखम् ।
अवलोक्य मुखं तेषामादित्यमवलोकयेत् ॥
यज्ञो दानं तपश्चैव स्वाध्यायः पितृतर्पणम् ।
व्यर्थं भवति तत् सर्वमूर्ध्वपुण्ड्रं विना कृतम् ॥
गोपीचन्दनलिप्तांगो यं यं पश्यति चक्षुषा ।
तं तं शुद्धं विजानीयान्नात्र कार्या विचारणा ॥
—इति कृष्णामृतमहार्णवे (215-219)

[2] अभूततद्भावे इति वक्तव्यम् । (वार्तिकः—5/4/50)

इत्यादिना क्विप्रत्यये सति गतिसंज्ञायां कुगतिप्रादय [1]इति समासः । **विद्वल्लालायितान्** विद्वच्छ्रेष्ठानित्यर्थः । ललामं पुच्छपुंड्राश्वभूषाप्राधान्यकेतुष्वित्यमरः । **वितनुते** करोति । **यत्** गोपीचंदनं **ऊर्ध्वधृतं** ऊर्ध्वपुंड्रीकृतं सत् । **उच्चलोकपदवीसोपानं** उच्चलोको वैकुंठलोकः तत्पदवी मार्गः । अयनं वर्त्ममार्गाध्वपंथानः पदवीसृतिरित्यमरः । अयनं पदवी मार्गः पंथा सरणी निगद्यत इति हलः । तत्र सोपानमुन्नतप्रदेशारोहणाय रचितशिलाभंगीपरं परम् । **अन्वेति** अनुकरोति वैकुंठं प्रापयतीत्यर्थः । **तत्तापत्रयध्वंसनं** आध्यात्मिकादित्रिविधतापस्य ध्वंसनं नाशो यस्मात् तत् । **गोपीचंदनं** द्वारवत्युद्भवो मृद्विशेषः । **अंजसा विजयते** । "द्वारावत्यां शुभे रम्ये वासुदेवह्रदे तथा । तत्रोद्भवां मृदं शुभ्रामादाय द्विजसत्तमः । धारयेदूर्ध्वपुंड्राणि सर्वकामफलाप्तये । ऊर्ध्वपुंड्रधरो विप्रः सर्वलोकेऽपि पूजितः । सविमानं समारुह्य याति विष्णोः परं पदमित्यादि"वचनादुक्तोऽर्थो युक्त एव । ॥ ९७ ॥

सिद्धपुरी (कपिलाश्रमः)

भाति [2]सिद्धपुरी यत्र सिद्धा मुक्तिपुरी नृणाम् ।
पुण्यं बिंदुसरो यत्र बिंदुमात्रं सरस्समम् ॥ ९८ ॥

कपिलमुनेराश्रमं वर्णयति । **भातीति** । **सिद्धपुरी भाति** शोभते । **यत्र** सिद्धपुर्यां । **नृणां** मनुष्याणां । [3]नृ चेति नामि वा दीर्घः । **मुक्तिपुरी** वैकुंठनगरी । **सिद्धा** सिद्धपुरीस्थजनानां मोक्षो निश्चित एवेत्यर्थः । अत

---

[1] कुगतिप्रादयः (पा. सू. 2/2/18)

[2] तद्वीरासीत् पुण्यतमं क्षेत्रं त्रैलोक्यविश्रुतम् ।
नाम्ना सिद्धपदं यत्र सा संसिद्धिमुपेयुषी ॥
—इति श्रीमद्भागवते (III 33/31)

'सिद्धपुरीति द्वारकाया नामान्तरम्' इति मुद्रितपाठः । स तु बहुषु कोशेषु अदर्शनात्, प्रमाणविरुद्धत्वाच्च लिपिकृत्प्रमाद एव ।

[3] पा. सू. 6/4/14

एव सिद्धपुरीति संज्ञेति भावः । **यत्र बिंदुसरः** बिंदुसरोवरं च [भाति । नत्र] बिंदुसरोवरे **[अर्जितं] बिंदुमात्रं** अल्पमपि **पुण्यं** । **सरस्समं** सरोवरसदृशं **[भवति]** बहु भवतीत्यर्थः । अत एव बिंदुसरो नामेति भावः । ॥ ९८ ॥

पुष्करक्षेत्रम्

तीर्थानामुत्तमं तीर्थं पुष्करं मर्त्यदुष्करम् ।
विहरन्नपि वाराशौ वराहो यत्सरोऽविशत् ॥ ९९ ॥

पुष्करक्षेत्रं वर्णयति । **तीर्थानामिति** । **मर्त्यदुष्करं** मर्त्यैर्मष्नुयैर्दुष्करं कर्तुमशक्यं देवनिर्मितत्वादिति भावः । **पुष्करं** पुष्कराख्यं **तीर्थं** । **तीर्थानामुत्तमं** भवति **[कुतः] वराहः** वराहरूपी हरिः । **वाराशौ** सकलतीर्थाधिपतौ समुद्रे । **विहरन्नपि** । **यत्** पुष्कराख्यं **सरः अविशत्** प्रविष्टवान् । विश प्रवेशन इति धातोर्लट् । अतस्सकलतीर्थोत्तममिति भावः । ॥ ९९ ॥

॥ इति श्रीमत्कविकुलतिलकश्रीमद्वादिराजपूज्यचरणविरचिततीर्थप्रबंधस्य टीकायां लक्ष्मीपतिभट्टोपाध्यायसूनुनारायणाचार्येण कृतायां गुरुभावप्रकाशिकायां पश्चिमप्रबंधः (I) संपूर्णः ॥

कुरुक्षेत्रं गयां गंगां प्रभासं पुष्कराणि च ।
एतानि मनसा ध्यात्वा अवगाह्यं ततो जले ॥
दशकोटिसहस्राणि तीर्थानां वै महामते ।
सानिध्यं पुष्करे येषां त्रिसंध्यं कुरुनंदन ॥
जन्मप्रभृति यत् पापं स्त्रिया वा पुरुषेण वा ।
पुष्करे स्नातमात्रस्य सर्वमेव प्रणश्यति ॥
यथा सुराणां सर्वेषामादिस्तु मधुसूदनः ।
तथैव पुष्करं राजन् तीर्थानामादिरुच्यते ॥
दुष्करं पुष्करे गंतुं दुष्करं पुष्करे तपः ।
दुष्करं पुष्करे दानं वस्तुं चैव सुदुष्करम् ॥

—इत्यादि श्रीमन्महाभारते (वनपर्वणि अ. 82, श्लो. 21, 33, 34, 39)

उत्तरप्रबंधः

नमामि सुकृतश्रेणीं कृष्णवेणीं तरंगिणीम् ।
यद्वीक्षणं कोटिजन्मकृतदुष्कर्मशिक्षणम् ॥ १ ॥

अमरभ्रमरैश्चार्च्यं कमलाकरपूजितम् ।
मंदाकिनीजनिस्थानं वंदे श्रीशपदांबुजम् ॥ ॥ १ ॥

श्रीवादिराजयोगींद्रसेवासंतुष्टमानसः ।
श्रीवाजिवदनो देवो भावे तिष्ठतु मे सदा ॥ २ ॥

श्रीकृष्णवेणीं वर्णयति । **नमामीति** । **सुकृतश्रेणीं** सुकृतानां श्रेणी परंपरा यस्याः सा ताम् । **कृष्णवेणीं** कृष्णवेण्याख्याम् । **तरंगिणीं** तरंगाः अस्यां संतीति तरंगिणी नदी ताम् । [1]अत इति ठनाविति इन् प्रत्यये । [2]ऋन्नेभ्यो ङीप् इति ङीप् । तरंगिणी शैवलिनी तटिनी ह्रादिनी धुनीत्यमरः । **नमामि** नौमि । **यद्वीक्षणं** यस्याः कृष्णवेण्याः वीक्षणं दर्शनम् । **कोटिजन्मकृतदुष्कर्मशिक्षणं** कोटिजन्मसु कृतानां दुष्कर्मणां पापानां शिक्षणं यस्याः तथोक्तं । दर्शनमात्रेण अनेकजन्मार्जितपापं हरतीति भावः । ॥१॥

गुरुं कन्यागतं धन्या या पुरस्कृत्य सेव्यसे ।
श्रीकृष्णवेणि पापानि सा त्वं पुण्ययसि ध्रुवम् ॥ २ ॥

गुरुमिति । **श्रीकृष्णवेणी** । **धन्या** सार्धत्रिकोटितीर्थोपेतभागीरथी-सन्निधानयुक्तत्वात् कृतार्था । **या त्वं** । **कन्यागतं** कन्याराशिस्थं ।

---

[1] अत इति ठनौ (पा. सू. 5/2/115)

[2] 'ऋन्नेभ्यो ङीप्' (पा. सू. (4/1/5)

कन्यागामिनमिति ध्वनिः । **गुरुं** बृहस्पतिम् । श्रेष्ठं गुरुमिति वा ध्वनिः । "गुरुस्तु गीष्पतौ श्रेष्ठ गुरौ पितरि दुर्भर" इति शब्दार्णवे । **पुरस्कृत्य** पुरोधाय । **सेव्यसे** । यतस्तैर्थिकजनैरिति शेषः । 'सेवृ सेवायामिति' धातोः कर्मणि लट् । "**बृहस्पते सुराध्यक्ष सर्वलोकनमस्कृत । गृहाणार्घ्यं मया दत्तं कन्यास्थो भार्यया सहे**"ति वचनात् । कन्यागते गुरौ पूर्वमर्घ्यादिना बृहस्पतिपूजां कृत्वा पश्चात् कृष्णवेणीस्नानविधानादिति भावः । अतः **सा त्वं पापानि पुण्ययसि** सुकृतीकरोषि । **ध्रुवं** निश्चयः । "त्यजेदंत्यकुलोद्भूतां वृद्धां स्त्रीं कन्यकां तथे"ति वचनात् कन्यागमनस्य निषिद्धत्वाद्गुरोरेतादृशानाचारस्य ज्ञानकृतत्वात् तादृशपापोपेतगुरोः पुरस्करणात् पापानां पुण्यत्वापादनसामर्थ्यं निश्चितमिति ध्वनिलभ्यो भावः । "त्यक्त्वा यस्त्वमयो याति रसस्पर्शात् सुवर्णताम् । एवं कृष्णाजलस्पर्शात् पापं सद्यो हि पुण्यतामिति" **स्मृत्यनुसारिणी**यमुक्तिः । अत्र नेयमुत्प्रेक्षा । अन्यथाकृतेरभावात् । केवलं शब्दशक्तिमूलो **ध्वनि**रेव । ॥ २ ॥

किं वर्णयामि हे कृष्णे त्वयि कृष्णस्य सन्निधिम् ।
यत्समस्तपदोक्तौ तु पुंभावमवलंबसे ॥ ३ ॥

किं वर्णयामीति । **हे कृष्णे त्वयि कृष्णस्य** श्रीनारायणस्य । **सन्निधिं** सन्निधानं । **किं वर्णयामि** कियत् कथयामि । **यत्** यस्मात् कारणात् । **समस्तपदोक्तौ तु** कृष्णया सहिता वेणीति पदयोस्समासानंतरं

---

* विष्णुपादाब्जसम्भूता गङ्गा सर्वाधिका मता ।
ततो गोदावरी न्यूना कृष्णवेणी ततोऽधमा ॥
—इति राघवेंद्रतीर्थविरचितनदीतारतम्यस्तोत्रे ।
कृष्णवेण्यां नृपश्रेष्ठ कृष्णः साक्षाज्जानार्दनः ।
चतुर्बाहुर्महातेजाः शंखचक्रासिशार्ङ्गधृक् ॥
—इति ब्रह्माण्डपुराणे ।

समस्तपदोच्चारणे । **पुंभावं** पुल्लिंगकृष्णपदेनैव वाच्यत्वमित्यर्थः । **अवलंबसे** आश्रयसे । कृष्णापदस्य पुंवद्भावे सति कृष्णवेणीति निगद्यस इत्यर्थः । तस्मात् किं वर्णयामिति पूर्वेणान्वयः । ॥ ३ ॥

श्रीकृष्णवेणि कल्याणि याचे त्वामहमन्वहम् ।
श्रीकृष्णचरणांभोजे भक्तिं भक्तभवच्छिदि ॥ ४ ॥

श्रीकृष्णवेणीति । हे **कल्याणि** परममंगलरूपे । **श्रीकृष्णवेणि त्वामहं अन्वहं** निरंतरं । **भक्तभवच्छिदि** भक्तानां भवः संसारः तद्भयमिति यावत् । तं छिनत्तीति भक्तभवच्छित् तस्मिन् । **श्रीकृष्णचरणांभोजे** श्रीकृष्णपादारविंदे । **भक्तिं** माहात्म्यज्ञानपूर्वकसुदृढस्नेहरूपां । **याचे** प्रार्थयामीति संबंधः । ॥ ४ ॥

पुण्डरीक क्षेत्रम्

श्रीभीमरथ्यमलनीरसमीरवेगनिर्धूततीरगनराशुभघर्मजालम् ।
श्रीपांडुरंगलसितं वरपुंडरीकक्षेत्रं पवित्रमहमन्वहमाश्रितोऽस्मि ॥५॥

पुंडरीकक्षेत्रं वर्णयति । **श्रीभीमरथीति** । **अहं श्रीभीमरथ्यमलनीरसमीरवेगनिर्धूततीरगनराशुभघर्मजालम्** । श्रीभीमरथ्याः अमलं यन्नीरं उदकं तत्संगी यः समीरः वातस्तस्य वेगेन त्वरया निर्धूतानि तीरगानां तीरस्थानां नराणां पापाख्यघर्मजालानि येन स तथोक्तस्तम् । **श्रीपांडुरंगल-**

---

* ताम्रपर्णी भीमरथी वंजुला च पिनाकिनी ।
पृथक् सागरगामिन्यो नद्यो भीमरथीसमाः ॥
—इति श्रीराघवेंद्रतीर्थकृत नदीतारतम्यस्तोत्रे ।
भीमरथ्यां तु श्रीधरम् ।
इति ब्रह्माण्डपुराणे ।
वेणी भीमरथी चैव नद्यौ पापभयावहे ।
मृगद्विजसमाकीर्णे तापसालयभूषिते ॥
—इति **महाभारते** (3/88/3)

सितं श्रीपांडुरंगविट्ठलेन शोभितं । **पवित्रं** शुद्धं । **वरपुंडरीकक्षेत्रं** वरस्योत्तमस्य पुंडरीकाख्यस्य मुनेः क्षेत्रं आश्रमम् । **अहमन्वहं** निरंतरम् । **आश्रितोऽस्मि** । ॥ ५ ॥

पुण्डरीकक्षेत्रस्थो विट्ठलः

तीरे सत्सरितस्तिरस्कृतधनासक्तिप्रियः
पादांभोजमिदं मदंकसहितः संचितयांतर्हृदि ।
पश्चात् ते कटिमात्र एव भविता संसारवार्धिर्न चे-
च्छिक्षामीति हि लक्षयत्यनुदिनं स्वावस्थया विट्ठलः[1] ॥ ६ ॥

श्रीविट्ठलं वर्णयति । **तीर इति** । **सत्सरितः** पुण्यनद्याः **तीरे** स्थित इति शेषः । **तिरस्कृतधनासक्तिः** तिरस्कृता धनासक्तिः द्रव्यतृष्णा यस्य स तथोक्तस्सन् । **विरक्तिप्रियः** वैराग्योपेतस्सन् । **मदंकसहितः** मदंकैः शंखादिचिह्नैः सहितः अंकितस्सन् । **अंतर्हृदि इदं** मम **पदांभोजं** पादारविंदं **संचिंतय** सम्यक् स्मर । चिती संस्मृत्यामितिधातोर्लोट् । **पश्चात्** स्मरणानंतरम् । **ते** तव । **संसारवार्धिः** संसारसमुद्रः । **कटिमात्र एव** कटिप्रमाण एव । [2]प्रमाणे द्वयसज्दघ्नञ्मात्रचः इति मात्रच् प्रत्ययः । **भविता** भविष्यति 'भू सत्तायामिति'धातोर्लुट् । **न चेत्** त्वमेवं न करोषि चेत् । **शिक्षामि** ताडयामि । **इति** इममर्थं । **विट्ठलः स्वावस्थया** स्वमूर्तिसंस्थानेन । **अनुदिनं लक्षयति हि** दर्शयति । लक्ष दर्शनांकनयोरिति धातोर्लट् । विट्ठलस्य भीमरथीतीरस्थत्वेन तीरे सत्सरित इत्ययमर्थः । अंबरशून्यतया स्थितत्वेन तिरस्कृतधनासाक्तिर्विरक्तिप्रिय इत्ययमर्थः । स्वकरस्थशंखपद्माभ्यां मदंकसहित इत्ययमर्थः स्वपादमूलस्थाधोमुखांगुल्युपेतकरेण

---

[1] विदा ज्ञानेन ठान् शून्यान् लाति गृह्णाति यः स्वयम् ।
अज्ञानुग्रहकृद्देवो विठलः कथ्यते बुधैः ॥
—इति प्रक्रियाकौमुदीव्याख्यायां (प्रकाशे) उद्धृत प्रमाणवचनम् । (पत्र 4)

[2] पा. सू. (5/2/37)

इदं पादांभोजमित्ययमर्थः । जघनन्यस्तकरद्वयेन संसारवार्धिः कटिमात्र एव भवितेत्ययमर्थः । ऊरुद्वयमध्यस्थदंडेन न चेच्छिक्षामीत्ययमर्थो लक्षितो भवतीति ज्ञातव्यम् । अनेन विट्ठलमूर्तेः संस्थानविशेषो वर्णितो भवति । ॥ ६ ॥

पापावलीपाटनपट्वपांगः श्रीपाणिपद्मांचितजानुजंघः ।
गोपालबालः कृपया स्वयं नः श्रीपांडुरंगो भवतु प्रसन्नः ॥ ७ ॥

पापावलीति । पापावलीपाटनपट्वपांगः पापानां आवली परंपरा तस्याः पाटने विदलने पटू समर्थौ अपांगौ यस्य स तथोक्तः । **श्रीपाणि-पद्मांचितजानुजंघः** श्रियः लक्ष्म्याः पाणिपद्माभ्यां अंचितं पूजितं जानुनी च जंघे च जानुजंघं यस्य तथोक्तः । **गोपालबालः** गोपालश्चासौ बालश्च अथवा गोपालस्य नंदगोपस्य बालः कुमार इति वा । **श्रीपांडुरंगः** श्रीविट्ठलः **स्वयं कृपया** दयया । **नः** अस्माकं । **प्रसन्नो भवतु ।** ॥ ७ ॥

पापापनोदनपटु प्रियभृत्यभृंगैः पेपीयमानशुभसुंदरतारसार्द्रम् ।
तापत्रयोपशमनं तरुणार्कवर्ण गोपालबालचरणांबुरुहं श्रितोऽस्मि ॥८॥

पुनरपि विट्ठलं वर्णयति । **पापेति । पापापनोदनपटु** पापानां अघानां अपनोदनं अपसरणं तत्र पटु समर्थम् । **प्रियभृत्यभृंगैः** प्रियभृत्या एव भृंगाः भ्रमराः तैः । **पेपीयमानशुभसुंदरतारसार्द्रं** पेपीयमानः

"वेदनं वित्, ज्ञानम् । विद् ज्ञानेऽस्मात् 'संपदादिभ्यः क्विप्' (3/3/64) इति भावे क्विप्, तेन ठाः शून्याः, ठः शून्ये च बृहद्ध्वनाभिधानात् । तान् लाति स्वीकरोतीति विट्ठलः । लाऽऽदाने ऽस्मात् 'आतोऽनुपसर्गे कः' (3/2/3) इति कः । आतो लोपश्चेत्यालोपः । अज्ञानुग्राहक इत्यर्थः ।" इति····अन्ये तु "वेथनं वित्, याच्ञा विथ् याचते क्विबंतः । तया ठाः शून्या निस्पृहास्तान् लातीति विट्ठल' इति व्याचक्षते" —इति च तत्रैव । (पत्र. 4)

मुहुर्मुहुः पीयमानः । 'सन्यङो'[1]रितिद्विर्वचनं [2]घुमास्थेत्यादिना ईकारः । शुभसुंदरतेव शोभनसौंदर्यमेव रसो मकरंदः तेन आर्द्रं **तापत्रयोपशमनं** तापत्रयस्य उपशमनं यस्मात् तथोक्तं । **तरुणार्कवर्णं** बालसूर्यवर्ण इव वर्णो यस्य तत् तथोक्तम् । **गोपालबालचरणांबुरुहं** गोपालबालस्य श्रीविट्ठलस्य । चरणांबुरुहम् । **श्रितोऽस्मि** । ॥ ८ ॥

गोदावरी

विप्रर्षिदेवकुलसंकुलतीरयुग्मा विद्रावितावतृणरेणुकणा स्ववातैः ।
स्वादूदकैः(क)प्रशमिताखिललोकशोका गोदावरी शुभकरी सरिदुद्धरेन्नः

गोदावरीं वर्णयति । **विप्रर्षीति** । **विप्रर्षिदेवकुलसंकुलतीरयुग्मा** विप्राश्च ऋषयश्च देवाश्च तेषां कुलेन समूहेन संकुलं संकीर्णं तीरयुग्मं यस्यास्सा तथोक्ता । **स्ववातैः** स्वस्यामुत्पन्नैर्वायुभिः । **विद्रावितावतृण-रेणुकणा** अघान्येव तृणानि रेणवः कणाश्शर्कराश्च । अघतृणरेणुकणाः विद्राविताः अघतृणरेणुकणाः यस्याः सा तथोक्ता । **स्वादूदकैः प्रशमिता-खिललोकशोका** प्रशमितः अखिललोकस्य शोको यया सा तथोक्ता । **शुभकरी गोदावरी**[3] **सरित्** । **नः** अस्मान् । **उद्धरेत्** उद्धारं कुर्यात् । संसारादिति शेषः । ॥ ९ ॥

अहांसि हंसि सततं किल रासि पुण्यं
सिंहस्थिते सुरगुरौ न तदंब याचे ॥
गोदे समस्तफलदे दिश कृष्णपादे
भक्तिं विरक्तिमितरत्र परत्र मुक्तिम् ॥ १० ॥

अंहांसीति । **हे गोदे** गोदावरि त्वं । **सततं** सर्वदा सुरगुरोः सिंहस्थित्यभावेऽपि । **अंहांसि** जनानां दुरितानि । 'अंहो दुरितदुष्कृत'-मित्यमरः । **हंसि** संहरसि **किल** । हन हिंसागत्योरिति धातोर्लट् ।

---

[1] पा. सू. (6/1/9) [2] पा. सू. (घुमास्थागापाजहातिसां हलि–6/4/66)

[3] 'तद्गौतमेन गोदत्तं वारि गोदावरी'—इति तत्त्वप्रदीपे (20)

पुण्यं सुकृतं । 'धर्मः पुण्यं वृषः श्रेयः सुकृतं च समं स्मृत'मिति हलः । **रासि** ददासि किल । रा दान इतिधातोर्लट् । **हे अंब** मातः । **सुरगुरौ** बृहस्पतौ । **सिंहस्थिते** सिंहराशिस्थे सति । अहं **तत्** पापपरिहरणं पुण्यं चेत् उभयमपि । **न याचे** । पापपरिहारादेः सर्वदा विद्यमानत्वेन पुण्यकालविशेषेऽपि तस्यैव प्रार्थनायोगात् । नहि विवाहगृहेऽपि यवागुं प्रेक्षावान् कोऽपि प्रार्थयत इति भावः । [किंतु] **हे समस्तफलदे** स्वर्गापवर्गादिसमस्तपुरुषार्थप्रदे गोदावरि । **कृष्णपादे भक्तिं इतरत्र** संसारे । **विरक्तिं** । **परत्र** परलोके । **मुक्तिं च दिश** देहि । एतत्फलस्य इतरासाध्यमहत्त्वेन तव कालविशेषे महत्वनिमित्तमहाप्रसन्नतादशायामेव प्रार्थनीयत्वादिति भावः ॥

---

* सिंहस्थिते गौतमि देवि भद्रे ब्रह्माण्डभाण्डोपगतानि पुण्ये ।
भुव्यंतरिक्षे दिवि नागलोके सर्वाणि तीर्थानि तवोदरे स्युः ॥
तिस्रः कोट्योऽर्धकोट्यश्च तीर्थानि भुवनत्रये ।
आयान्ति गौतमि स्नातुं सिंहस्थे च बृहस्पतौ ॥
षष्ठिवर्षसहस्राणि भागीरथ्यवगाहनम् ।
सकृद् गोदावरीस्नानं सिंहस्थे च बृहस्पतौ ॥
कथंचिदपि सिंहस्थे गुरौ स्नानं समाचरेत् ।
गौतम्यां जन्मनः पुंसां यत्फलं जीवितस्य तु ॥

—इत्यादि स्मृत्यर्थसागरोद्धृत प्रमाणवचनानि)

बृहस्पते सुराध्यक्ष सर्वदेवनमस्कृत ।
गृहाणार्घ्यं मया दत्तं सिंहस्थो भार्यया सह ॥

—इति तत्र बृहस्पत्यर्घ्यमन्त्रः ।

'षण्मासफलदा **गोदा**'—इति कृष्णामृतमहार्णवे ।
विष्णुपादाब्जसम्भूता गंगा सर्वाधिका मता ।
ततो गोदावरी न्यूना ....

—इति श्रीराघवेंद्रतीर्थकृत नदीतारतम्यस्तोत्रे ।

आदौ धवलगंगाख्या(या) गंगाद्वाराभिधांतरे ।
पश्चात् कुशावर्तपदा गोदा मोदाय सा सदा ॥ ११ ॥

पुनरपि गोदावरीं वर्णयति । आदाविति । [या] **आदौ** प्रथमं त्र्यंबकपर्वतशिखरोपरि वृत्तसूक्ष्मसरोवराकारेण । **धवलगंगाख्या** [वर्तते] **अंतरे** गंगाद्वारकुशावर्तयोर्मध्ये तद्गिरिशिखरमूले वराहनृसिंहतीर्थाख्यकुंडद्वयाकारेण । **गंगाद्वाराभिधा** गंगाद्वारमित्यभिधा यस्याः सा तथोक्ता । **पश्चात् कुशावर्तपदा** गौतममुनिना कुशेन वर्तितत्वात् कुशावर्तनामवती । **सा गोदा सदा मोदाय** स्यादिति शेषः । स्वदृष्टानुसारेण मूलगोदावरीवर्णनमिदम् । ॥ ११ ॥

यमुना

कालिंदि त्वमघान्वितानपि सतः कृत्वा पवित्रात्मनो
गंतुं नैव कदापि मुंचसि तव भ्रातुर्निकेतं प्रति ।
किंतु क्षीरपयो(ब्धि)धिवासनिरतान् प्रीत्या करोष्याश्रितान्
स्निग्धे भर्तरि कामिनीजनरुचिस्तत्पक्ष एव ह्यलम् ॥१२॥

यमुनां वर्णयति । *कालिंदीति । हे **कालिंदि** यमुने । ‘ कालिंदी सूर्यतनया यमुना शमनस्वसे’त्यमरः । **त्वं अघान्वितानपि** आश्रितान् **सतः**

गोदावर्यां महानद्यां वीरनारायणो नृप ।
शंखचक्रगदापद्मैः शोभितो ध्येय एव हि ॥

—इति ब्रह्माण्डपुराणे ।

* अथ श्लोकः रुक्मिणीशविजयेऽपि दृश्यते (7/35)। तत्रत्यव्याख्यानं तु—

कालिंदितिं । हे कालिंदि त्वं अघेन पापेनान्वितान् युक्तानपि सतः मज्जनान्पवित्रात्मनः पूतात्मनः कृत्वा तव भ्रातुर्यमस्य निकेतं प्रति गृहं प्रति गंतुमेव न मुंचसि । यातना तु दूरतोऽपास्तेति भावः । किंतु प्रीता त्वमाश्रितान् तान् क्षीरपयोब्धिवासनिरतान् क्षीरसमुद्रमध्यस्थश्वेतद्वीपवासिनः

सज्जनान् । **पवित्रात्मनः** पवित्रातःकरणान् । **कृत्वा तव भ्रातुः** यमस्य । **निकेतं** गृहं **प्रति** । **गंतुं** । **कदापि** कदाचिदपि । **नैव मुंचसि** । यमुनासेविनां यमलोकगमनं नास्तीत्यर्थः । **किंतु त्वं प्रीत्या क्षीरपयोधि-वासनिरतान्** क्षीरपयोधिवासे क्षीराब्धीवासे श्वेतद्वीपवास इत्यर्थः । निरतान् **करोषि** । तथाहि । **भर्तरि** पत्यौ **स्निग्धे** स्नेहयुक्ते सति । **कामिनी-जनरुचिः** कामिनीजनस्य स्त्रीजनस्य रुचिः । **अलं तत्पक्ष एव** भर्तृपक्ष एव । **हि** प्रसिद्धम् । न तु पितृपक्ष इत्यर्थः । सामान्येन विशेषसमर्थन-रूपोऽर्थांतरन्यासः । ॥ १२ ॥

त्रिवेणी

त्रिवेणीयमघश्रेणीकृपाणी मुक्तिकारिणी ।
ममानीहितमादह्याद्धिमानीमंशुमानिव ॥ १३ ॥

त्रिवेणीं वर्णयति । **त्रिवेणीति** । **अघश्रेणीकृपाणी** अघश्रेण्याः पापपंक्तेः कृपाणी कर्तरी । कृपाणी कर्तरीसमेत्यमरः । अघच्छेत्रीत्यर्थः । **मुक्तिकारिणी** मुक्तिप्रदा । **इयं त्रिवेणी** सरस्वतीयमुनासमेता या गंगा सा

करोषि । कालिंदीनिषेवणानंतरं नरकादर्शनं कर्मक्षयः साक्षान्मुक्तिश्च भवतीति भावः । तथाहि भर्तरि स्निग्धे स्नेहयुक्ते सति । क्षीरसमुद्रस्य तु चिक्कण-त्वारूयगुणयुक्तत्वात्स्निग्ध इत्युक्तम् । अत एव श्लिष्टगर्भोऽर्थांतरविन्यासः । कामिनीनां कामवतीनां नारीणां जनस्य रुचिः प्रीतिरलमत्यर्थं तस्य भर्तुः पक्ष एव हि भर्तृप्रेमातिजन्मसुखाभिज्ञत्वात् । अस्माकमपि भर्तारं दिशेति भावः । श्वेतद्वीपं प्रति प्रेषणेन श्रीकृष्णसंघटकत्वशक्तिरस्तीति ध्वन्यते । पूर्वार्धेन श्रीकृष्णविरहेण त्वत्तीरस्थानामस्माकं यमलोकप्राप्तिरपि त्वया परिहार्या । श्रीकृष्णसंगमप्रतिबंधकदुरितध्वंसोऽपि कार्य इति ध्वन्यते ।" इति

*त्रिवेणीत्युच्यते । **मम अनीहितं** अनिष्टं । **हिमानीं** हिमसंहतिं । 'हिमानी हिमसंहति'रित्यमरः । **अंशुमानिव** सूर्य इव । **आदह्यात्** दहतु । दह भस्मीकरण इति धातोर्लिङ् । ॥ १३ ॥

---

* ब्रह्मज्ञानेन वा मुक्तिः **प्रयागमरणेन वा** ।
अथवा स्नानमात्रेण गोमत्यां कृष्णसन्निधौ ॥
—इति गीताभाष्योदाहृत (III. 20) कूर्मपुराणवचनम्[1] ।

ब्राह्मीनपुत्री त्रिपथास्त्रिवेणी समागमे तुक्षतयोगमात्रान् ।
यत्र प्लुतान् ब्रह्मपदं नयंति स तीर्थराजो जयति प्रयागः ॥
श्यामो वटोऽश्यामगुणं वृणोति स्वच्छायया श्यामलया जनानाम् ।
श्यामः श्रमं कृंतति यत्र दृष्टः स तीर्थराजो जयति प्रयागः ॥
—इति पद्मपुराणे—उत्तरकाण्डे प्रयागमाह्यम्त्ये ।

सितासिते सरिते यत्र संगते तत्राप्लुतासो दिवमुत्पतंति ।
ये वै तन्वं विसृजंति धीरास्ते जनासो अमृतत्वं भजंते ॥
—इति ऋग्वेदे ।

सितासिते यत्र तरंगचामरे नद्यौ विभाते मुनिभानुकन्यके ।
नीलातपत्रं वट एव साक्षात् स तीर्थराजो जयति प्रयागः ॥ (?)
गंगायमुनयोर्मध्ये स्नाति यः संगमे नरः ।
दशश्वमेधानाप्नोति कुलं चैव समुद्धरेत् ॥
पवित्रमृषिभिर्जुष्टं पुण्यं पावनमुत्तमम् ।
गंगायमुनयोर्वीर संगमं लोकविश्रुतम् ॥
यत्रायजत भूतात्मा पूर्वमेव पितामहः ।
प्रयागमिति विख्यातं तस्माद् भरतसत्तम ॥
—इति भारते (वनपर्वणि 87/18, 19)

---

[1] 'इत्यादौ, तत्र पापान्मुक्तिः, स्तुतिपरता च ।' इति तत्रैव निर्णयोऽपि प्रदर्शितः श्रीमदाचार्यैः ।

प्रयागमाधवः

प्रयागमाधवो भूयाद्दयावारिनिधिर्हृदि ।
प्रकृष्टयागसदृशी सकृद्यस्य हि संस्मृतिः ॥ १४ ॥

प्रयागमाधवं वर्णयति । **प्रयागेति** । **दयावारिनिधिः** दयया वारिनिधिरिव वारिनिधिः । **प्रयागमाधवः हृदि** मनसि । **भूयात्** स्मृतिविषयो भवत्वित्यर्थः । किमर्थमित्यत आह **प्रकृष्टेति** । **यस्य** प्रयागमाधवस्य । **सकृत् संस्मृतिः** सकृत् स्मरणं **प्रकृष्टयागसदृशी** प्रकृष्टस्य यागस्य अश्वमेधयागस्य सदृशी समाना । तस्य यत्फलं तत्फलं प्रयागमाधवस्मरणस्यापीत्यर्थः । प्रकृष्टयागसदृशस्मृतिविषयत्वात् प्रयागमाधव इति भावः ॥

भागीरथी

त्वं दीनेषु दयावतीति विदितं यद्ब्रह्महस्ताश्रयं
प्राप्ताऽथाच्युतपादसंगमहिता पश्चाच्च नाकं श्रि(ग)ता ।
सौवर्णाचलशृंगमेत्य मुदिता शंभोश्शिरस्संगताऽ-
प्यास्माकक्षितिमंडले त्रिपथगे तुष्टास्यभीष्टप्रदा ॥ १५ ॥

श्रीभागीरथीं वर्णयति । **त्वमिति** । **हे त्रिपथगे** भागीरथि त्रिषु पथिषु स्वर्गमर्त्यपातालेषु गच्छतीति त्रिपथगा तस्याः संबुद्धिः । 'भागीरथी-त्रिपथगे'त्यमरः । **त्वं दीनेषु** कृपणेषु । **दयावतीति विदितं** ज्ञातं । **यत्** यस्मात् कारणात् । [पूर्वं] **ब्रह्महस्ताश्रयं** चतुर्मुखहस्ताश्रयं । **प्राप्ता** ब्रह्मांडं भित्वा गतायाः ब्रह्मणा कमंडलौ धृतत्वादिति भावः । **अथ** अनंतरं । **अच्युतपादसंगमहिता** अच्युतस्य श्रीनारायणस्य पादसंगेन ब्रह्मणा तत्पादप्रक्षालनस्य कृतत्वान्महिता पूजिता । विष्णुपदीति सर्वैराद्रतेत्यर्थः । **पश्चान्नाकं** दिवो मूर्धानं । **श्रिता** । [पश्चात्] **सौवर्णाचलशृंगं** सुवर्णात्मकमेरुमूर्धानं । **एत्य** प्राप्य । **मुदिता** संतुष्टा । [अनंतरं] **शंभोः शिरस्संगताऽपि** इतोऽधिकस्थले संगताऽपीत्यर्थः । **आस्माकक्षितिमंडले**

अस्माकमिदमास्माकं च तत्, क्षितिमंडलं च तस्मिन् । [1]'तस्मिन्नणि च युष्माकास्माकवि'ति आस्माकादेशः । **अभीष्टप्रदासि तुष्टासि** । उत्तमस्थलादन्यत्र गमने निजजनेषु दयैव निमित्तमिति भावः । ॥ १५ ॥

आदौ पादतलोर्ध्वभागमहसा या रक्तनीला हरेः
स्वर्गस्त्रीकुचकुंकुमांकनयनोपांतश्रियाऽभ्यंतरे ॥
अंते शंभुकपर्दपन्नगगलश्रेणीज्वलज्ज्योतिषा
जन्मारभ्य सरस्वतीनतनयासंगेव गंगाऽस्ति सा ॥ १६ ॥

आदाविति । **या** गंगा । **आदौ** विष्णुपादान्निस्सरणकाले । **हरेः** श्रीनारायणस्य **पादतलोर्ध्वभागमहसा** पादतलं च तदूर्ध्वभागश्चेति द्वंद्वसमासः । तयोर्महसा कांत्या । कांत्युत्सवौ तु महसीति रत्नमाला । **रक्तनीला** रक्ता च सा नीला चेति समानाधिकरणसमासः । [या] गंगा । **अभ्यंतरे** मध्ये । **स्वर्गस्त्रीकुचकुंकुमांकनयनोपांतश्रिया** स्वर्गस्त्रीणां स्नानार्थमागतानां कुचेषु यः कुंकुमांकः काश्मीरपंकलेपः कुंकुमाख्यालंकार इति वा । 'अंको नाटक विच्छेदे संख्यायां युधि भूषण' इति रत्नमाला । नयनयोरुपांतः कटाक्षस्तयोः श्रिया कांत्या रक्तनीला । कुचकुंकुमांकश्रिया रक्ता । कुंकुमस्यारुणत्वात् । कटाक्षकांत्या नीला । कटाक्षस्य नीलत्वात् । [या] गंगा **अंते शंभुकपर्दपन्नगगलश्रेणीज्वलज्ज्योतिषा** शंभोः शिवस्य कपर्दः जटासमूहस्तस्य । पन्नगानां भूषणभूतसर्पाणां गलश्रेणी कंठपरंपरा च तयोर्ज्वलज्ज्योतिषा । उज्वलकांत्या । **रक्तनीला** शंभुकपर्दज्योतिषा रक्ता । शंभुकपर्दस्यारुणत्वात् । पन्नगगलश्रेणीज्योतिषा नीला । पन्नगगलश्रेणीनां नीलत्वात् । **सा गंगा जन्मारभ्य** न केवलं प्रयाग एव किंतु उत्पत्तिस्थानमारभ्येत्यर्थः । **सरस्वतीनतनयासंगेव** सरस्वती च इनस्य सूर्यस्य तनया यमुना च । तयोस्संगो यस्यास्सा तथोक्तैव । **अस्ति** वर्तते ।

---

[1] 'तस्मिन्नणि च युष्माकास्माकौ'—(पा. सू. 4/3/2)

सरस्वतीजलस्य अरुणत्वाद्यमुनाजलस्य नीलत्वाच्चेति भावः । **उत्प्रेक्षालंकारः** । ॥ १६ ॥

अज्ञानाद्यदि सज्जनेषु रचितद्रोहान्मया स्वर्धुनि
स्वस्फूर्त्या सुजनेषु दूषणगणारोपादवज्ञा तव ।
तर्हि त्वां सगरात्मजास्थिनिकरा जानंति किं तैः प्रभौ
द्रोहः किं न कृतः किमंब न हरावरोपिता चोरता ॥१७॥

अज्ञानाद्यदीति । हे **स्वर्धुनि** स्वर्गनदि । **तव मयि अवज्ञा** अवमानः । 'रीढावमाननावज्ञे'त्यमरः । **अज्ञानाद्यदि** अहमज्ञानीति कृत्वेत्यर्थः । अथवा **सज्जनेषु रचितद्रोहात्** कृतापराधनिमित्तात् । **स्वस्फुर्त्या** स्वप्रतिभया वा । **सुजनेषु** वैष्णवजनेषु । **दूषणगणारोपात्** अविद्यमानदोषकथनाद्वा जायते चेदज्ञानादिमत्कृतदोषत्रयान्मयि कृपां न करोषि चेदित्यर्थः । आद्यं दूषयति । तर्हीति **तर्हि सगरात्मजास्थिनिकराः** सगरात्मजानां सगराख्यराज्ञः पुत्राणां अस्थिनिकराः । अस्थां निकराः **त्वां जानंति किं** जडत्वेन ज्ञानशून्यानां सगरतनयदेहास्थिनिकराणां मज्जनादपि तेषां कुमाराणां त्वया स्वर्गतिर्दत्ता । तथाहमपि अज्ञान्येव सन् यद्यपि त्वयि मज्जामि तथाप्यज्ञानं निमित्तीकृत्य मय्यवज्ञाकरणं न घटत इति भावः । द्वितीयपक्षोऽपि न घटत इत्याह । तैरिति । **तैः** सगरात्मजैः । **प्रभौ** स्वामिनि कपिले । **द्रोहः** शस्त्रताडनादिना प्रहारः । **न कृतः किं** कृत एवेत्यर्थः । तस्मात् सज्जनद्रोहं निमित्तीकृत्यावज्ञा क्रियत इति द्वितीयः पक्षोऽप्यनुपपन्न एवेत्याशयः । अंत्यं दूषयति । किमंबेति । **हे अंब** मातः । अंबेत्यनेन मात्रा पुत्रापराधः क्षंतव्य एवेति द्योत्यते । **तैः** सगरात्मजैः । **हरौ** कपिलाख्ये **चौरता** चोरत्वं । **नारोपिता किं** आरोपितैवेत्यर्थः । तस्मात् सुजनेषु दूषणगणारोपं निमित्तीकृत्यावज्ञाक्रियत इति तृतीयः पक्षोऽप्यनुपपन्न एवेति भावः । तथाऽपि तेषु यथा करुणा कृता तथा मयि कृपां

कृत्वा मन्निष्ठाज्ञानादिदोषनिकरः परिहर्तव्य इति तात्पर्यार्थः । इयं कथा तु श्रीमद्भागवतादौ[1] प्रसिद्धैवेति भावः ।

आरभ्याब्जजलोकमाक्षितितलादायातया किं त्वया
मच्चित्तं बहुदूरमित्यम(ब)लया त्यक्तं भिया जाह्नवि ।
अक्षय्याचलतुंगशृंगनिकरान्निर्भिद्य यांती मम
स्वल्पं किं बहुमन्यसेऽशुभकुलं गंगेऽतरंगे चलम् ॥ १८ ॥

आरभ्येति । हे जाह्नवि जह्नोरपत्यं स्त्री जाह्नवी तस्याः संबुद्धिः । **अब्जजलोकं** अब्जाज्जलजाज्जायत इत्यब्जजो ब्रह्मा । तस्य लोकमित्यर्थः । **आरभ्य आक्षितितलात्** भूलोकपर्यंतं । आङीषदर्थेऽभिव्याप्तौ मर्यादाभिविधावपि । **आयातया** बहुदूरमागतयेत्यर्थः । **अमलया** निर्मलया । **त्वया मच्चित्तं** मन्मनः । **बहुदूरमिति भिया** भीत्या । **त्यक्तं किं** पंचविंशतिकोटियोजनदूरगमनसमर्थया त्वया निकटस्थमच्चित्तं किमर्थं त्यज्यत इत्यर्थः । मद्ध्यानपथे सदा भवेति तात्पर्यार्थः । **हे गंगे अक्षय्याचलतुंगशृंगनिकरान्** अक्षय्याः क्षेतुमशक्याः । 'क्षय्यजय्यौ शक्यार्थ'[2] इत्यादेशः । अचलाः

---

[1] प्रागुदीच्यां दिशि हयं ददृशुः कपिलांतिके ।
एष वाजिहरश्चौर आस्ते मीलितलोचनः ॥
हन्यतां हन्यतां पापः इति षष्ठिसहस्रिणः ।
उदायुधा अभिययुरुन्मिमेष तदा मुनिः ॥
स्वशरीराग्निना तावन्महेन्द्रहृतचेतसः ।
महद्व्यतिक्रमहता भस्मसादभवन् क्षणात् ॥
....
अश्वोऽयं नीयतां वत्स पितामहपशुस्तव ।
इमे च पितरो दग्धा गंगांभोऽर्हंति नेतरत् ॥
—इत्यादि श्रीमद्भागवते (IX. viii. 10–12, 29)

[2] 'क्षय्यजय्यौ शक्यार्थे'—पा. सू. 6/1/81.

पर्वताः तेषां तुंगानि उच्चानि शृंगाणि । सानूनि । 'शृंगं प्राधान्यसान्वोश्चेत्यमरः । तेषां निकरान् समूहान् । **निर्भिद्य यांती** गच्छंती त्वम् । **मम अंतरंगे** मनसि स्थितं । **चलं** त्वन्नामस्मरणादेवास्थिरं । **स्वल्पं अशुभकुलं** पापसमूहं । **बहु मन्यसे किं** । अक्षय्याचलभेदनसमर्थया त्वया ममांतःकरणस्थचलपापनिर्भेदनं न बहु मंतव्यमिति भावः । मत्पापं परिहरेति[1] तात्पर्यम् । **पर्यायोक्तमलंकारः** । 'पर्यायोक्तं तु गम्यस्य वचो भंग्यंतरेण यदि'त्युक्तत्वात् । ॥ १८ ॥

अस्थिस्पर्शनमात्रतः किमु तव श्रेयःप्रदत्वं गतं
विस्तीर्णा न किमच्युतस्य नगरी मन्मात्रदेशोज्झिता ।
तद्वर्त्मापि सकंटकं किमु सतां संतानजोऽहं न किं
कस्मादंब न मे प्रदास्यसि पदं गंगेऽखिलार्थप्रदम् ॥१९॥

अस्थीति । **हे गंगे अस्थिस्पर्शनमात्रतः** सगरात्मजानामस्थिस्पर्शनमात्रेण । **तव श्रेयःप्रदत्वं गतं किमु** न गतमित्यर्थः । **अच्युतस्य नगरी** वैकुंठपुरी । **विस्तीर्णा** विस्तृता । **न किं** । **मन्मात्रदेशोज्झिता किं** विस्तीर्णाऽपि मन्मात्रावस्थानप्रदेशेन त्यक्ता किम् । मन्मात्रावस्थितौ प्रदेशरहिता किमित्यर्थः । [अथवा] **तद्वर्त्मापि** वैकुंठमार्गोऽपि । **सकंटकं**[2] **किमु** । **अहं सतां** वैष्णवानां **संतानजो न किं** संताने कुले जात इति न भवामि किम् । अत्र सर्वत्र किं शब्द आक्षेपे । इष्टाप्रदानकारणमेतच्चतुष्टयमपि नास्तीत्यर्थः । **हे अंब** मातः गंगे । **कस्मात्** कारणात् । **मे अखिलार्थप्रदं** समस्तपुरुषार्थपदं । **पदं** हरिस्थानं वैकुंठमित्यर्थः । **न प्रदास्यसि** अवश्यं दातव्यमित्यर्थः । ॥ १९ ॥

---

[1] न गंगासदृशं तीर्थं न देवः केशवात् परः ।
—इति भारते (III. 85, 96)

[2] एष निष्कण्टकः पन्था यत्र संपूज्यते हरिः ।—इति भारते ।

हे गंगे तव कोमलांघ्रिनलिनं रंभोरु नीवीलसत्-
कांचीदाम तनूदरं घनकुचव्याकीर्णहारं वपुः ।
सन्मुद्रांगदकंकणावृतकरं स्मेरं स्फुरत्कुंडलं
सारंगाक्षि जलान्यदिंदुरुचि ये जानंति तेऽन्ये जलात् ॥ २० ॥

हे गंग इति । **हे गंगे कोमलांघ्रिनलिनं** कोमलं सुकुमारं अंघ्रिनलिनं पादकमलं यस्य तत्तथोक्तम् । **रंभोरु** रंभावत् कदलीवदूरू यस्य तत् तथोक्तम् । **नीवीलसत्कांचीदाम** नीव्यां लसत् कांचीदाम यस्य तत् तथोक्तम् । **तनूदरं** तनु कृशमुदरं यस्य तत् तथोक्तम् । **घनकुचव्याकीर्णहारं** घनयोः कुचयोः व्याकीर्णः पर्यस्तः हारो यस्य तत् तथोक्तम् । **सन्मुद्रांगदकंकणावृतकरं** सद्भिः मुद्राभिरंगुलीयकैरंगदैर्बाहुभूषणैः कंकणैः करभूषणैश्च आवृतौ आच्छादितौ करौ यस्य तत् तथोक्तम् । **स्मेरं** सस्मितं । **स्फुरत्कुंडलं** स्फुरती शोभमाने कुंडले ताटंके यस्य तत् तथोक्तम् । **सारंगाक्षि** सारंगवत्कुरंगवदक्षिणी यस्य तत् तथोक्तम् । **इंदुरुचि** इंदोश्चंद्रस्य रुचिरिव रुचिर्यस्य तत् तथोक्तम् । शुभ्रमित्यर्थः । **तव वपुः** शरीरं । **जलान्यत्** जलभिन्नमिति । **ये जानंति ते** जनाः । **जलात्** जडात् । मूर्खादिति यावत् । **अन्ये** भिन्नाः । 'जलं नीरे जडेष्वपीति' भास्करः । ज्ञानिन इत्यर्थः । 'नद्यम्मयानि तीर्थानि न देवा मृच्छिलामया' इति **स्मृतेः*** ॥

श्रीनारायणरामगोपतिहृषीकेशादिरूपोऽक्षम-
स्त्वां हातुं हरिसूकराकृतिरथ श्रीदेवहूत्यात्मजः ।
वेणीमाधवबिंदुमाधवतनुस्तीरे व्यधत्त स्थितिं
गंगे किं बहुनाऽधुनाऽपि वसति त्वद्भर्तृगेहे ह्यसौ ॥ २१ ॥

श्रीनारायणेति । **हे गंगे असौ** तव पिता नारायणः । **त्वां हातुमक्षमः** [इव] समुद्राख्यपतिगृहं यांतीं त्वां प्रेम्णा त्यक्तुमसमर्थ इव ।

---

* भागवते (X. 84-11, X. 48. 31)

श्रीनारायणरामगोपतिहृषीकेशादिरूपः । श्रीनारायणो बदरिकाश्रमे । रामदेवः प्रयागाख्ये । अलकनंदिनी भागीरथीति द्विरूपगंगासंगमे गोपतिः गोपालकृष्णः । तपोवने चतुर्विंशतिमूर्तिषु मध्ये हृषिकेशः आदिपदेनजह्नक्षेत्रे विद्यमानः **अनंतशयनः** । हस्तिनपत्तने व्यासाश्रमादौ विद्यमानो **गोविंदव्यासादिरूपो नारायणो** गृह्यते। **हरिसूकराकृतिः** हरिद्वारे चतुर्विंशतिमूर्तिषु विद्यामानहरिरूपो नारायणः । सूकरः **श्वेतवराहः** सूकरक्षेत्रे । **अथ** अनंतरं **श्रीदेवहूत्यात्मजः कपिलः** । **वेणीमाधवबिंदुमाधवतनुः वेणीमाधवः** प्रयागे । **बिंदुमाधवः** काश्यां चेति तनवो यस्य स तथोक्तः । माधवपदेन गंगासागरसंगमस्थउदारमाधवो गृह्यते । **तीरे** तव तीरे **स्थितिं** आवासं । **व्यधत्त** कृतवान् । **किं बहुना** बहुनोक्तेन किं । **अधुनाऽपि त्वद्भर्तृगेहे** समुद्रे । **वसति हि** । हरेः समुद्रशायित्वादिति* भावः । 'यमंतःसमुद्रे कवयो वयंती'त्यादिश्रुतिप्रसिद्धिं **हि** शब्देनाह । अनेन बदरीकाश्रममारभ्य समुद्रपर्यंतं गंगातीरे विष्णुमूर्तयः तिष्ठंतीत्युक्तं भवति । ॥२१॥

गंगे त्वं शुभसंचयस्य जयदा दोषात्मनां न त्विति
ज्ञातं यत्क्रतुकोटिलभ्यसुकृतस्याभ्युन्नतिं यच्छसि ।
दुष्कर्माण्यमितानि दूरयसि यत्त्वद्ध्येयतोयेक्षया
पानेनाप्यवगाहनेन मनसा ध्यानेन गानेन वा ॥ २२ ॥

गंग इति । **हे गंगे त्वं शुभसंचयस्य** शुभानां शुभजीवानां संचयस्य समूहस्य । **जयदा** । **दोषात्मनां तु** पापिनां तु **न** [जयदा] **इति** तत्त्वम् । **ज्ञातं** विदितं । कथमित्यत आह । **यत्** यस्मात् कारणात् । **त्वं त्वद्ध्येयतोयेक्षया** तव स्तुत्यजलस्य ईक्षया दर्शनेन । **पानेनापि** अपिशब्दो विकल्पार्थः । **अवगाहनेन** स्नानेन । **मनसा ध्यानेन गानेन वा** स्तुत्या वा । **क्रतुकोटिलभ्यसुकृतस्य** क्रतुकोटिभिः प्राप्य-

---

* मम योनिरप्स्वंतः समुद्रे—इति अभृणीसूक्ते (ऋग्वेदे 10/125/7)

पुण्यस्य । **अभ्युन्नतिं** अभिवृद्धिं । **यच्छसि** प्रयच्छसि । अनेन शुभसंचयस्य जयदेत्युपपादितम् । शुभपदवाच्यत्वात् सज्जनानां सुकृतस्य च । **अमितानि** अपरिमितानि । **दुष्कर्माणि** पापानि । **दूरयसि** दूरीकरोषि तिरस्करोषीत्यर्थः । अनेन पापात्मनां नेत्युपपादितम् । दुर्जनानां पापस्य च दोषस्वरूपत्वेन दोषात्मपदवाच्यत्वात् । दर्शनस्नानादिना क्रतुकोटिजनितपुण्यदात्री ब्रह्महत्यादिसमस्तपापक्षयकरीति[1] भावः । ॥ २२ ॥

काशीक्षेत्रम् [2]

रूप्याचले कृतपदोऽपि गिरींद्रपुत्रीप्रेमप्रवाहभरमानितमानसोऽपि ।
काशीमसीवरुणयोः पुरमंतराले प्रेतावृतामपि सतीपतिरध्यतिष्ठत् ॥२३॥

---

[1] सर्वं कृतयुगे पुण्यं त्रेतायां पुष्करं स्मृतम् ।
द्वापरेऽपि कुरुक्षेत्रं गंगा कलियुगे स्मृता ॥
यावदस्थि मनुष्यस्य गंगायाः स्पृशते जलम् ।
तावत् स पुरुषो राजन् स्वर्गलोके महीयते ॥
—इति महाभारते (III. 85/90–94)

गंगा गंगेति यो ब्रूयाद्योजनानां शतैरपि ।
मुच्यते सर्वपापेभ्यः विष्णुलोकं स गच्छति ॥

[2] भूमिष्ठाऽपि न यत्र भूस्त्रिदिवतोऽप्युच्चैरधःस्थाऽपि या
या बद्धा भुवि मुक्तिदाः स्युरमृता यस्यां मृता जंतवः ।
या नित्यं त्रिजगत्पवित्रतटिनीतीरे सुरैः सेव्यते
सा काशी त्रिपुरारिराजनगरी पायादपायाज्जगत् ॥
—इति स्कंदपुराणे—काशीखण्डे—वाराणसीमाहात्म्ये ।

वाराणसी तु भुवनत्रयसारभूता रम्या नृणां सुगतिदा किल सेव्यमाना ।
अत्रागता विविधदुष्कृतकारिणोऽपि पापक्षये विरजसः सुमनःप्रकाशाः
—इति नारदीयपुराणे ।

काशीं वर्णयति । **रूप्याचल** इति । **रूप्याचले** रजताद्रौ । 'दुर्वर्णं रजतं रूप्य'मित्यमरः । **कृतपदोऽपि** कृतं पदं स्थानं येन स तथोक्तस्तथापि । अत्युत्तमस्थले स्थितोऽपीति यावत् । **गिरींद्रपुत्रीप्रेमप्रवाहभरमानितमानसोऽपि** गिरींद्रस्य हिमाद्रेः पुत्री पार्वती तस्याः प्रेमप्रवाहभरः स्नेहोद्रेकातिशयः तेन मानितं सत्कृतं मानसं मनो येन स तथोक्तस्तथापि । पार्वतीविलासेन सत्कृतोऽपीत्यर्थः । **सतीपतिः** दाक्षायणीपतिः शिवः **असीवरुणयोः** नद्योः । **अंतराले** मध्ये स्थितां **प्रेतावृतामपि** प्रेतैः परेतैरावृतां व्याप्तामिति । "परायुः प्राप्तपंचत्वपरेतप्रेतसंस्थिता" इत्यमरः । **अपि**शब्दो गर्हायां । प्रेतावृतत्वेन जुगुप्सितामपीत्यर्थः । **काशीं** काश्याख्यां । **पुरं** "पूस्त्रीपुरीनगर्यौ"वेत्यमरः । **अध्यतिष्ठत्** काश्यामावासमकरोदित्यर्थः ॥ [1]अधिशीङ्स्थासां कर्मेत्याधारस्य कर्मत्वं । जुगुप्सितस्यापि काशीक्षेत्रस्य[2] कैलासाधिपतिमनःप्रियत्वं बहुतरपुण्यप्रदत्वादेवेति भावः । ॥ २३ ॥

काशीस्थो बिंदुमाधवः

स बिंदुमाधवः पायाद्विभोर्यस्य निरीक्षणात् ।
अपारोऽपि हि संसारसिंधुर्बिंदुत्वमश्नुते ॥ २४ ॥

तत्र बिंदुमाधवं वर्णयति । **स** इति । **विभोः** समर्थस्य **यस्य**

अहं काशीं गमिष्यामि तत्रैव निवसाम्यहम् ।
इति ब्रुवाणः सततं काशीवासफलं लभेत् ॥—इति च ।
'काश्यां तु मरणान्मुक्तिः—' इति च ।

[1] 'अधिशीङ् स्थासा कर्म'—पा. सू. 1/4/46

'आप इव काशिना संगृभीताः मघवन् काशिरित्ते'—इति ऋग्वेदे ।

[2] 'यज्ञः काशीनां भरतः सात्वतामिव'—इति शतपथब्राह्मणे ।

'तेनोपयातेन कदाचनाथ **वाराणसीं** पापनिवारणेन ।'

—इत्यादि सुमध्वविजये (X. 37-48)

बिंदुमाधवस्य । **निरीक्षणात्** । **अपारोऽपि** पाररहितोऽपि **संसारसिन्धुः** संसाराख्यसमुद्रः । **बिन्दुत्वं** जलकणमात्रत्वं **अश्नुते** आप्नोति । **हि** प्रसिद्धं । **स बिन्धुमाधवः** संसारसिंधोर्बिंदुत्वापादकत्वाद्बिंदुमाधवाख्यो विष्णुः [मां] पायात् । **विन्द्वाख्यमुनेः प्रसन्नत्वाद्बिंदुमाधवसंज्ञितस्य प्रकारांतरेण वर्णनादुत्प्रेक्षालंकारः** । "यथार्थस्यान्यथाकल्पनिरुत्प्रेक्षेति विदो विदु"रिति वचनात् । ॥ २४ ॥

काशीस्थः विश्वनाथः

दोषं मे हर हे हरेति पतितं पादे नखच्छद्मना
निर्दोषं मृगबिंबमेणहरणात् कृत्वैव मूर्ध्नि न्यधात् ।
गंगातीरनिवासतः शुचितमं कुर्वन्निवाहीश्वरा-
संगात्तत् प्रथयन्निव प्रतिदिनं पायात् स मृत्युंजयः ॥ २५ ॥

विश्वनाथं वर्णयति । **दोषमिति** । **हे हर** रुद्र । **मे** मम । **दोषं** कलंकाख्यं । **हर** परिहर । **इति नखच्छद्मना** नखव्याजेन । "कपटो स्त्री व्याजदंभोपधयश्छद्मकैतवे" इत्यमरः । **पादे पतितं मृगबिंबं** मृगः बिंबे मंडले यस्य स तथोक्तस्तं शशांकं । **एणहरणात्** मृगपरिहरणात् । **निर्दोषं** कलंकरहितं । **कृत्वैव** मृगमपहृत्य हस्ते धृत्वा स्वपादे पतितं चंद्रं निष्कलंकं कृत्वैवेत्यर्थः । **गंगातीरनिवासतः** स्वशरीरस्थप्रशस्तभागीरथी-तीरनिवासेन । **शुचितमं** अत्यंतशुद्धं **कुर्वन्निव** । **अहीश्वरासंगात्** अहीश्वराणां भूषणभूतानां सर्पाणामासंगात् सम्यक् स्पर्शात् । **तत्** निर्दोषत्वं । **प्रथयन्निव** सर्पस्पर्शनलक्षणदृष्टांतात् सम्यक्प्रकटयन्निव । **मूर्ध्नि** शिरसि । **न्यधात्** धृतवान् । चंद्रशेखरत्वादिति भावः । **स मृत्युंजयः** शिवः **प्रतिदिनं पायात्** चंद्रधारणे हेतूनामुत्प्रेक्षणात् **मालोत्प्रेक्षालंकारः** । ॥२५॥

मौलौ यच्चरणांबु फालफलके यस्यांघ्रिरेणुः कथा
कर्णे वाचि यदीयनाम हृदि यद्रूपं यदास्वादितम् ।
कुक्षौ यत्तपसेऽपटं कटितटं व्याघ्राजिने संस्थितिः
पादौ यत्पुरचारिणौ स हि सदा तत्किंकरः शंकरः ॥ २६ ॥

श्रीविश्वनाथस्य हरिभक्तत्वमुपपादयितुमाह । **मौला**वित्ति । **यस्य** शिवस्य **मौलौ** शिरसि । **यच्चरणांबु** यस्य विष्णोस्संबंधि पादोदकं । यस्य शिवस्य **फालफलके** ललाटफलके । [तस्य] विष्णोः **अंघ्रिरेणुः** पादरजस्तिष्ठति । यस्य शिवस्य **कर्णे** विष्णोः **कथा** तिष्ठति । इति सर्वत्र योज्यं । यस्य शिवस्य **वाचि यदीयनाम** यदीयं विष्णोस्संबंधि च तन्नाम च । यस्य शिवस्य **हृदि** हृदये **यद्रूपं** विष्णोः रूपं । यस्य शिवस्य **कुक्षौ** जठरे **यदास्वादितं** यद्विष्णूच्छिष्टं । **यस्य** शिवस्य **कटितटं** जघनप्रदेशः **यत्तपसे** यद्विषयकतपश्चरणार्थं । **अपटं** पटरहितं अभवत् दिगंबरत्वादिति भावः । [यत्तपसे] यद्विषयकज्ञानाय "तप आलोचन" इति धातोः । **व्याघ्राजिने** शार्दूलचर्मणि । **संस्थितिः** उपवेशनं । यस्य शिवस्य । **पादौ यत्पुरचारिणौ** यस्य विष्णोः क्षेत्रं प्रति संचारिणौ । **हि** यस्मात् कारणात् । **सः शंकरः** शिवः । **सदा तत्किंकरः** तस्य विष्णोर्दासः । शिवस्य विष्णुभक्तत्वं शिरआदिपादपर्यंतावयवव्यापारदर्शने सति सर्वेषां प्रसिद्धमिति द्योतनाय हि शब्दः—

"यच्छौचनिस्सृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्न्यधिधृतेन शिवश्शिवोभूत् ।"
"यत्पादपंकजरजश्शिरसा बिभर्ति श्रीरब्जजश्च गिरिशः सह लोकपालैः ॥"
"पायं पायं श्रुतिचुलकितं रामनामामृतं यः
ध्यायं ध्यायं मनसि सततं ब्रह्म तत्तारकाख्यम् ।
जल्पं जल्पं प्रकृतिविकृतौ प्राणिनां कर्णमूले ।
वीथ्यां वीथ्यामटति जटिलः कोऽपि काशीनिवासी ॥"
"यज्ञवाटगतं सर्वमुच्छिष्टमृषयःक्वचित् ।
चक्रुर्हि भागं रुद्राय स देवः सर्वमर्हति ॥
यमुद्दिश्य सदा नाथं महेशोऽपि दिगंबरः ।
जटी भस्मावलिप्तांगस्तपस्वी वीक्ष्यते जनैः ॥"

"भवश्च भूतभव्येशो यक्षभूतगणैर्वृतः ।
द्वारकामुपसंजग्मुः सर्वे कृष्णदिदृक्षवः ॥"
—इत्यादिप्रमाणप्रसिद्धिं हि शब्देन सूचयति ॥ ॥ २६ ॥

गयाक्षेत्रम *

गयाभिधमिदं क्षेत्रं श्रये श्रेयस्करं नृणाम् ।
न यत्र सहते जातु क्रिया जन्मांतरक्रियाम् ॥ २७ ॥

गयां वर्णयति । **गयेति** । **नृणां श्रेयस्करं** पुण्यकरं । **इदं गयाभिधं** गयाख्यं **क्षेत्रं श्रये** आश्रये । **यत्र** गयाख्यक्षेत्रे । **जातु** सकृदपि । **क्रिया** पिंडप्रदानाख्यं कर्म । **जन्मांतरक्रियां** जन्मांतरे क्रियमाणपिंडप्रदानादिक्रियां । **न सहते** सकृत्पिंडदानेनैव वैकुंठप्राप्त्या पुनर्जन्माभावाज्जन्मांतरक्रियमाणक्रियां न सहत इत्यर्थः । ॥ २७ ॥

गयास्थो गदाधरः

गदाधर सदाधरस्फुरितचारुहासोल्लस-
त्सुधाधर मुदाधरामरकृतस्तुते सुन्दर ।
पदा धर मदाधरस्खलितमीश मां सद्वर-
प्रदाधरचिदादरप्रमुदितांतर श्रीधर ॥ २८ ॥

गदाधरं स्तौति । **गदाधरेति** । **सदा** सततं । **अधरस्फुरित-चारुहासोल्लसत्सुधाधर** । अधरे अधरोष्ठे स्फुरितः उत्पन्नः । चारुर्मनोहरः ।

---

* एष्टव्या बहवः पुत्राः यद्येकोऽपि गयां व्रजेत् ।
यजेत वाऽश्वमेधेन नीलं वा वृषमुत्सृजेत् ॥
—इति महाभारते ।

जीवतो वाक्यकरणात् प्रत्यब्दं भूरिभोजनात् ।
गयायां पिण्डदानाच्च त्रिभिः पुत्रस्य पुत्रता ॥
—इति गरुडपुराणे ।

गयायां धर्मपृष्ठेषु सदसि ब्रह्मणस्पतेः ।
गयाशीर्षे वटे चैव पितॄणां दत्तमक्षयम् ॥
गयायां नहि तत् स्थानं यत्र तीर्थं न विद्यते ॥—गयामहात्म्ये ।

हास एव उल्लसत्सुधा तां धरतीति तथोक्तः तत्संबुद्धिः । **मुदाधर** मुदमा-समंताद्धरतीति मुदाधरः तत्संबुद्धिः । **अमरकृतस्तुते** अमरैः देवैः कृता स्तुतिः यस्य स तथा तत्संबुद्धिः । अथवा **मुदा** प्रीत्या । **धरामरकृतस्तुते** धरामराः भूसुराः ब्राह्मणा इत्यर्थः । तैः कृता स्तुतिर्यस्य स तथोक्तः तस्य संबुद्धिः । **सुंदर** मनोहर । **सद्वरप्रद** सतां वरप्रद इष्टार्थप्रद । **अधर-चिदादरप्रमुदितांतर** अधर इति अहमधम इति चित् ज्ञानं येषां ते अधरचिदः । दासोऽहमिति ज्ञानिन इत्यर्थः । तेषामादरेण स्नेहेन प्रमुदितं संतुष्टं आंतरं हृदयं यस्य स तथोक्तः तस्य संबुद्धिः । भक्तजनभक्त्या संतुष्ट इत्यर्थः । 'भक्त्यैव तुष्टिमभ्येती'ति स्मृतेः* । **श्रीधर** लक्ष्मीधर । **ईश** स्वामिन् । **हे गदाधर** । **मदाधरस्खलितं** मदेनाहंकारेण अधरे अधः । स्खलितं पतितं । **मां पदा** पादेन **धर** धारय । तव चरणध्यानं दत्वा रक्षेत्यर्थ । ॥ २८ ॥

(गयास्थो) विष्णुपादः

यद्यात्रा पितृमंडलस्य तनुते वैकुंठयात्रां परां
यत्र क्षिप्ततिला महांति तिलशः कुर्वंति पापान्यहो ।
पिण्डो यत्र समर्पितो यमभटान् पिंडीकरोत्यक्षता
मर्त्यं स्माक्षतमीड्यतां स्तुतिततिस्तं विष्णुपादं भजे ॥ २९ ॥

श्रीविष्णुपादं वर्णयति । **यद्यात्रेति** । **यद्यात्रा** यस्य विष्णुपादस्य यात्रा । **पितृमंडलस्य** यात्राकर्तुः पितृसमुदायस्य **परां** उत्तमां । **वैकुंठ-यात्रां तनुते** विस्तारयति । विष्णुपादयात्रया पितृणां वैकुंठप्राप्तिर्भवतीति भावः । **यत्र** विष्णुपादे **क्षिप्ततिलाः महांति पापानि तिलशः** अल्पशः । **कुर्वंति** विष्णुपादे तिलारोपणेन महापापपरिहारो भवतीति भावः । **अहो** अल्पस्यापि कर्मणः महापापपरिहारसामर्थ्यमाश्चर्यमिति भावः । **यत्र** विष्णुपादे । **समर्पितः पिंडः यमभटान् पिंडीकरोति** विष्णुपादे पिंड-

* भक्त्यैव तुष्टिमभ्येति विष्णुर्नान्येन केनचित् ।—इति म.भा.ता.नि. । (1/117)

प्रदानेन यमदूताः भीताः भवंतीति भावः । [यत्र समर्पिताः] **अक्षताः** तंडुलाः । **मर्त्यं** मरणशीलं मनुष्यं **अक्षतं** अमृतं मुक्तमित्यर्थः । **कुर्वंति** । [1]विष्णुपादे अक्षतासमर्पणेन मुक्ता भवंतीत्यर्थः[1] । [यत्र] विष्णुपादे विषये [कृता] **स्तुतिततिः** स्तोत्रसमूहः । **ईड्यतां** स्तुतिकर्तुः स्तुत्यतां । [विधत्ते] **स्म** प्रसिद्धं । **तं विष्णुपादं** । अहं **भजे** यात्रादेः फलतयाऽपि यात्रादेरेव वर्णनात् **विनिमयोऽलंकारः** । ॥ २९ ॥

फल्गुनदी[2]

अपि जन्मशतोद्भूतं कृपया या हरंत्यघम् ।
मनुते फल्गु सा फल्गुनदी सद्गुणदाऽस्तु मे ॥ ३० ॥

फल्गुनदीं वर्णयति । **अपीति** । **या** फल्गुनदी । **जन्मशतोद्भूतमपि** जन्मशतार्जितमपि । **अघं** पापं **कृपया हरंत्यपि** । **फल्गु** तुच्छं **मनुते** । "असारं फल्गु शून्यं च वसेकं तुच्छरिक्तक"मित्यमरः । बहुजन्मार्जितपापपरिहाररूपं महोपकारमपि गांभीर्याख्यगुणवत्वात् यतः फल्गु मनुते अल्पमेव फलं बहुदूरादागतानां तेषां मया दत्तमिति मनुते । 'त्यागे श्लाघाविपर्यय' इति महतां गुणः । [अतः] **सा फल्गुनदी** फल्गुसंज्ञा सा नदी । **मे** मह्यं । **सद्गुणदा** निरहंकारादिशुभगुणप्रदा । **अस्तु** । ॥३०॥

---

[1] ततो गयां समासाद्य ब्रह्मचारी समाहितः ।
अश्वमेधमवाप्नोति कुलं चैव समुद्धरेत् ॥
तत्राक्षयवटो नाम त्रिषु लोकेषु विश्रुतः ।
तत्र दत्तं पितृभ्यस्तु भवत्यक्षयमुच्यते ॥
—इति महाभारते वनपर्वणि (84/82-88)

[2] ततः फल्गुं व्रजेद्राजंस्तीर्थसेवी नराधिप ।
अश्वमेधमवाप्नोति सिद्धिं च महतीं व्रजेत् ॥

मधुरा[1]

सेना यत्र विरक्तवैष्णवजना नामायुधं श्रीपतेः
कामाद्यैः सहितः कलिः किल रिपुर्यत्रान्वहं हन्यते ।
प्राकारादि च यत्र तीर्थनिचयः कर्माणि वर्मामलं
दद्यात्सा मधुरापुरी शुभकरी श्रेयांसि भूयांसि नः ॥३१॥

मधुरां वर्णयति **सेनेति** । **यत्र** मधुरायां [जिगीषोः] **सेना** चमूः । **विरक्तवैष्णवजनाः** । कामादिजयस्य विरक्तिसाध्यत्वादिति भावः । **आयुधं** प्रहरणं **श्रीपतेः नाम** लघूच्चारितनाम्ना कामादीनां पराभवो भवतीति भावः । **यत्र प्राकारादि च तीर्थनिचयः** । तीर्थसमूहः । यथा प्राकारादिः शत्रुप्रवेशं प्रतिबध्नाति तथा सेविततीर्थनिचयः कल्यादिप्रवेशं प्रतिबध्नातीति भावः । [यत्र] **अमलं कर्मापि** कृष्णस्य पूजादिकर्मापि **वर्म** तनुत्रं । तनुत्रं वर्म दंशनमित्यमरः । यथा वर्म शत्रुप्रयुक्तं शत्रुघातं प्रतिबध्नाति तथा विष्णुपूजादिसत्कर्म कलिकार्यं प्रतिबध्नातीति भावः । [यत्र] मधुरायां । **कामाद्यैः** कामक्रोधलोभमोहमदमात्सर्यैः षड्भिः कलिभृत्यैः । **सहितः कलिः** कल्याख्यो रिपुः **अन्वहं** निरंतरं । **हन्यते** । **सा शुभकरी मधुरापुरी नः** । अस्माकं । **भूयांसि श्रेयांसि** पुण्यानि[2] । **दद्यात्** दिशतु । ॥ ३१ ॥

विश्रांतितीर्थम्

संसारसंसरणखेदविभेदकारि
कंसारिसंश्रिततटीगतचारुवारि ।

---

[1] शत्रुघ्नतो लवणमुल्बणबाणदग्धं कृत्वा चकार मधुरां पुरमुग्रवीर्यः ।
—इति महाभारततात्पर्यनिर्णये (IX. 17)

स शत्रुसूदनोऽवधीन्मधोः सुतं रसाह्वयम् ।
शरेण येन चाकरोत् पुरीं च माधुराभिधाम् ।
—इति च महाभारततात्पर्यनिर्णये (IX. 81)

[2] अयोध्या **मधुरा** माया काशी कांची अवंतिका ।
पुरी द्वारावती चैव सप्तैते मोक्षदायिकाः ॥

विश्रांतितीर्थममलं हरिलोकवास-
विश्रांतिदं दिशतु नः सकलेप्सितानि ॥ ३२ ॥

विश्रांतितीर्थं वर्णयति। **संसारेति। संसारसंसरणखेदविभेदकारि** संसारे जननमरणरूपसंसरणं संचारः। तस्माज्जातः खेदस्तस्य विभेदं करोतीति तथोक्तम्। **कंसारिसंश्रिततटीगतचारुवारि** कंसारिः। श्रीकृष्णः तेन संश्रितं तटीगतं चारु मनोहरं वारि यस्मिन् तत् तथोक्तम्। **हरिलोक-वासविश्रांतिदं** हरिलोके वैकुंठे वासस्तेन विश्रांतिं दुःखाभावं ददातीति तथोक्तम्। **अमलं** निर्मलं। **विश्रांतितीर्थं नः** अस्माकं। **सकलेप्सितानि** सकलमनोभीष्टानि **दिशतु** ददातु।

मखकोटिसहस्राणां मुखं म्लानयतो मुहुः।
अघश्रांतिकरस्यास्य कथं विश्रांतितीर्थता ॥ ३३ ॥

तदेव विशदयति। **मखेति। मखकोटिसहस्राणां**। मखानां अश्वमेधयज्ञानां कोटीनां सहस्राणां। **मुखं मुहुः म्लानयतः** विश्रांतितीर्थस्य यादृशं सामर्थ्यं तादृशं नास्माकमस्तीति लज्जया मुखम्लानिमुत्पादयतः **अघश्रांतिकरस्य** अघानां पापानां श्रांतिः शमनं तां करोतीति अघश्रांतिकरं तस्य। **अस्य** तीर्थस्य। **विश्रांतितीर्थता कथं** [घटते] न घटत इत्यर्थः। **आक्षेपालंकारः**। ॥ ३३ ॥

बृन्दावनम

यत्कुंजा मुरवैरिसंगतवधूविक्रीडनैर्वासिता
यत्संजातसुरद्रुमौघमहसा विद्योतिताशामुखम्।
यत्पाथस्सुरसिन्धुसिंधुमहितं यत्राखिलैर्लक्षितं
श्रुत्यंतांतरितं महः परमहो बृंदावनं पावनम् ॥ ३४ ॥

बृंदावनं वर्णयति। **यदिति। यत्कुंजाः** यस्मिन् बृंदावने कुंजाः

लतागृहाः । "निकुंजकुंजौ वा क्लीबे लतादिपिहितोदरे"इत्यमरः । **मुरवैरिसंगतवधूविक्रीडनैः** मुरवैरिणा श्रीकृष्णेन संगताः या वध्वः गोप्यस्तासां विक्रीडनैश्चरितैः **वासिताः** परिमलीकृताः । **यत्संजातसुरद्रुमौघमहसा** यस्मिन् संजाताः सुरद्रुमाः देवतरवः मंदारपारिजातादयः तेषामोघाः समूहाः तेषां महसा रत्नमयफलपुष्पादिकांत्या । "कांत्युत्सवौ तु महसी" त्यमरः । **विद्योतिताशामुखं** विद्योतितानि प्रकाशितानि आशामुखानि दिङ्मुखानि यस्य तत् तथोक्तम् । **यत्पाथः** यस्मिन् वृंदावने पातुं योग्यं पाथः जलं । **सुरसिन्धुसिन्धुमहितं** सुरसिंधुः सुरनदी, सिंधुस्समुद्रस्ताभ्यां महितं पूज्यमधिकपावित्र्योपेतमित्यर्थः । **यत्र** वृंदावने । **श्रुत्यंतांतरितं** श्रुत्यंतस्योपनिषदः अंतरितं दूरिभूतं । **परं** उत्कृष्टं **महः** कृष्णाख्यं तेजः । तेजोरूपत्वान्मह इत्युक्तम् । **अखिलैः** स्त्रीबालपशुपक्ष्यादिभिः **लक्षितं** दृष्टं । उपनिषद्विषयस्य स्त्रीबालपशुपक्षिचक्षुर्विषयत्वम् । **अहो** आश्चर्यम् । [अतस्तत्] **वृंदावनं पावनं** पवित्रम् ।* ॥ ३४ ॥

अयोध्या

अयोध्या ना(रा)मनगरी (रामदयिता) भाति साध्वी वधूरिव ।
वनं गतस्यापि तस्य पादुके याऽकरोत् पतिम् ॥ ३५ ॥

अयोध्यां वर्णयति । **अयोध्येति** । **अयोध्या नाम नगरी** पुरी ।

---

* अस्य पूर्वार्धः रुग्मिणीशविजयेऽपि दृश्यते (9/62) तत्रस्य व्याख्यानं तु—

यस्य वृंदावनस्य कुंजाः लतामंटपाः मुरवैरिणा कृष्णेन संगतानां वधूनां स्त्रीणां विक्रीडनैः सुरतक्रीडाभिः वासिताः तयोर्दिव्यांगसहजगंधेन तद्दतचंदनकुंकुमकस्तूर्यादिगंधेन च परिमलीकृताः । यद् वृंदावनं संजातानां समुद्भूतानां सुरद्रुमाणां कल्पवृक्षाणामोघस्य समूहस्य सहसा कांत्या विद्योतितानि प्रकाशितानि आशानां दिशां मुखानि यस्य तत्तथोक्तम् ।—इति ।

साध्वी पतिव्रता । **वधूरिव** नारीव । **भाति** शोभते । **या वनंगतस्यापि तस्य** रामस्य । **पादुके** अंघ्रिपीठे । **पतिमकरोत्** यथा पत्यौ स्वरक्षकतया प्रेमवती तथा पादुकयोरेवाधीना सती ताभ्यां पालिता अभूत् । न तु पत्यंतरपरिग्रहं कृतवतीत्यर्थः । पतिव्रता नारी भर्तरि प्रोषिते सति तदीयं वस्त्राभरणादिवस्तु तद्वत्समीक्ष्य यथा तिष्ठति तद्वदियमपि नगरी तिष्ठतीति भावः । **उपमालंकारः** ।

नैमिषारण्यम *

मुनींद्रमानसावालरूढकृष्णकथलता ।
विभाति नैमिषारण्यमही सर्वमहीयसी ॥ ३६ ॥

नैमिषारण्यं वर्णयति । **मुनींद्रेति** । **मुनींद्रमानसावालरूढकृष्ण-कथालता** मुनींद्राणां शौनकादीनां । मानसमेव मन एवालवालं आधारबंध इत्यर्थः । "स्यादालवालमावालमावाप"इत्यमरः । तत्र रूढा उत्पन्ना । कृष्णकथैव लता यस्यां सा तथोक्ता । अरण्ये लतोत्पत्तेरुचितत्वादिति भावः ।

---

* नैमिषं मृगयानस्य पापस्यार्धं प्रणश्यति ।
प्रविष्टमात्रस्तु नरः सर्वपापैः प्रमुच्यते ॥
तत्र मासं वसेद्धीरो नैमिषे तीर्थतत्परः ।
पृथिव्यां यानि तीर्थानि तानि तीर्थानि नैमिषे ॥
कृताभिषेकस्तत्रैव नियतो नियताशनः ।
गवां मेधस्य यज्ञस्य फलं प्राप्नोनि भारत ॥
पुनात्यासप्तमं चैव कुलं भरतसत्तम ।
यस्त्यजेन्नैमिषे प्राणानुपवासपरायणः ॥
स मोदेत् सर्वलोकेषु एवमाहुर्मनीषिणः ।
नित्यं मेध्यं च पुण्यं च नैमिषं नृपसत्तम ॥

—इति महाभारते वनपर्वणि (84/60-64)

सर्वमहीयसी सर्वेभ्यः क्षेत्रेभ्यो महीयसी श्रेष्ठा । **नैमिषारण्यमही विभाति** शोभते । ॥ ३६ ॥

हस्तिनपुरी*

अंतर्निविष्टकलिकौरवसैनिकाऽपि
या धर्ममेव दयितं वरयांबभूव ।
योगींद्रबुद्धिरिव भीमपराक्रमेण
सा भाति हस्तिनपुरी प्रथिता त्रिलोक्याम् ॥ ३७ ॥

हस्तिनपुरीं वर्णयति । **अंतर्निविष्टेति** । या हस्तिनपुरी । **अंतर्निविष्टकलिकौरवसैनिकाऽपि** अंतर्निविष्टः अंतःप्रविष्टः कलिरूपो यः कौरवः दुर्योधनस्तस्य सैनिकास्सेनास्थाः । "सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते" इत्यमरः । अंतर्निविष्टाः कलिकौरवसैनिका यस्यां सा तथोक्ताऽपि । **भीमपराक्रमेण** भीमस्य भीमसेनस्य पराक्रमेण शौर्येण । **धर्ममेव** युधिष्ठिरमेव । **दयितं** पतिं **वरयांबभूव सा त्रिलोक्यां प्रथिता** प्रसिद्धा । **हस्तिनपुरी** हस्तिनामकेन राज्ञा निर्मिता नगरी । **योगींद्रबुद्धिरिव भाति** शोभते । योगींद्रबुद्धिरपि अंतर्निविष्टः कलिरेव कौरवः तस्य सैनिकाः कामक्रोधादयो यस्यां सा तथोक्ताऽपि रागद्वेषाभिभूताऽपीत्यर्थः । **भीमपराक्रमेण** वातांबुपर्णाशनादिभीषणतपश्चर्यया **धर्ममेव** पुण्यमेवांगीकरोति तद्वदिति श्लेषाभिप्रायः । ॥ ३७ ॥

---

* प्राप्तस्ततो **हस्तिनराजधानीं** मासानुवासेह स वासयोग्यान् ।
मठातरेऽनंतगुणांतरः सन्नेकांतदेशो सरितोऽसमीपे ॥
भित्वा भुवं देवनदी जगाम शाखाविशेषेण निषेवितुं तम् ।
वाणी च यत्प्रेष्यतया कृतार्था शिवादिवंद्या न तदत्र चित्रम् ॥
गुरुप्रबर्हस्य पदावविंदं विदूरतः सा प्रणनाम मूर्ता ।
औदार्यसौंदर्यतनुं तनुं तामालक्ष्य शिष्यैरतिविस्मितं तैः ॥
—इति सुमध्वविजये (X. 34–36)

कुरुक्षेत्रम्

श्रीभीमसेनकरकंजगदाप्रहारैश्चूर्णीकृताश्वगजपत्तिमृदुग्रपिण्डम् ।
उत्खातपार्थशरसस्यपदं कुरूणां क्षेत्रं दिशासु वितनान सुकीर्तिधान्यम्

कुरुक्षेत्रं वर्णयति । **श्रीभीमसेनेति** । **श्रीभीमसेनकरकंजगदा-प्रहारैः** श्रीभीमसेनन्य करकंजे या गदा तस्याः प्रहारैः । **चूर्णीकृताश्वग-जपत्तिमृदुग्रपिंडम्** चूर्णीकृताः अश्वाश्च गजाश्च पत्तयश्च अश्वगजपत्ति। "द्वंद्वश्च प्राणितूर्यसेनांगाना"[1]मित्येकवद्भावः । त एव मृदुग्रपिंडाः कठिनमृत्पिंडाः यस्मिंस्तथोक्तम् । कृषीवलाः हलोत्पातेनोद्भूतान् मृत्पिंडान् बीजावपनाय भूमेस्समीकरणार्थं लगुडेन चूर्णयंतीति कृषीवलव्यापारो तेनावगम्यते । **उत्खातपार्थशरसस्यपदम्** उत्खाता आरोपिताः । पार्थस्यार्जुनस्य । शरा एव सस्यानि तेषां पदं स्थानं । [2]**कुरूणां क्षेत्रम् दिशासु** दिक्षु । **सुकीर्ति-धान्यं वितनान** विस्तृतमकरोत् । तनु विस्तार इति धातोर्लिट् । यथा कृषीवलैः सम्यक्कर्षणेनारोपितसस्यं क्षेत्रं बहुधान्यं फलति तद्वदिति भावः । **रूपकालंकारः** । ॥ ३८ ॥

---

[1] द्वंद्वस्तु प्राणितूर्यसेनांगानाम् । (पा. सू. 2/4/2)

[2] ततो गच्छेत राजेंद्र कुरुक्षेत्रमभिष्टुतम् ।
पापेभ्यो यत्र मुच्यंते दर्शनात् सर्वजंतवः ॥
कुरुक्षेत्रं गमिष्यामि कुरुक्षेत्रे वसाम्यहम् ।
य एवं सततं ब्रूयात् सर्वपापैः प्रमुच्यते ॥
पांसवोऽपि कुरुक्षेत्रे वायुना समुदीरिताः ।
अपि दुष्कृतकर्माणं नयंति परमां गतिम् ॥
मनसाऽप्याभिकामस्य कुरुक्षेत्रं युधिष्ठिर ।
पापानि विप्रणश्यंति ब्रह्मलोकं च गच्छति ॥
गत्वा हि श्रद्धया मुक्तः कुरुक्षेत्रं कुरुद्वहः ।
फलं प्राप्नोति च तदा राजसूयाश्वमेधयोः ॥

शंबलक्षेत्रम्

कलेर्भीरुजना यात शंबलं जगतां बलम् ।
कलिशौर्यहरः कल्की यत्र प्रादुर्भविष्यति ॥ ३९ ॥

शंबलक्षेत्रं वर्णयति। **कलेरिति**। **कलेः** कलियुगाभिमानिनोऽसुरात्। **भीरुजनाः** भीतजनाः। **जगतां बलं** बलकरं। **शंबलं** शंबलाख्यक्षेत्रं **यात** गच्छत। या प्रापण इति धातोर्लोट्। शंबलक्षेत्रयात्रया कलिभयपरिहारो भवतीति भावः। कुत इत्यत आह। कलिशौर्येति। **यत्र** शंबलक्षेत्रे **कलिशौर्यहरः** कलेः शौर्यं सामर्थ्यं हरतीति तथा। **कल्की*** कल्किनामा हरिः। **प्रादुर्भविष्यति**। ॥ ३९ ॥

पृथिव्यां नैमिषं तीर्थमंतरिक्षे च पुष्करम् ।
त्रयाणामपि लोकानां कुरुक्षेत्रं विशिष्यते ॥

—इत्यादि महाभारते (वनपर्वणि 83/1-3, 7, 8, 84/203-208)

प्राज्ञो राज्ञां त्रिदिवपदवीं **कोरवं क्षेत्र**मातः
सस्माराथ स्वविहृतिपतद्धस्तियुद्धोत्सवानाम् ।
सत्यात्माद्यैरिह परिवृतो भाविमारीचदृग्भि-
र्विस्मेरैः स्वैर्निजनृपतनूहेतिदृष्ट्याऽतिहृष्टैः ।

—इति सुमष्वविजये (X. 49)

* अथासौ युगसन्ध्यायां दस्युप्रायेषु राजसु ।
जनिता विष्णुयशसो नाम्ना कल्किर्जगत्पतिः ॥

—इति भागवते (I. 3/25)

यर्ह्यालयेष्वपि सतां न हरेः कथाः स्युः
पाखण्डिनो द्विजजना वृषला नृदेवाः ।
स्वाहा स्वधा वषडिति स्व गिरो न यत्र
शास्ता भविष्यति कलेर्भगवान् युगान्ते ॥

—इति भागवते (II. 7/38)

दुष्टकुलांतक **कल्कि**स्वरूप धर्मविवर्धन मूलयुगादे ॥

—इति द्वादशस्तोत्रे (6/8)

षट्प्रयागाः

षट्प्रयागाः स्ववेगेन कामाद्यरिमहीरुहः ।
उन्मूलयंतु पापाख्यं पंकं प्रक्षालयंतु नः ॥ ४० ॥

षट्प्रयागान् वर्णयति । **षडिति** । **षट्प्रयागाः** षट्संख्याकाः प्रयागाः । नदीद्वयसंगमवंतोऽतर्वेदिप्रदेशाः । **स्ववेगेन नः** अस्माकं । **कामाद्यरिमहीरुहः** कामक्रोधलोभमोहमदमात्सर्याख्यविरोधिषड्वृक्षान् । यथा एते प्रयागाः स्वनदीवेगेन नदीतीरस्थबाह्यवृक्षानुन्मूलयंति । बाह्यपंकं च प्रक्षालयंति । तथा ममांतरकामादिवृक्षान् **उन्मूलयंतु** । आंतरं **पापाख्यं पंकं च प्रक्षालयंतु** शोधयन्तु । **विनिमयोऽलंकारः** । वटप्रयागः । देवप्रयागः । रुद्रप्रयागः । स्कंदप्रयागः । नन्दप्रयागः । केशवप्रयागः । इति वटादि**षट्प्रयागाः** त्रिवेणीसंगममारभ्य बदरीकाश्रमपर्यंतं भागीरथीतीरे स्थाने स्थाने संति । तेषां प्रार्थनमिदम् । ॥ ४० ॥

बदरिकाश्रमम्

अमरीभ्रमरीपुंजसुमरीचिभिरंचिता ।
बदरी बदरी(वद रे) किं किमधरीकुरुते न सा ॥ ४१ ॥

बदरीकाश्रमं वर्णयति । **अमरीति** । [या] **बदरी** बदरिकाश्रमः । **अमरीभ्रमरीपुंजसुमरीचिभिः** अमर्यः देवांगनाः ता एव भ्रमर्यः बदरीपरिमलास्वादनलोलुपा भृंग्यस्तासां पुंजस्समूहः तस्य सुमरीचिभिश्शोभनकांतिभिः । **अंचिता** शोभिता । बदर्यां सुरांगना संचरंतीति भावः । [हे जीव] **सा**

---

[1] **नेदृशं स्थलमलं शमलघ्नं** नास्य तीर्थसलिलस्य समं वाः ।
नास्ति विष्णुसदृशं ननु दैवं नास्मदुक्तिसदृशं हितरूपम् ॥
—इति सुमध्वविजये (VI/47)

नारायणः प्रभुर्विष्णुः शाश्वतः पुरुषोत्तमः ।
तस्यातियशसः पुण्यां विशालां **बदरीमनु** ॥

बदरी बदरीकाश्रमः । **किं किं** क्षेत्रं । **नाधरीकुरुते** । सर्वमप्यधः करोतीति भावः । बदरीकाश्रमस्योत्तुंगपर्वतशृंगगतत्वेन उच्चतायाः, क्षेत्रांतराणां तदधोगतत्वेन अधमतायाश्च प्रत्यक्षमेव प्रमाणमिति भावः । **छेकानुप्रासा-**
ख्यशब्दालंकारः । ॥ ४१ ॥

आश्रमः ख्यायते पुण्यस्त्रिषु लोकेषु विस्तृतः ॥
उष्णतोयवहा गंगा शीततोयवहा पुरा ।
सुवर्णसिकता राजन् विशालां **बदरीमनु** ॥
ऋषयो यत्र देवाश्च महाभागा महौजसः ।
प्राप्य नित्यं नमस्यंति देवं नारायणं प्रभुम् ॥
यत्र नारायणो देवः परमात्मा सनातनः ।
तत्र कृत्स्नं जगत्सर्वं तीर्थान्यायतानानि च ॥
तत् पुण्यं परमं ब्रह्म तत् तीर्थं तत् तपोवनम् ।
तत् परं परमं देवं भूतानां परमेश्वरम् ।
शाश्वतं परमं चैव धातारं परमं पदम् ॥
यं विदित्वा न शोचन्ति विद्वांसः शास्त्रदृष्टयः ॥
तत्र देवर्षयः सिद्धाः सर्वे चैव तपोधनाः ।
आदिदेवो महायोगी यत्रास्ते मधुसूदनः ॥
पुण्यानामपि तत् पुण्यमत्र ते संशयोऽस्तु मा ॥

—इति महाभारते (वनपर्वणि (90/24–32)

अन्यत्र मरणान्मुक्तिः स्वधर्मविधिपूर्वकम् ।
बदरीदर्शनादेव मुक्तिः पुंसां करे स्थिता ॥
श्रीबदर्याश्रमं पुण्यं यत्र यत्र स्थितः स्मरेत् ।
स याति वैष्णवं स्थानं पुनरावृत्तिवर्जितः ॥

बदर्यां नारायणः

धर्माद्योऽजनि धर्म एव स रतिं दद्यात् स्वयोगश्रियं
योगाभ्यासरतः स्मरादिविजयं कंदर्पदर्पापहः ।
उत्तुंगाद्रिगतः सदोच्चपदवीं योषित्कदंबेषु नः
पुत्रीवन्मतिमुर्वशीजनयिता नारायणः सद्गुणान् ॥ ४२ ॥

तत्र नारायणं वर्णयति । **धर्मादिति** । **यः धर्मात्** [1]धर्माख्यात् । **अजनि** प्रादुरभूत् । जनी प्रादुर्भाव इति धातोर्लुङ् । **सः** नारायणः । **नः** अस्माकं । **धर्म एव रतिं दद्यात्** । सर्वेऽपि स्वपितरि स्नेहमुत्पादयंति यतोऽतः अयमपि धर्मपुत्रत्वाद्धर्म एव स्नेहमुत्पादयत्वित्यर्थः । **यश्च योगाभ्यासरतः** नारायणस्य [2]तपस्वित्वादित्यर्थः । सः **स्वयोगश्रियम्** स्वविषयकध्यानसंपदम् [दद्यात्] "योगस्सन्नहनोपायध्यानसंगतियुक्तिष्वि"त्यमरः । भावः स्पष्ट एव । **यः कंदर्पदर्पापहः** काममदहरः । स नोऽस्माकं **स्मरादिविजयं** कामादिजयं [दद्यात्] तपोविघातायेंद्रेण नारायणाश्रमं प्रति प्रेषितः कामस्तस्य मनो विजेतुमसमर्थः स्वयमेव तत्परिचारकमनोहरनारीविजितमनस्कस्सन्नारायणमर्चयित्वा तत एकामुर्वशीनाम्नीं स्वर्गं प्रतिनिन्य इति **पौराणिकीकथा**[3] । अतः कंदर्पदर्पापह इत्युक्तम् । यः **उत्तुंगाद्रिगतः**

---

[1] धर्मस्य दक्षदुहितर्यजनिष्ट मूर्त्यां नारायणो नर ऋषिप्रवरः प्रशांतः ।
नैष्कर्म्यलक्षणमुवाच चचार कर्म योऽद्यापि चास्त ऋषिवर्यनिषेवितांघ्रिः ।

[2] भारतेऽपि वर्षे भगवान्नारायणाख्य आकल्पांतमुपचितधर्मज्ञानवैराग्यैश्वर्योपशमोपरमात्मोपलंभनमनुग्रहायात्मवतामनुकम्पया तपोऽव्यक्तगतिश्चरति । —इति भागवते (V. 19/9)

[3] इंद्रो विशंक्य यम धाम जिघृक्षतीति कामं न्ययुंक्त सगणं स
बदर्युपाख्यम् ।
गत्वाऽप्सरोगणवसंतसुमंदवातैः स्त्रीप्रेक्षणेषुभिरविध्यदतन्महिज्ञः ॥

उच्चपर्वतस्थः सः । **सदा उच्चपदवीं** उच्चस्थानं [दद्यात्] यः **उर्वशीजनयिता** सः **योषित्कदंबेषु** स्त्रीसमूहेषु । **पुत्रीवन्मतिं** एता मम पुत्र्य इति मनः [दद्यात्] यः **नारायणः** अराः दोषाः तद्विरुद्धत्वान्नाराः गुणाः । तदयनत्वान्नारायणः । 'नगनाकादिवत्समासः' । न समासो वा । तेन न लोपाभावः । तेषामाश्रयो नारायणः गुणपूर्ण इत्यर्थः । सः **सद्गुणान्** ज्ञानानंदादीन् [दद्यात्] दिशतु । ॥ ४२ ॥

बदरीनारायणध्यानम्

हस्तद्वंद्वगचक्रशंखरुचिरं वृत्तोरुमध्यस्फुर-
द्रक्तोत्तानकरारविंदयुगलं पद्मासनस्थं प्रभुम् ।
विष्वङ् नारदमुख्ययोगिनिकरैः संसेव्यमानं सुधा-
वीक्षाक्षालितभक्तकिल्बिषविषं नारायणं चिंतये ॥ ४३ ॥

विज्ञाय शक्रकृतमक्रममादिदेवः प्राह प्रहस्य गतविस्मय ऐजमानान् ।
मा भैर्विभो मदन मारुत देववध्वो गृह्णीत नो बलिमशून्यमिमं कुरुध्वम् ॥
इत्थं ब्रुवत्यभयदे नरदेव देवः सव्रीडनम्रशिरसः सघृणं तमूचुः ।
नैतद् विभो त्वयि परेऽविकृते विचित्रं स्वारामधीरनिकरानतपादपद्मे ॥

—इति भागवते (XI. 4/6–9)

इति प्रगृणतां तेषां स्त्रियोऽत्यद्भुतदर्शनाः ।
दर्शयामास शुश्रूषां स्वर्चिताः कुर्वतीर्विभुः ॥
ते देवानुचरा दृष्ट्वा स्त्रियः श्रिरिव रूपिणीः ।
गंधेन मुमुहुस्तासां रूपौदार्यहतश्रियः ॥
तानाह देवदेवेशः प्रणतान् प्रहसन्निव ।
आसामेकतमां वृङ्ध्वं सवर्णां स्वर्गभूषणाम् ॥
ओमित्यादेशमादाय नत्वा तं सुरवंदिनः ।
उर्वशीमप्सरःश्रेष्ठां पुरस्कृत्य दिवं ययुः ॥

—इति भागवते (XI. 4/12–15)

बदरीनारायणस्य ध्यानमाह **हस्तेति**। **हस्तद्वंद्वगचक्रशंखरुचिरं** हस्तयोरूर्ध्वहस्तयोर्द्वंद्वे गौ गतौ चक्रशंखौ ताभ्यां रुचिरं मनोहरं। **वृत्तो-रुमध्यस्फुरद्रक्तोत्तानकरारविंदयुगलं** वृत्तयोरूर्वोर्मध्ये स्फुरंतौ रक्तौ रक्ततलौ उत्तानौ ऊर्ध्वमुखौ च तौ करौ च तावेवारविंदे तयोर्युगलं यस्य स तथा तम्। **पद्मासनस्थं** पद्मासनाख्यासने स्थितं **प्रभु** समर्थं। **विष्वक्** परितः। **नारदमुख्ययोगिनिकरैः** नारदो मुख्यो येषां ते नारदमुख्याः। ते च ते योगिनश्च तेषां निकरैः समूहैः। **संसेव्यमानं** सम्यक् सेव्यमानं। ***सुधावी-क्षाक्षालितभक्तकिल्बिषविषं** सुधामयी च सा वीक्षा च सुधावीक्षा। तया क्षालितं शोधितं। भक्तानां किल्बिषाख्यविषं येन स तथोक्तस्तम्। **नारायणं चिंतये** स्मरामीति संबंधः। ॥ ४३ ॥

नरपर्वते अवतीर्णो हयग्रीवः

यत्र क्षेत्रे विधेः सत्रे हयग्रीवो ह्यवातरत्।
धाराद्वारा त्रयी तत्र श्रूयतेऽद्यापि सूरिभिः ॥ ४४ ॥

तत्रत्य नरपर्वतेऽवतीर्णं हयग्रीवं वर्णयति। **यत्रेति**। **यत्र क्षेत्रे** बदरीकाश्रमाख्यक्षेत्रे। **विधेः** ब्रह्मणः **सत्रे** यागे। नरपर्वताग्रस्थितयागकुंड इत्यर्थः। **हयग्रीवः** तन्नामा हरिः। **अवातरद्धि**। **तत्र धाराद्वारा** ऋग्वेदयजुर्वेदसामवेदाथर्वणवेदोपवेदाख्यधारा—पंचकद्वारा। **त्रयी** वेदः। **सूरिभिः** स्नानकर्तृभिर्विद्वद्भिः। **अद्यापि श्रूयते**। ऋग्वेदधारायां ऋग्वेद-स्वरवत् यजुर्वेदादिधारासु च तत्तत्स्वरवच्च घोषः श्रूयत इति **किंवदंती**। अत एव वर्णितम्। ॥ ४४ ॥

हयग्रीवस्तुतिः

धातर्देवसमूह मंदर महि प्रह्लाद शक्र द्विज-
व्रात ख्यातसमुद्र पार्थ शिव सद्धर्मानृतं मा वद ॥
अश्वग्रीवममुं विहाय कतमं देवं नमामः स्तुमः
सत्कुर्मः किमु कर्म शर्मदमितोऽन्यद्ब्रह्म किं वाऽस्ति नः ४५

---

* निखिलाघौघविनाशनपरसौख्यप्रददृष्टे।—इति द्वादशस्तोत्रे।

तमेव हयग्रीवं श्लोकान्तरेण स्तौति **धातरिति** । अनेन श्लोकेन हयग्रीवमत्स्यादिरूपिणो हरेरवतारकथां मनसि निधाय साक्षिणां विषमसंख्याकत्वनियमेन तस्मिंस्तस्मिन्नवतारे कृतप्रयोजनान् ब्रह्मादिधर्मांतानेकादशदेवांश्च साक्षीकृत्य हयग्रीवाख्यहरेः सर्वोत्तमतां सर्वजनसंमतां करोति । तद्विरुद्धदर्शनानि च तत एव धिक्करोति । **तथाहि** ।

हे धातः मत्स्यावतारे हयग्रीवावतारे च स्वेन स्वेतरैश्चासाध्यानां हरिकृततमोहननमधुकैटभाख्यदैत्यहननवेदाहरणाख्यकर्मणां च साक्षाद्ब्रह्मणैव दृष्टत्वात् । हरेस्सर्वोत्तमत्वे स एव मुख्यस्साक्षीति भावेन हे धातरिति ब्रह्मणः संबुद्धिः ।

हे देवसमूह हे मंदर कूर्मावतारे तन्मूलमूर्त्या सर्वासाध्यमंदरगिर्यानयने च समुद्रजलान्मंदरोद्धरणे च निरवधिकहरिमाहात्म्यस्य देवसमूहेन मंदरगिरिणा च साक्षाद्दृष्टत्वात् तयोरुभयोः संबुद्धिः ।

हे महि वराहावतारे इतरासाध्यरसातलपरिमितघनोदकमध्ये दैत्येन अधोनिमज्जितायाः स्वस्याः उद्धरणस्य मह्यैव दृष्टत्वात् तस्याः संबुद्धिः ।

हे प्रह्लाद नरसिंहावतारे च सर्वासाध्यहिरण्यकवक्षोविदारणादिमहासामर्थ्यस्य ब्रह्मरुद्रादिकृतस्तुतिप्रणामादेश्च प्रह्लादेनैव दृष्टत्वात् तस्य संबुद्धिः । विजातीयकुलजत्वाद्वैरिपुत्रत्वाच्च प्रबलोऽयं साक्षी ।

हे शक्र वामनावतारे च पदत्रयेण त्रैलोक्याक्रमणस्य नखाग्रेण ब्रह्मांडखंडनस्य च महाप्रतापस्य सहस्राक्षेण दृष्टत्वात् तस्य संबुद्धिः ।

भो द्विजव्रात परशुरामावतारे च त्रिःसप्तकृत्वः क्षत्रियकुलं संहृत्य विप्रकुलाय सप्तद्वीपसमेतभूमेर्दानादौदार्यगुणस्य निस्सीमशौर्यस्य च द्विजा एव साक्षिण इति भो द्विजव्रातेति संबुद्धिः ।

हे ख्यातसमुद्र रामावतारे च शराभिमंत्रणमात्रेण म्लेच्छनिर्दहनस्य सागरजलशोषणस्य चेतरासाध्यसेतुकरणरावणशिरश्छेदादेः कर्मणश्च साक्षात्स-

मुद्रेणैव दृष्टत्वात् तस्य संबुद्धिः । समुद्रमध्ये रामसेत्वाख्यमहाक्षेत्रकरणेन समुद्रस्य कीर्तिदानाख्यमुपकारं सूचयितुं ख्यातेति विशेषणम् ।

हे पार्थ कृष्णावतारे च विश्वरूपदर्शनादिना भगवन्माहात्म्यस्यार्जुनेनैव दृष्टत्वात् तस्य संबुद्धिः ।

हे शिव बुद्धावतारे च त्रिपुरसतीपातिव्रत्येन स्तंभितायाः त्रिपुरदहनशक्तेर्मोहकशास्त्रकर्त्री बुद्धेनैव पुनरुत्तेजितायास्त्रिपुरदिधक्षोः स्वस्य भारवशान्मह्यामधोगतमहारथस्य "शंभुत्रिपुरदाहैकस्थैर्यविश्वरथोद्वहः"[1] इति **वासुदेवसहस्रनामां**तःस्थितनामार्थपर्यालोचनया वृषभावतारेण हरिणा स्वशृंगाभ्यामुद्धृतस्य भक्तशंभुकृते दैत्यामृतवापीसमस्तपः[2] "इति नामार्थपर्यालोचनया च त्रिपुरांतःस्थितकूपपूरितस्य मृतदैत्यसंजीवनहेतुभूतामृतस्य [3]गोरूपेण हरिणा कृतनिश्शेषपानाख्यमहोपकारस्य भस्मासुरभयेन पलायमानस्य स्वस्य भस्मीकृतभस्मासुरेण [4]मूलरूपेणैव हरिणा कृतप्राणरक्षणाख्योपकारस्य योगिनीचक्रगुह्ये च [5]"योगिनीग्रस्तगिरिशत्राता"[6] मेषरूपशंकरवाहनः 'मेषरूपशिवत्राता[7] इत्यादि नामार्थपर्यालोचनया एकासृग्बिंदुपातमात्रेण कोट्यंधकीभवतोंऽधकस्यासृक्पानायसृष्टशक्तिसहस्रस्य नृसिंहरूपदययैव कृतांधकहननस्य पुनरसृगासक्तचित्ततया स्वस्यैव भक्षणायोद्युक्तनृहरिदत्तसत्वयोगिनीभयेन मेषेषु मेषीभूतमात्मानं च ग्रसितुकामां तां नाशयितुं पातालादागतेन **चिंतामणिनृसिंहेण**[8] मेषरूपं स्व वाहनीकृत्य कृतस्यात्मरक्षणस्य योगिनीहननाख्यमहाशौर्यस्य च साक्षाच्छिवेनैव दृष्टत्वाद्वादिविप्रतिपत्तिपरिहाराय बहुधा शिवं प्रति हरिणा कृतोपकारं शिवमुखेनैव वाचयितुं **हे शिवेति** तस्य संबुद्धिः ।

1, 2, 5, 6, 7—इति वासुदेवसहस्रनामसु (पद्मपुराणे उ. खं. 71) श्लो. 244, 245, 190, 196 ।

3 प्रसिद्धेयं कथा श्रीमद्भागवते (VII. 10/53–71)

4 श्रीमद्भागवते (X. 88/12–40)

'मोचितः संकटाच्छिवः'—इति च भागवते ((X. 88/37)

8 चिन्तामणिनृसिंह वर्णनं तु प्रागेवोक्तम् (I 30, 31) ।

हे सद्धर्म कल्क्यवतारे च कलिना कलितानां सकलसद्धर्माणां च कल्किरूपेण हरिणा अखिलान्निहत्य कृतादौ पालनात् तेऽपि तन्माहात्म्ये साक्षिण इति भावेनोक्तं **हे सद्धर्मेति** । हरिकृतशिवयात्रार्चनविप्रपूजनादीनां "तद्यात्राजनमोहिनी । चिरं विमृश्य मुनय ईश्वरस्येशितव्यताम् । जनसंग्रह इत्यूचुः स्मरंतस्तं जगद्गुरु"मित्यादि**स्मृतेः*** । जनरंजनमोहनाद्यर्थं कृतत्वोक्त्या सद्धर्मत्वाभावान्न संप्रति साक्षीकर्तुं शक्यत इति भावेन सदिति विशेषणं बहुधर्मरक्षणेऽप्येकधर्मरक्षणवत् भगवतो लीलैव न कोऽप्यायास इति भावेनैकवचनम् ।

अनृतं मा वद इति प्रत्येकं संबध्यते । साक्षिवचनं वाचयन्तोऽपि प्रत्येकं तत्तन्मुखाद्वाचयंति तथेदमपि बोद्धव्यम् ।

अश्वग्रीवमसुं विहाय कतमं देवं नमामः स्तुमः सत्कुर्मः इत्यनेन **शैवशाक्तेयगाणपतस्कांदसौरादिदेवतांतरपरत्वप्रतिपादकदुर्मतधिक्करणं । किमु कर्म शर्मदं** इत्यनेन **भाट्टप्राभाकरमतधिक्करणम् । इतोऽन्यद्ब्रह्म किं वास्ति नः** इत्यनेन **निर्गुणजीवानां परत्वप्रतिपादकदुर्मतनिराकरणम् ।** तेषामेव परत्वे अस्मदुक्तसाक्षिणो धात्रादयः तान्देवानभ्यर्च्य तन्मूलरूपैस्तदवातररूपैर्वा अश्वमेधादिकर्मविशेषं कृत्वा वा निर्गुणादिभावनया वा स्वं स्वं कार्यं कुतो न साधयेयुः ? उक्तविधया स्वस्वकार्यार्थमपि अन्यमर्थयमानाः देवाः

---

* ययौ कैलासमद्रीशं चकारेव तपोऽत्र च ।
स्वीयानेव गुणान् विष्णुर्भुंजन्नित्येन शोचिषा ॥
शर्वं तपः करोतीव मोहयामास दुर्जनान् ।
पूर्वं तेनोदितं यत्तल्लोकान् मोहयतांऽजसा ॥
शर्वं प्रति तवाहं तु कुर्यां द्वादशवत्सरम् ।
तपोऽसुराणां मोहाय सुराः संतु गतज्वराः ॥ इति ।
—इति च **महाभारततात्पर्यनिर्णये** (22/176-8)

स्वरक्षणार्थं करुक्यादिरूपं हरिमपेक्षमाणाः सद्गुणस्य हरेरुपासनयैव स्वस्वरूपनिष्पत्तिं चापेक्षमाणाः निर्गुणब्रह्म च कथं सर्वोत्तमतया मानयेयुः ? एवं चोक्तबलात् हयग्रीवाख्यहरेः सर्वोत्तमत्वमतमेव बहुसंवादसद्भावात् प्रामाणिकम् । ततोऽतिरिक्तं सर्वं मतं एकसंवादस्याप्यभावात् अप्रामाणिकमेवेति भाव इति स्थितम् । ॥ ४५ ॥

श्लोकेनैकेन लोकेशश्लोकाल्लेशोऽनुवर्णितः ।
तच्च सच्चरितश्चित्ते प्रत्यर्प्य प्रीयतां मम ॥ ४६ ॥

॥ इति श्रीमद्वादिराजपूज्यचरणकृततीर्थप्रबन्धे उत्तरप्रबन्धः ॥

स्वकृतश्लोकं सकौशलं हरावर्पयन् तत्प्रीतिं प्रार्थयते **श्लोकेनेति** । **एकेन श्लोकेन** पद्येन । **लोकेशश्लोकात्** लोकेशस्य श्रीनारायणस्य श्लोकात् कीर्तेः । जात्येकवचनमिदम् । बहुतरयशोराशित इत्यर्थः । 'पद्ये यशसि च श्लोक' इत्यमरः । **लेशः** अल्पो भागः अनेकावतारकथारूपः । **अनुवर्णितः** स्वशक्त्यनुसारेण वर्णितः । **तच्च** वर्णनकौशलं च । **सच्चरितः** शोभनचरितो नारायणः भगवान् । **चित्ते प्रत्यर्प्य** स्थापयित्वा अंगीकृत्येत्यर्थः । **प्रीयतां** प्रीतो भवतु । प्रीङ् प्रीणन इति धातोर्लोट् । ॥ ४६ ॥

॥ इति श्रीमत्कविकुलतिलकश्रीमद्वादिराजपूज्यचरणविरचिततीर्थप्रबंधस्य
टीकायां लक्ष्मीपतिभट्टोपाध्यायसूनुनारायणाचार्येण कृतायां
गुरुभावप्रकाशिकायां उत्तरप्रबंधः (II) संपूर्णः ॥

पूर्वप्रबंधः

गंगासागरसंगमः

अब्धे स्निग्धोऽसि सरसेष्वाद्योऽस्यब्जसखोऽप्यसि ।
मुखैरनेकैर्यो गंगामुखान्याचुंब्य जृंभसे ॥ १ ॥

वागीशभोगीशगिरीशमुख्यस्वर्गीशवंद्यांघ्रिसरोजयुग्मम् ।
योगीशसन्मानसवासयोग्यं नागेंद्रतल्पं प्रणतोऽस्मि नित्यम् ॥ १ ॥
हरिभक्तिसुधांभोधिसज्जलक्रीडनोत्सुकाः ।
गुरवो वादिराजार्याः करुणां वितरंतु मे ॥ २ ॥

श्रीभागीरथीसमेतसमुद्रं वर्णयति । **अब्ध** इति । **हे अब्धे** आपः धीयंते अस्मिन्निति अब्धिः समुद्रः । 'कर्मण्यधिकरणे चे'ति किप्रत्ययः । तस्य संबुद्धिः । [त्वं] **स्निग्धः** स्नेहः चिक्कणाख्यजलगुणः अनुरागश्च तद्युक्तः । **असि** । **सरसेषु** रसेन सहिताः सरसाः तेषु । रसो जलं शृंगारश्च । "रसश्च पारदे नीरे शृंगारादौ रसेप्विति" रत्नमाला । नदीनदेषु रसिकेषु चेत्यर्थः । **आद्योऽसि** प्राथमिकोऽसि । **अब्जसखोऽप्यसि** अब्जश्चद्रस्तस्य सखाऽप्यसि । अपि शब्दः समुच्चये । साध्यत्रयेऽप्येकं हेतुमाह । मुखैरिति । **यः** त्वं । **अनेकैः मुखैः** मुखमिव मुखानि तैः । नदीसमुद्रसंगमप्रदेशं मुखमित्याहुः । **गंगामुखानि** गंगा सहस्रमुखी भूत्वा समुद्रं गच्छतीत्यतः मुखानीति बहुवचनं । **आचुंब्य जृंभसे** अभिवर्धसे । जृभि गात्रविनामे लट् । यतोऽतः स्निग्धोऽसीत्यादिना संबंधः । अनेकमुखैः स्त्रीमुखचुंबनेन स्निग्धत्वं रसिकत्वं सदास्त्रीमुखचुंबनादिविलासरसस्य तदुद्दीपनविभावत्वाच्चंद्रोऽपि सखा । अतोऽब्जसुहृत्त्वं चोपपादितं भवति । ॥ १ ॥

---

* कर्मण्यधिकरणे च ।—(पा. सू. 3/3/93)

(पुरी) जगन्नाथः

जगन्नाथो विजयते जगतामर्चितः सदा ।
ज्ञानाख्यरम्यपरशोर्यं दारु जगुरागमाः ॥ २ ॥

पुरुषोत्तमं वर्णयति । **जगन्नाथ** इति । **सदा जगतामर्चितः** पूजितः । "कर्तृकर्मणोः कृतीति"[1] कर्तरि षष्ठी । अत एव **जगन्नाथः** पुरुषोत्तमः । **विजयते** उत्कृष्टो वर्तते । **यं** जगन्नाथं । **आगमाः**[2] 'अदो यद्दारु प्लवते सिंधोः पारे अपूरुष'मित्याद्यागमाः । **ज्ञानाख्यरम्यपरशोः** ज्ञानमित्याख्या यस्य स तथा स चासौ रम्यपरशुश्च तथा तस्य । **दारु** आधारभूतं काष्ठं । "काष्ठं दार्विंधनमित्यमरः" । **जगुः** अगायन् । गै शब्द-इति धातोर्लिट् । केवलदारुत्वस्य हीनत्वाद्भगवत्परा श्रुतिरिममेवार्थमभिप्रैतीत्युत्प्रेक्षा । यथा परशुराधारभूतदारुसंबद्ध एव वृक्षं छेत्तुं समर्थमिति भावः । अत्र संबधो विषयविषयिभावः । नत्वाश्रयाश्रयिभावः । परशौ तु आश्रयाश्रयिभावः । जगन्नाथमूर्तेर्दारुमयत्वादियमुक्तिः । ॥ २ ॥

(श्रीशैल)मल्लिकार्जुनः[3]

श्रीपर्वतकृता(श्रीशैलशिखरा)वासो भातीशो मल्लिकार्जुनः ।
बद्धस्वीयजटाजूटमध्यस्थ इव चंद्रमाः ॥ ३ ॥

---

[1] 'कर्तृकर्मणोः कृति'—पा. सू.(2/3/75)

[2] अदो यद्दारु प्लवते सिंधोः पारे अपूरुषम् ।
तदा रभस्व दुर्हणो तेन गच्छ परस्तरम् ॥
—इति ऋग्वेदे (X. 10. 155)

[3] अश्वमेधमवाप्नोति पूजयित्वा वृषध्वजम् ।
श्रीपर्वते महादेवो देव्या सह महाद्युतिः ।
न्यवसत् परमप्रीतो ब्रह्मा च त्रिदशैः सह ॥

मल्लिकार्जुनं वर्णयति । **श्रीपर्वतेति** । **श्रीपर्वतकृतावासः** श्रीपर्वतः श्रीशैलाख्यो गिरिस्तस्मिन् कृतः आवासो येन स तथोक्तः । **मल्लिकार्जुनः** मल्लिकावन्मल्लिकापुष्पवदर्जुनो धवलः मल्लिकार्जुनः । 'वलक्षो धवलोऽर्जुनः' इत्यमरः । **ईशः** मल्लिकार्जुनाख्यः शिवः । **बद्धस्वीयजटाजूटमध्यस्थः** । बद्धाः स्वीया जटाजूटाः । जटासमूहाः तेषां मध्यं तस्मिंस्तिष्ठतीति तथोक्तः । **चंद्रमा इव** चंद्र इव **भाति** शोभते । **पूर्णोपमा** । ॥ ३ ॥

अहोबल नृसिंहः

अहोबलनृसिंहस्य महोबलमुपाश्रिताः ।
असत्तमिस्रसंमिश्रां गणयामो न संसृतिम् ॥ ४ ॥

अहोबलनृसिंहं वर्णयति । **अहोबलेति** । **अहोबलनृसिंहस्य** अहोबलक्षेत्रस्थनृसिंहस्य । **महोबलं** महसस्तेजसः बलं महोबलं । **उपाश्रिताः** [वयं] **असत्तमिश्रसंमिश्रां** संतो न भवंतीत्यसंतः । मिथ्याज्ञानिनः प्रतिवादिनः त एव तमिस्रमंधकारस्तेन संमिश्रां युक्ताम् । **संसृतिं** संसारं । **न गणयामः** तिरस्कुर्म इत्यर्थः । गण संख्याने लट् । यथा दीपमाश्रितानामंधकारोपेतमार्गनिस्तरणं न दुर्घटम् । तथा नरसिंहतेजोबलमाश्रितानां कुत्सितप्रतिवादिभरितसंसारनिस्तरणं न दुर्घटमिति भावः । ॥ ४ ॥

यस्तंभे प्रकटीबभूव स मयि स्तंभायितेऽति स्फुटी-
भूयाद्यो भवनाशिनीतटगतच्छिंद्यात् स मेऽमुं भ्रमम् ।
योऽपाद्बालकमप्यसौ नरहरिर्मां बालिशं पातु यो
रक्षोः शिक्षदसौ प्रभुः खलकुलं शिक्षेद(क्षत्व)रूक्षप्रियः ५

तत्र देवह्रदे स्नात्वा शुचिः प्रयतमानसः ।
अश्वमेधमवाप्नोति परां सिद्धिं च गच्छति ॥

—इति महाभारते वनपर्वणि (85/19, 20)

यः इति । **यः** नरसिंहः । **स्तंभे** हिरण्यकशिपुगृहस्थाणौ । **प्रकटीबभूव** । **सः** नरसिंहः । **स्तंभायितेऽपि** स्तंभवदाचरतीति स्तंभायितस्तस्मिन् स्तंभसदृशोऽपि । ज्ञानादिशून्येऽपीत्यर्थः । **मयि स्फुटीभूयात्** । अपरोक्षीभूयादित्यर्थः । **यः** नृसिंहः **भवनाशिनीतटगतः** भवनाशिन्याः-भवनाशिन्याख्यनद्याः तटं तीरं गतः संश्रित इत्यर्थः । **सः** नरसिंहः । **मे अमुं भवं** संसारं । **छिंद्यात्** । छिदि द्वैधीकरण इति धातोर्लिङ् । भवनाशिनीतटस्थस्य भवनाशकत्वमुचितमिति भावः । अस्मिन्पद्ये सर्वत्रैवमेव भावो द्रष्टव्यः । **यः** नरसिंहः । **बालकमपि** प्रह्लादं । **अपात्** अरक्षत् । पा रक्षण इति धातोर्लङ् । **असौ नरहरिः** नरश्चासौ हरिः सिंहश्च नरहरिः । **बालिशं** पूर्वोत्तरानभिज्ञं । **मां पातु** रक्षतु । **यः** नरसिंहः । **रक्षः** हिरण्यकशिप्वाख्यराक्षसं । **अशिक्षत्** जघान । **अरूक्षप्रियः** शांतप्रियः । **असौ प्रभुः** नरसिंहः । **खलकुलं** दुर्जनसमूहं । **शिक्षेत्** । शिक्ष हिंसायामिति धातोर्लिङ् । ॥ ५ ॥

***विरुद्धधर्मधर्मित्वं सर्वांतर्यामितां तथा ।**
नरसिंहोऽद्भुतस्तंभसंभूतः स्पष्टयत्ययम् ॥ ६ ॥

विरुद्धेति । **अद्भुतस्तंभसंभूतः** । अद्भुतश्चासौ स्तंभसंभूतश्च अद्भुतस्तंभसंभूतः । **अयं नरसिंहः** नरश्चासौ सिंहश्च नरसिंहः । अन्यत्र सहानवस्थितनराकारसिंहाकारवान् । स्वस्मिन् विद्यमानं **विरुद्धधर्मधर्मित्वं** विरुद्धाः सहानवस्थानविरोधयुक्ताः ये धर्माः युगपदणुत्वमहत्त्वादयस्तेषां धर्मी आधारस्तस्य भावस्तत्त्वं तत् । **तथा सर्वांतर्यामितां** सर्वेषामंतर्यामी तस्य

---

* 'सर्वधर्मोपपत्तेः' इति ब्रह्मसूत्रम् (II. i. 38) ।

गुणाः श्रुताः सुविरुद्धाश्च देवे संत्यश्रुता अपि नैवात्र शंका ।
चिंत्या अचिंत्याश्च तथैव दोषाः श्रुताश्च नाज्ञैर्हि तथा प्रतीताः ॥
'इति सर्वगुणोपपत्तिश्रुतेश्च ॥—इति च तद्भाष्यम् ।

भावस्तत्ता तां सर्वांतर्गतत्वं । तथाशब्दः समुच्चये । **स्पष्टयति** प्रकटीकरोति । विरुद्धयोर्नरत्वसिंहत्वयोरधिकरणत्वेन विरुद्धधर्मधर्मित्वं । स्तंभसंभूतत्वेन सर्वांतर्यामित्वं स्पष्टयतीति भावः । नराकारसिंहाकारत्वाद्द्विश्वाकारतां स्पस्ष्टयतीति मायावादिनः । 'यः पंचाननः पांचजन्यवपुषा व्यादिष्ट विश्वात्मताम्' इति तत्वप्रदीपिकायामुक्तत्वात् । सिंहाकरत्वेन नरतादात्म्याभावस्य नराकारत्वेन सिंहतादात्म्याभावस्य उभयाकारत्वेन नरसिंहव्यतिरिक्तसकलजीवतादात्म्याभावस्य च सूचितत्वेन मायावाद्यभिलषितप्रमेयस्य विरुद्धत्वात् । नरसिंहाकारस्य प्रह्लादपरिपालनेन हिरण्यकशिपोरुदरविदारणेन विरुद्धत्वाच्च सर्वतादात्म्यस्य । नहि स्वात्मानमेव स्वयं रक्षति शिक्षयति चेति युक्तं । अतो यत्किंचिदेतत् । ॥ ६ ॥

विदारितरिपूदरप्रकटितांत्रमालाधरं
तदात्मजमुदावहप्रियतरोग्रलीलाकरम् ।
उदाररवपूरीतांबुजभवांडभांडांतरं
सदा नरहरिं श्रये नखरनव्यवज्रांकुरम्* ॥ ७ ॥

विदारितेति । विदारितरिपूदरप्रकटितांत्रमालाधरं विदारितं यद्रिपूदरं हिरण्यकशिपूदरं तस्मात् प्रकटिताः आंत्रमालाः आंत्राण्येव मालास्ताः धरतीति तथोक्तस्तं । **तदात्मजमुदावहप्रियतरोग्रलीलाकरं** तस्य हिरण्यकशिपोरात्मजः पुत्रः प्रह्लादस्तस्य मुत् हर्षस्तमावहंतीति तदात्मजमुदावहास्ताः च ताः प्रियतराः सज्जनानां प्रियतरास्ताश्च ता उग्राः दुष्टानां भयंकरास्ताश्च ता लीलाः विलासाश्च तासामाकरः आश्रयस्तं । **उदाररवपूरितांबुजभवांड-**

---

* पांत्वस्मान् पुरुहूतवैरिबलवन्मातंगमाद्यद्घटा-
कुंभोच्चाद्रिविपाटनाधिकपटुप्रत्येकवज्रायिताः ।
श्रीमत्कण्ठीरवास्य प्रततसुनखराः ....

—इति नखस्तुतौ ।

भांडांतरं । उदारः उत्कृष्टः रवः नादः तेन पूरितं यदंबुजभवांडभांडांतरं अंबुजात् हरिनाभिपद्मात् भवतीत्यंबुजभवो ब्रह्मा तस्यांडं ब्रह्मांडं तदेव भांडं मृण्मयपात्रविशेषः । तस्यांतरं मध्यं येन स तथोक्तस्तं । **नखरनव्यवज्रांकुरं** नखरा एव नखा एव नव्यवज्रांकुराः नव्याः स्तुत्याः वज्रांकुराः यस्य सः तथा तम् । **नरहरिं** नरश्चासौ हरिश्च तं नरसिंहं । **सदा** निरंतरं । **श्रये** अहमाश्रये । **पृथ्वीवृत्तम्** । ॥ ७ ॥

उद्यन्मध्वमतायुधेन परितः संसारसंज्ञे वने
माद्यन्मायिमतंगमर्दनविधौ सोऽहं सहायस्त्विति ।
हर्यक्षस्य सदृक्षतां वहति यस्तस्य द्वितीयोऽप्यहं
साजात्येन सदेति मानवतुलां पायान्नृसिंहः प्रभुः ॥ ८ ॥

उद्यदिति । यः नरसिंहः । **संसारसंज्ञे** संसार इति संज्ञा यस्य तत्संसारसंज्ञं तस्मिन् । **वने उद्यन्मध्वमतायुधेन** उद्यत् लसत् यन्मध्वमतं मध्वाचार्यकृतमतं तदेवायुधं तेन । **परितः** अभितः । **माद्यन्मायिमतंग-मर्दनविधौ** माद्यंतः उद्धताः मायिन एव मतंगा गजाः तेषां यन्मर्दनं पराजयरूपमर्दनं तस्य विधिराचरणं तस्मिन् । पर्वतविशेषवाचिमतंगशब्दो लक्षणया अतिकठोरत्वज्ञापनाय मतंगेति प्रयुक्तः । यद्वा मतंगः पर्वतः एषामस्तीति मतंगाः । अर्श आदिभ्योऽजिति मत्वर्थे[1] अच् । मतंगपर्वते-विद्यमानाः गजाः मतंगाः । **सोऽहं सदा सहायस्त्विति** [प्रदर्शनाय] **हर्यक्षस्य** सिंहस्य 'सिंहो मृगेन्द्रः पंचास्यो हर्यक्षः केसरी हरि'रित्यमरः । **सदृक्षतां** सदृक्षः सदृशस्तस्यभावस्सदृक्षता तां सिंहाकारमित्यर्थः । **वहति** धरति ।

---

[1] अर्श आदिभ्यो अच् । (पा. सू. 5/2/127)

[2] नरसिंहोऽखिलाज्ञानमतध्वांतदिवाकरः ।
जयत्यमितसज्ज्ञानसुखशक्तिपयोनिधिः ॥

—इति मायावादखण्डने ।

गजजये सिंहस्यैव सहायत्वसंभवात् सिंहाकारं बिभर्तीत्यर्थः । श्रीमध्वाचार्य-मतानुवर्तिभिः क्रियमाणमायावादिपराजयस्य नरसिंहः सहायो भवतीति भावः । **तस्य** श्रीमध्वाचार्यमतानुवर्तिनः पुरुषस्य **साजात्येन** समाना-जातिर्यस्य स सजातिः । सजातेर्भावः साजात्यं तेन मनुष्यत्वसाजात्येने-त्यर्थः । **अहं सदा द्वितीयोऽपि** सहायोऽपि [भवामीति प्रदर्शनाय] **मानव-तुलां** । मानवस्य तुला साम्यं मानवतुला तां मनुष्याकारमित्यर्थः [वहति] धरति । वह प्रापणे लट् [स] **प्रभुः** नृसिंहः [अस्मान्] **पायात्** । ॥८॥

भवनाशिनी

नृसिंहविलसत्पादकुशेशयकृतोत्सवे ।
भवनाशिनि मच्चीर्णपापानां भव नाशिनी ॥ ९ ॥

भवनाशिनीं प्रार्थयते । **नृसिंहेति** । **नृसिंहविलसत्पादकुशेशय-कृतोत्सवे** । ना चासौ सिंहश्च नृसिंहः । तस्य यौ विलसत्पादौ तावेव कुशेशये कमले । "सहस्रपत्रं कमलं शतपत्रं कुशेशय"मित्यमरः । तयोः कृतः अभिषेकादिना कृतः उत्सवो यया सा तत्संबुद्धिः । यद्वा नृसिंहविल-सत्पादयोः कृतः स्वांबुनि स्थितपद्मैः संपादितः उत्सवः लोकानामुत्सवो यया सा तत्संबुद्धिरिति वा । **हे भवनाशिनी** (त्वं) **मच्चीर्णपापानां** मम मया चीर्णानि कृतानि पापानि तेषां । **नाशिनी** विनाशकरी **भव** ॥ ९ ॥

निवृत्तिसङ्गमः

निवृत्तिसंगमो भाति यत्र मर्त्यमुपाश्रिताः ।
निवर्तंतेऽखिला दोषाः संयुनक्ति शुभावलिम् ॥ १० ॥

निवृत्तिसंगमं स्तौति । **निवृत्तिसंगम** इति । **यत्र** निवृत्तिसंगमे । **मर्त्यं** मनुष्यं । **उपाश्रिताः अखिला दोषा निवर्तंते** । [यः] निवृत्ति-

---

[1] निवृत्तिसंगमो हि—'कृष्णा, वेगो, मलापहरी, भीमरथी, तुंगा, भद्रा. भवनाशिनी चेति सप्तनदीनां संगमः ।

संगमः । **मर्त्यं** मनुष्यं । **शुभावलिं** शुभसंचयम् । **संयुनक्ति** संयोजयति । युजिर् योग इति धातुः [स] **निवृत्तिसंगमः** कृष्णवेणीमलापहारीभीमरथीतुंगाभद्राभवनाशिन्याख्यसप्तनदीनां संगमो **निवृत्तिसंगम** इत्युच्यते । **भाति** शोभते । तस्य सकलदोषनिवर्तकत्वात् शुभसंगमयितृत्वाच्च निवृत्तिसंगमत्वमिति भावः । ॥ १० ॥

तुङ्गभद्रा

नतोऽस्मि तुंगां विलसत्तरंगामघौघभंगां हरिपादसंगाम् ।
श्रितोऽस्मि भद्रां हृतपापनिद्रां विमुक्तिपद्यां विमलैकसाध्याम् ॥

तुंगभद्रां वर्णयति । **नतोऽस्मीति** । **विलसत्तरंगां** विलसंतस्तरंगाः यस्यां सा तथोक्ता ताम् । **अघौघभंगां** अघानां पापानामोघाः समूहास्तेषां भंगः यस्यास्सेति पंचमीबहुव्रीहिः । **हरिपादसंगां** हरेः पादौ तयोः संगो यस्यास्सा ताम् । **तुंगां** तुंगाख्यां नदीम् । **नतोऽस्मि** नमस्करोमि । अहमिति कर्तृपदाध्याहारः । **हृतपापनिद्रां** हृता परिहृता पापाख्यनिद्रा ताम् । **विमुक्तिपद्यां** । विमुक्तेर्मोक्षस्य पद्या पद्धतिः तां मोक्षमार्गभूतामित्यर्थः । 'सरणिः पद्धतिः पद्ये'त्यमरः । **विमलैकसाध्यां** विमलाः निर्मलांतःकरणाः पुरुषास्तैस्साध्यां प्राप्यां । **भद्रां** भद्राख्यां नदीम् । **श्रितोऽस्मि** आश्रितोऽस्मि । ॥ ११ ॥

तटिनीषु तुंगभद्रे स्वादूदकसंकुला त्वमसि नूनम् ।
कस्मात्तीर्थपदोऽसौ धत्ते त्वामेव दंष्ट्रयोर्नो चेत् ॥ १२ ॥

तटिनीष्विति । **हे तुंगभद्रे त्वं तटिनीषु** नदीषु मध्ये । निर्धारणे सप्तमी । "तटिनी ह्लादिनी धुनी"त्यमरः । **स्वादूदकसंकुला** स्वादु च तदुदकं च स्वादूदकं तेन संकुला व्याप्ता । **असि** भवसि । **नूनं** निश्चयः । **नो चेत् तीर्थपदः*** तीर्थानि पदे पादे यस्य स तीर्थपदः । **असौ** विष्णुः ।

* 'पुण्यश्लोकः तीर्थपादः'——इति कृष्णाष्टोत्तरशतनामस्तोत्रे ।

त्वामेव इतरनदीर्विहाय । **दंष्ट्रयोः** प्रधानदंतयोः । **कस्मात्** किमर्थं । **धत्ते** । माधुर्यास्वादनव्यतिरेकेण दंष्ट्रयोर्धारणे प्रयोजनाभावादिति भावः । वराहदंष्ट्रयोरुत्पन्नत्वात् तुंगभद्राया इयमुत्प्रेक्षा । ॥ १२ ॥

तुंगभद्रातीरस्थो विट्ठलः

चौर्यान्मातृनिबद्धचारुचरणः पापौघचौर्याद् बुधैः
बद्धस्त्वं पथि पुंडरीकमुनिना जारेति संबोधितः ।
तुंगातीरगतोऽसि विट्ठल दिशन्नन्याकृतिर्वांछितं
वेत्तॄणां यदि मे न दास्यसि पदं त्वत्संस्थितिः कथ्यते ॥१३॥

तुंगभद्रातीरस्थं विट्ठलं वर्णयति । **चौर्यादिति** । हे विट्ठल श्रीकृष्ण । **चौर्यात्** नवनीतादिचौर्यान्निमित्तात् । **मातृनिबद्धचारुचरणः** मात्रा यशोदया निबद्धौ चारुचरणौ यस्य स तथोक्तः । पश्चात् बुधहृदय-गुहां प्रविष्टस्तत्रापि । **पापौघचौर्यात् बुधैः** ज्ञानिभिः । **बद्धः** नवनीत चौर्यादिदिव्यकर्मस्मरणेन सकलदुरितक्षये सति निर्मलांतःकरणै ज्ञानिभिः स्वहृदये भक्तिपाशेन स्थापित इत्यर्थः । **त्वं** उभयत्रापि चौर्यनिमित्तबंधन-प्राप्त्याऽन्यत्र गच्छन् । **पथि** मार्गे भीमरथीतीरे । **पुंडरीकमुनिना** पुंडरीकाख्यमुनिना । **जारेति** उपपत इति । **संबोधितः** आहूतोऽसि । **अन्याकृतिः** चौर्यापवादगूहनार्थमन्यत्र गमने मम जारत्वमनेन ज्ञातमित्येव वेषांतरं परिगृह्णन् । **वेत्तॄणां** चौर्यजारत्वादिज्ञानवतां । **वांछितं** अभिलषितं । **दिशन्** स्वच्छिद्रमन्यत्र वक्ष्यंतीति भियैव प्रयच्छन् । **तुंगातीरगतोऽसि** पुंडरीकक्षेत्रात् तुंगायाः यत्तीरं तद्गतोऽसि प्राप्तोऽसि । यथा कश्चित् स्वदेशस्थैः स्वकृतचौर्यादिके ज्ञाते सति, ततः पलायन् स्वच्छिद्रवेत्तॄणां किंचित्किंचित् वांछितं प्रयच्छन् स्वदोषगूहनायाज्ञातचरं देशं गच्छति । तद्वदयमपि उत्तरदेशे ज्ञातचेष्टः दक्षिणदेशे आगत्य तिष्ठतीति भावः [हे विट्ठल] **यदि मे पदं** वांछितं मोक्षं । **न दास्यसि** [तदा] **त्वत्संस्थितिः** तव चोरत्वजारत्व-

वृत्तांतः । मया **कथ्यते** । कथ वाक्यसंदर्भ इति धातोः कर्मणि लट् । अहमप्यभीष्टमोक्षदानपर्यंतं जारोऽसि चोरोऽसीति त्वत्कथामेव कथयामि । मोक्षे दत्ते पुनरत्र संचाराभावान्नात्र कथयामीति भावः । गोपीजनजारनवनीतचोरेति वदतां श्रीविट्ठलो वांछितं ददातीति समग्रश्लोकस्य भावः । **अस्मिन् पद्ये गुरुभिरुक्तो भावो भूयांस्तिष्ठति । ग्रंथगौरवभयान्मया न लिख्यते । विषमालंकारः** । "इष्टासिद्धावनिष्टस्य भावे च विषमं मत"मिति तल्लक्षणात् । ॥ १३ ॥

(पंपा) विरूपाक्षः

पंपाध्यक्षो विरूपाक्षः संपदे स्यात्सतां सदा ।
यो हेमगिरिसीमायां राजते राजशेखरः ॥ १४ ॥

विरूपाक्षं वर्णयति । **पंपाध्यक्ष** इति । **पंपाध्यक्षः** पंपायाः अध्यक्षो अधिपतिः । **विरूपाक्षः** विरूपाक्षाख्यः शिवः । **सदा** सर्वदा । **सतां** सज्जनानां । **संपदे स्यात्** भूयात् । तस्य संपत्प्रदत्वं कथं घटत इत्यत आह । य इति । **यः राजशेखरः** राजा चंद्रः शेखरे यस्य स तथा । "राजा बह्वौ नृपे चंद्रे यक्षे क्षत्रियशक्रयो"रित्यमरः । चंद्रमौलिः शिवः । **हेमगिरिसीमायां** हेमकूटाख्यो गिरिः तस्य सीमा प्रदेशः तस्यां । **राजते** विराजते । हेमगिरिस्थितत्वाद्राजशेखरत्वाच्च तस्य संपत्प्रदत्वं न दुर्घटमिति भावः । १४

पंपाक्षेत्रम्

पंपा संपत्करी सेयं किं पापं न हरेन्नृणाम् ।
याऽधोमुखीकरोत्येतन्नामोच्चारणमात्रतः ॥ १५ ॥

पंपाक्षेत्रं वर्णयति । **पंपे**ति । **नृणां संपत्करी सेयं पंपा किं पापं न हरेत्** सर्वमपि पापं परिहरेदेवेत्यर्थः । **या** पंपा । **नामोच्चारणमात्रतः** केवलं नामोच्चारणमात्रं तस्मात् केवलं पंपेति नामोच्चारणेनैव **एतत्** पापं **अधोमुखीकरोति** अधः मुखं यस्य तदधोमुखं । अनधोमुखमधोमुखतया

संपद्यमानं तथाकरोतीति अधोमुखीकरोति । विनाशयतीत्यर्थः । सेवया किं वक्तव्यमिति भावः । पापमित्यस्य व्युत्क्रमोच्चारणे पंपेति स्यादतः पापस्याधोमुखत्वमिति । **चमत्कारोक्तिः** । ॥ १५ ॥

पंपाक्षेत्रस्थिता दुर्गा

मालाभिः समलंकृताऽतिविमला लोलोल्लसल्लोचना
शूलेन त्रिदलेन दैत्यकलने कालायितेन द्विषः ।
फाले पादतलं निधाय बलिनं योन्मूलयंती खलं
बाला मे बलदाऽस्तु लोलवलया श्रीबालहंपालया ॥ १६ ॥

पंपाक्षेत्रस्थितां दुर्गां वर्णयति । **मालाभिरिति** । **मालाभिः** रत्नमालाभिः पुष्पमालाभिश्च । **समलंकृता** सम्यगलंकृता **अतिविमला** अत्यंतनिर्मला। **लोलोल्लसल्लोचना** लोलानि चंचलानि उल्लसंति लोचनानि *त्रिनेत्राणि यस्याः सा तथोक्ता । **दैत्यकलने** दैत्यानां हिंसने । **कालायितेन** कालमृत्युवदाचरतीति कालायितं तेन । **त्रिदलेन** त्रीणि दलानि मुखानि यस्य तत्त्रिदलं तेन । **शूलेन** त्रिशूलेनेत्यर्थः । **द्विषः** शत्रोः महिषासुरस्य । **फाले** ललाटे । **पादतलं निधाय** पादेन शिर आक्रम्येत्यर्थः । **बलिनं** बलवंतम् । **खलं** दुष्टं । **महिषासुरं उन्मूलयंती या दुर्गा** । **लोलवलया** लोलानि चंचलानि वलयानि यस्याः सा तथोक्ता । **बाला** अनादिकालमारभ्यापि कुमारीवद्वर्तमाना । **श्रीबालहंपालया** श्रीमती च सा बालहंपाख्यक्षेत्रं आलयो निवासस्थानं यस्याः सा तथोक्ता [सा] दुर्गा । **मे** मम । **बलदा** बलप्रदा । **अस्तु** । ॥ १६ ॥

गजगह्वरम्

राजधानी जयति सा गजगह्वरसंज्ञिता ।
यत्र भांति गजा म(मा)ध्वराद्धांतधरणीधराः ॥ १७ ॥

---

* त्रिनेत्रत्वं च दुर्गायाः प्रायः सर्वत्र कथ्यते—इति तंत्रसारसंग्रहे (4/60)

गजगह्वरं वर्णयति । **राजधानीति** । **गजगह्वरसंज्ञिता** गजगह्वरं इति संज्ञा गजगह्वरसंज्ञा । सा संजाता अस्य इति गजगह्वरसंज्ञिता । **सा राजधानी** अपभ्रष्टभाषया **आनेगोंदी**ति पुरी । राजानः धीयंते अस्यामिति राजधानी । **जयति** उत्कृष्टा वर्तते । गजगह्वरत्वं वर्णयति । यत्रेति । **यत्र** गजगह्वराख्यपुर्यां । **मध्वराद्धांतधरणीधराः** मध्वराद्धांत एव श्रीमध्वाचार्यकृतसिद्धांत एव धरणी भूमिः तां धरंतीति तथा । धरा धरित्री-त्यमरः । मध्वसिद्धांतधरणीधराः पद्मनाभतीर्थश्रीमच्चरणप्रभृतयः श्रीमध्वा-चार्यशिष्यप्रशिष्यभूताः संन्यासिन एव **गजाः** । **भांति** शोभंते । भा दीप्ताविति धातुः । ॥ १७ ॥

जयतीर्थाः

माध्वग्रंथान् स्वबंधूनिव सरसहृदाऽऽलिंग्य विज्ञातभावः
संयोज्यालंकृताभिः स्वसहजमतिसंभूतवाग्भिर्वधूभिः ।

---

[1] विवृतोऽयं श्लोकः छलरीसंकर्षणाचार्यैर्जयतीर्थविजये (V. 22–27) ।

जयतीर्थमहाचार्यं चित्रचर्यं समार्चयत् ।
वादिराजः पुरा चारुवचनप्रसवैरिति ॥
दृष्ट्वा श्रीजयतीर्थार्यः सरसेन हृदा महान् ।
पौर्णबोधनिबन्धाग्र्यान् स्वबन्धूनिव सस्वजे ॥
ततो विज्ञातभावः संयोजयामास सूद्भवः ।
स्वटीकादारिकाग्र्याभिस्तान्निबन्धवरानसौ ॥
अत्यद्भुतस्वधीभार्याजाताभिर्ललितै पदैः ।
लसन्तीभिर्महाभावैर्दृश्याभिः सरसैर्नृभिः ॥
प्रादायान्योक्तिकादासीर्विद्वद्धृदयमन्दिरम् ।
प्रौढवृत्तिमहावृत्तीरसौ प्रादात् तदा मुदा ॥
अन्योन्ययोगमालोक्य तेषां तासां पुनः पुनः ।
स आर परमानन्दं ततो धन्यतमो हि सः ॥

कृत्वाऽन्योक्तीश्च दासीर्बुधहृदयगृहं प्रौढवृत्तीश्च वृत्ती-
र्दत्वाऽन्योन्याभियोगं जयमुनिरसकृद्वीक्ष्य रेमे कृतार्थः ॥१८॥

जयतीर्थं वर्णयति । **माध्वग्रंथानिति** । **जयमुनिः** जयतीर्थाख्य-मुनिः । **माध्वग्रंथान्** मध्वाचार्येण कृता माध्वास्ते च ते ग्रंथाश्च तान् भाष्यादीन् । **स्वबंधूनिव** स्वगृहागतान् स्वज्ञातीनिव ग्रंथनामाचार्यमुख-कमलोद्भूतत्वात् स्वपरमगुरूणामाचार्यकरकमलोद्भूतत्वाच्च उभयेषामेककुलो-द्भूतत्वेन स्वबंधुत्वमिति भावः । **सरसहृदा** रसेन स्नेहेन सहितं सरसं तच्च तत् हृच्च तेन । **आलिंग्य** स्वमनसा सम्यग्विचार्येत्यर्थः । **विज्ञातभावः** विज्ञातः भावः ग्रंथाभिप्रायो येन स तथोक्तः । अन्यत्र संभाषणादिना विज्ञाता गमनप्रयोजनस्तथाभूतस्सन् । **अलंकृताभिः** ओजःप्रसादमाधुर्या-दिगुणैर्वृत्त्यनुप्रासादिशब्दालंकारैर्भूषिताभिः । **स्वसहजमतिसंभूतवाग्भिः** स्वसहजमतिः स्वस्य सहजा स्वाभाविकी मतिः बुद्धिः तया संभूताभिर्वाग्भिः टीकारूपवाक्यरचनाविशेषैः टीकारचनायाः मूलग्रंथभावबोधपूर्वकत्वादिति भावः । तद्रूपाभिः । **वधूभिः संयोज्य** संगमय्य दशप्रकरणभाष्यादि-मूलग्रंथानामपि बहुत्वात्तट्टीकानामपि बहुत्वादुभयत्रापि बहुवचनम् । बहूनां वराणामनेककन्याप्रदातृपुरुषवत् बहुग्रंथटीकाकरणेन टीकाकाराणां महासा-हसिकत्वप्रदर्शनार्थं वधूवरत्वघटनार्थमेव स्वग्रंथानामेवं स्त्रीलिंगपदेनोक्तिः आचार्यकृतग्रंथानां पुल्लिंगपदेनोक्तिरित्यपि द्रष्टव्यम् । **अन्योक्तीः** अन्याश्च ता उक्तयश्च तास्तैस्तैर्वादिभिः कृतटीकांतरोक्तीः । **दासीः** किंकरीः । **कृत्वा** जयतीर्थकृतटीकावाक्यसौंदर्यदर्शनेन एतद्ग्रंथावली राज्ञीव तिष्ठति । अन्यग्रंथावली तु राजमहिष्याः दासीव तिष्ठति । अत एव दासीः कृत्वेत्युक्तं । **बुधहृदयगृहं** बुधानां विदुषां यद्धृदयं तदेव गृहं । **दत्वा** बुधेभ्यः स्वटीकां व्याख्याय तन्मनसि स्थापयित्वेत्यर्थः । **प्रौढवृत्तीः** प्रौढनामंतःकरणवृत्तीः

---

* अत्र 'गजगह्वरे जयतीर्थं वर्णयति'—इति मुद्रितपाठः । स तु मूलकोशेषु अदर्शनात् अप्रामाणिकत्वात् प्रमाणविरुद्धत्वाच्च अपपाठ एव ।

ज्ञानविशेषान्। **वृत्तीः** क्षेत्रादिजीवनोपायांश्च [दत्वा] प्रौढाः जयमुनिकृत-टीकां सदा परिशीलयंतीति भावः। **असकृत् अन्योन्याभियोगं** टीका-मूलयोः बहुवारं परस्परसंबंधमित्यर्थः। **वीक्ष्य** दृष्ट्वा। **कृतार्थः** कृतकृत्यः सन्। **रेमे**। यथा गृहस्थः स्वगृहागतज्ञातिपुरुषाणामुद्वाहापेक्षारूपमनो-भावं ज्ञात्वा संबंधयोग्यस्वसहोदरीपुत्रीरेव विवाह्य तासां दासीगृहक्षेत्रादिकं दत्वा वधूवराणामन्योऽन्यप्रेमपूर्वकसंसारं दृष्ट्वा सुखी भवति तद्वदिति भावः॥

श्रीवेंकटेशः

श्रीवेंकटलसच्छैलवासी दासीकृतामरः।
छायया पातु मां नित्यं श्रीनिवाससुरद्रुमः ॥ १९ ॥

श्रीवेंकटपतिं वर्णयति। **श्रीवेंकटेति**। **श्रीवेंकटलसच्छैलवासी** श्रीवेंकटाख्यः लसन् शैलः तस्मिन् वस्तुं शीलमस्यास्तीति तथोक्तः। **दासीकृतामरः** अदासाः दासाः संपद्यमानाः कृताः दासीकृताः। अभूत-तद्भावे च्विः। तादृशा अमराः देवाः येन स तथोक्तः। **श्रीनिवाससुरद्रुमः** श्रियः लक्ष्म्याः निवासः श्रीनिवासः स एव सुरद्रुमः कल्पवृक्षः। **छायया** कांत्या। "छाया सूर्यप्रिया कांतिऽरिति वैजयंती। **नित्यं मां पातु** रक्षतु। सुरद्रुमोऽपि मेरुपर्वतवासी। अभीष्टदानेन दासीकृतामरश्च भवति। ॥ १९॥

दृष्ट्वा दिशि दिशि स्वीयान् दयया पालयन्निव।
वर्तते विश्वतश्चक्षुर्वेंकटे वेंकटेश्वरः ॥ २० ॥

दृष्ट्वेति। **वेंकटेश्वर** वेंकटाख्यपर्वतस्येश्वरः श्रीनिवासः। **दिशि दिशि** [स्थितान्]। **स्वीयान्** स्वभक्तान्। **दृष्ट्वा दयया पालयन्निव** रक्षन्निव **विश्वतश्चक्षुस्सन्**। **वेंकटे** वेंकटपर्वते। **वर्तते** यथा कश्चिदुच्चस्थले स्थित्वा दूरस्थितान् पश्यति तद्वदिति भावः। **उत्प्रेक्षालंकारः**। ॥ २०॥

ये शंखचक्रोज्ज्वलबाहुयुग्माः स्वांघ्रिं भजंते भवसिंधुरेषः।
कटिप्रमाणस्त्विति वेंकटेशः स्फुटीकरोत्यात्मकरांबुजातैः ॥ २१ ॥

य इति । **वेंकटेशः** । **ये** जनाः । **शंखचक्रोज्ज्वलबाहुयुग्माः** शंखश्चचक्रं च ताभ्यामुज्ज्वलं शोभमानं बाहुयुग्मं येषां ते तथोक्ताः संतः । **स्वांघ्रिं** स्वपादम् । **भजंते** । [तेषां] जनानामेव । **एषः भवसिंधुः** संसारसमुद्रः **कटिप्रमाणः** कटिमात्रपरिमितो भवति । **इति आत्मकरांबुजातैः** आत्मनः स्वस्य करा एव अंबुजा तानि तैः । **स्फुटीकरोति** स्पष्टयति शंखचक्रयुक्तकराभ्यां शंखचक्रोज्ज्वलबाहुयुग्मा इत्यर्थः । वामकटिस्थ-वामकरेण भवसिंधुः कटिप्रमाण इत्यर्थः । दक्षिणकटिस्थाधोमुखदक्षिणहस्तेन स्वांघ्रिं भजंत इत्यर्थः स्पष्टो भवतीति बोद्धव्यं । यथा करपल्लवकौशलाभिज्ञः पुरुषः विवक्षितार्थं करचेष्टया दर्शयति तद्वदिति भावः । ॥ २१ ॥

प्रायोऽन्यत्र गतां श्रियं निजवशां कर्तुं मुहुः कांक्षितं
भक्तानां प्रदिशन् धनं प्रतिदिनं संसाध्य साध्यप्रियः ।
तत्तत्रैव पुनः सहस्रगुणितं पश्यन् घनश्यामलः
तेषां वेश्मसु विस्मितो *निघसति श्रीवेंकटेशोऽनिशम् ॥२२॥

प्राय इति । **घनश्यामलः** घनवत् मेघवत् श्यामलः । **साध्यप्रियः** साध्यानां देवानां प्रियः । **श्रीवेंकटेशः प्रायः** बहुशः **अन्यत्र** भक्तगृहे । **गतां श्रियं** संपत्तिं लक्ष्मीं च । **निजवशां कर्तुं** "लक्ष्मीः श्रीः कमला पद्मा-पद्मावासा हरिप्रियेति" हलायुधः । **भक्तानां मुहुः कांक्षितं** प्रदिशन् सन् [तेभ्यः] **प्रतिदिनं धनं** द्रविणं । **संसाध्य** संपाद्य तेभ्यो धनादानेन । धनात्मिका लक्ष्मीः । स्ववशा भवतीति बुद्ध्या तेभ्यो वांछितं दत्वा धनमुपायनरूपेण संसाध्येत्यर्थः । भक्ताः वेंकटपतिप्रार्थनया स्वेष्टलाभे सति वेंकटपतये धनसमर्पणं कुर्वंतीति भावः । **तत्** धनम् । **तत्रैव** भक्तगृह एव । **पुनः सहस्रगुणितं** स्वगृहीताद्धनात् सहस्रधाऽभिवृद्धम् । **पश्यन्**-वेंकटपतये धनसमर्पणेन स्वस्याधिकधनाभिवृद्धिर्भवतीति भावः । **विस्मितः**

---

* निवससि श्रीवेंकटेशानिशम् । (पा.)

सन् भाग्यात्मिका लक्ष्मीः[1] पुनः भक्तगृह एव तिष्ठतीत्याश्चर्येपितः सन् **तेषां** भक्तानां **वेश्मसु** गृहेषु । **अनिशं** निरतरं । **निवसति** निवासं करोति । श्रियं त्यक्तुमसमर्थः सन् एकैकर्मूत्या भक्तगृहे तिष्ठतीत्यर्थः । भक्ताः "वेंकटपतिकृपया धनसमृद्धिर्जायत" इति कृत्वा श्रीवेंकटपतिप्रतिमां स्वस्वगृहे पूजयंतीति भावः । ॥ २२ ॥

आरूढगरुडस्कंधमालिंगितरमाधरम्[2] ।
आनमज्जनसर्वस्वमाश्रये वेंकटेश्वरम् ॥ २३ ॥

गरुडोत्सवे गरुडोपरिस्थितं वेंकटपतिं वर्णयति । **आरूढेति** । **आरूढ-गरुडस्कंधं** । आरूढः गरुडस्कंधः येन स तम् । **आलिंगितरमाधरं** रमा च धरा च रमाधरे, आलिंगिते रमाधरे येन स तथोक्तस्तं । **आनमज्जन-सर्वस्वं** । सम्यक् नमंतः ये जनाः तेषां सर्वस्वं समस्तधनभूतं यद्वा आनमज्जनानां सर्वस्वं समस्तधनं तद्वदाचरतीत्यानमज्जनसर्वस्वमिति वा । **वेंकटेश्वरमाश्रये** । ॥ २३ ॥

शेषगिरिः

कशिपूकृत्य यं शेते गिरीकृत्याधितिष्ठति ।
अवतीर्णोऽनुजीकृत्य स तद्भक्ताग्रणीः फणी ॥ २४ ॥

शेषगिरिं वर्णयति । **कशिपूकृत्येति** । [श्रीनिवासः] **यं कशिपू-कृत्य** तल्पीकृत्य अकशिपुः कशिपुः संपद्यते तं तथाकृत्वा **शेते** । शेषशायि-त्वादिति भावः । [यं] शेषं **गिरीकृत्य** अगिरिः गिरिः संपद्यते तं तथाकृत्वा वेंकटगिरीकृत्य **अधितिष्ठति** [यं] शेषं **अनुजीकृत्य** अननुजः अनुजः संपद्यते तं तथा कृत्वाऽनुजीकृत्य । **अवतीर्णः** लक्ष्मणमनुजीकृत्य

---

1 'देवी भाग्यात्मिका नृणाम्'——इति म. भा. ता. निर्णये (3/7) ।

2 'लक्ष्मीधराभ्यामाश्लिष्टः'—इति तंत्रसारसंग्रहे (1/17) ।

श्रीरामरूपेणावतीर्ण इत्यर्थः । **फणी** फणा अस्य संतीति फणी स शेषः । **तद्भक्ताग्रणीः** तद्भक्तानां वेंकटपतिभक्तानामग्रणीः श्रेष्ठः । ॥ २४ ॥

श्रीनिवासः

शंकररविशशिमुख्याः किंकरपदवीमुपाश्रिता यस्य ।
वेंकटगिरिनाथोऽसौ पंकजनयनः परात्परो जयति ॥ २५ ॥

शंकरेति । शंकररविशशिमुख्याः शंकरश्च शिवश्च रविः सूर्यश्च शशी चंद्रश्च ते मुख्याः प्रधानाः येषां ते तथोक्ताः । [देवाः] **यस्य** वेंकटेशस्य **किंकरपदवीं** किंकराणां मार्गं भृत्यत्वमित्यर्थः । **उपाश्रिताः** संश्रिताः । **परात्** उत्तमात् ब्रह्मादिजगतः । **परः** उत्तमः **पंकजनयनः** पंकजवत् पद्मवत् नयने यस्य स तथा । **असौ वेंकटगिरिनाथः** वेंकटाख्यो गिरिस्तस्य नाथः श्रीनिवासः । **जयति** उत्कृष्टो वर्तते । ॥ २५ ॥

श्रीवेंकटगिरिद्रोणी क्षोणी यस्यानणीयसी ।
तं वरेण्यं सुराग्रण्यं वेदगम्यं भजामहे ॥ २६ ॥

श्रीवेंकटेति यस्य वेंकटेशस्य । **अनणीयसी** अतिसूक्ष्मा न भवतीत्यनणीयसी अत्यंतमुच्छ्रितेत्यर्थः । **श्रीवेंकटगिरिद्रोणी** श्रिया युक्तः वेंकटगिरिः तस्य द्रोणी निम्नभूता । **क्षोणी** मही निवासस्थानं । **वरेण्यं** श्रेष्ठं । **सुराग्रण्यं** सुराणामग्रं सुरसेनाग्रं तन्नयतीति सुराग्रणीस्तं । प्रधानत्वेन सुरसेनाग्रनेतारं । **वेदगम्यं** वेदैर्ज्ञेयं । **तं** वेंकटपतिं **भजामहे** । **अनुप्रासः शब्दालंकारः** । ॥ २६ ॥

श्रीवेंकटपते दीनगते रम्याकृते क्षितौ ।
समस्तमर्त्यार्तिप्रमर्दन किमस्ति ते ॥ २७ ॥

श्रीवेंकटपत इति । **दीनगते** दीनानां दारिद्र्यादिना दुःखितानां गतिराश्रयस्तस्य संबुद्धिः । **रम्याकृते** । **समस्तमर्त्यार्तिप्रमर्दन** समस्ता ये मर्त्यास्तेषामर्तिः क्लेशः तस्याः प्रमर्दनः विनाशकरस्तस्य संबुद्धिः । **हे**

श्रीवेंकटपते क्षितौ भूमौ ते समः अस्ति किं नास्तीत्यर्थः । पूर्वार्धे वैदर्भीरीतिः[1] । उत्तरार्धे गौडीरीतिः[2] । ॥ २७ ॥

समस्तसुजनाधारं दोषदूरं गुणाकरम् ।
[3]श्रीवेंकटाचलावासं श्रीनिवासं भजेऽनिशम् ॥ २८ ॥

समस्तेति । **समस्तसुजनाधारं** समस्ताः ये सुजनाः तेषामाधारस्तं । **दोषदूरं** दोषाणां दूरस्तं निर्दोषमित्यर्थः । **गुणाकरं** गुणानामाकरः आश्रयस्तं । **श्रीवेंकटाचलावासं** श्रीवेंकटाचले आवासो यस्य तम् । **श्रीनिवासमनिशं भजे** । ॥ २८ ॥

आनंदतीर्थवरदे दानवारण्यपावके ।
ज्ञानदायिनि सर्वेशे श्रीनिवासेऽस्तु मे मनः ॥ २९ ॥

आनंदतीर्थेति । **आनंदतीर्थवरदे** आनंदकरं[4] तीर्थं शास्त्रं यस्मात्स आनंदतीर्थः श्रीमध्वाचार्यः तस्य यो वरः ईप्सितार्थस्तं ददातीति तथोक्त-

---

[1] ओजःप्रकाशकैर्वर्णैर्बंध आडम्बरः पुनः ।
समासबहुला गौडी .... ॥
—इति साहित्यदर्पणे ।

[2] माधुर्यव्यंजकैर्वर्णै रचना ललितात्मिका ।
अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते ॥
—इति साहित्यदर्पणे ।

[3] अरायि काणे विकटे गिरिं गच्छ सदान्वे ।
शिरिम्बिठस्य सत्वभिस्तेभिष्ट्वा चातयामसि ॥
—इति ऋग्वेदे (X. 155/1)

[4] आनन्दरूपस्य परस्य पात्रधीरानंदसंदायि सुशास्त्रकुत्स यत् ।
आनंदतीर्थेति पदं गुरूदितं बभूव तस्यात्यनुरूपरूपकम् ॥
इति सुमध्वविजये (V. 2)

स्तस्मिन् । **दानवारण्यपावके** दानवा एवारण्यं तस्य पावक इव तस्मिन् राक्षससंहर्तरीत्यर्थः । **ज्ञानदायिनि** ज्ञानं दातुं शीलमस्यास्तीति ज्ञानदायी तस्मिन् **सर्वेशे** सर्वेषामीशः स्वामी तस्मिन् । **श्रीनिवासे मे मनः** चित्तं **अस्तु** । ॥ २९ ॥

सुवर्णमुखी

सुवर्णमुखि संसेवे सुवर्णाभं पयस्तव ।
सुवर्णशोभिवदनं कुरु मामंब निर्मलम् ॥ ३० ॥

आनन्दाय तीर्थं शास्त्रमस्येत्यानंदतीर्थः । आनंदेन विष्णुना शुद्ध इति वा ।

—इति सुमध्वविजयभावप्रकाशिकायाम् (V. 2)

मध्वित्यानंद उद्दिष्टो वेति तीर्थमुदाहृतम् ।
मध्व आनंदतीर्थः स्यात् तृतीया मारुतीतनुः ॥

—इति छांदोग्यभाष्योदाहृते भावबृहते(सद्भावे)

त्वं चापि गच्छ शैलेंद्रं पूर्वं स्वर्णमुखीतटे ।
यत्र ब्रह्मशिला नाम सरिन्मध्ये च वर्तते ॥
अगस्त्यतपसा पश्चाद् गयासान्निध्यमत्र वै ।
पादा ईशानविष्ण्वादिदेवानां तत्र संति हि ॥
यतिरूपो मातरिश्वाऽष्टाविंशतितमे कलौ ।
अवतीर्य वसत्यत्र मध्वनामा वरं विभोः ॥
अवाप तपसा पुण्यः प्रीत्या चागस्त्ययोगिनः ।
तत्स्थापितालये पुण्ये चातुर्मास्यं करिष्यति ॥
शुकः श्रोष्यति सच्छास्त्रं पद्मतीर्थादिहागतः ॥

—इति श्रीविजयींद्रतीर्थश्रीपादोद्धृत ब्रह्मपुराण (क्षेत्रकांडे वेंकटगिरिमाहात्म्ये तृतीयेऽध्याये शंखलिखितसंवादे) वचनम् (मध्वाध्वकण्टकोद्धारे) ।

सुवर्णमुखीं वर्णयति । **सुवर्णमुखीति** । **हे सुवर्णमुखि** नदि **तव सुवर्णाभं** सुवर्णस्य **हेम्नः** आभेव आभा यस्य तद्वत्पीतमित्यर्थः । **पयः** जलं **संसेवे** सेवृ सेवायामिति धातोर्लट् । **हे अंब** मातः **सुवर्णमुखि मां सुवर्णशोभिवदनं** सुवर्णैः शोभनाश्च ते वर्णाश्च सुवर्णाः तैः कृष्णरामेत्यादि-हरिनामाक्षरैः । "वर्णो द्विजादौ शुक्लादौ स्तुतौ वर्णं तु वाक्षर"इत्यमरः । शोभि शोभावद्वदनं मुखं यस्य स तथा तम् । अत एव **निर्मलं** शुद्धांतः-करणं **कुरु** । ॥ ३० ॥

कांची वरदराजः

रम्यो वरदराजोऽयं रसिकाग्रेसरो ध्रुवम् ।
कथमात्मवधूश्लाघ्यकांचीदेशे न चेद्वसेत् ॥ ३१ ॥

कांचीवरदराजं वर्णयति । **रम्य** इति । **रम्यः** रमणीयः **अयं वरदराजः** वरं ददातीति वरदाः ब्रह्मादिदेवास्तेषां राजा प्रभुः । **रसिकाग्रे-सरः** रसिकेषु शृंगाररसवत्सु नायकेषु अग्रेसरः श्रेष्ठो भवति । **ध्रुवं** निश्चयः । **न चेत्** रसिकाग्रेसरो न भवति चेत् **आत्मवधूश्लाघ्यकांचीदेशे** आत्मनः स्वस्य वधूः भूमिस्तस्याः श्लाघ्यः यः कांचीदेशः कांच्याख्यप्रदेशः तस्मिन् नितंब इति ध्वनिः । **कथं वसेत्** । तस्मात् सदा आत्मवधूश्लाघ्यकांची-देशस्थितत्वाद्रसिकाग्रेसरो भवति । वध्वास्समीप वास्यपि रसिक इत्युच्यते । अयं तु वधूकांचीदेशवासित्वाद्रसिकाग्रेसर इति भावः । **उत्प्रेक्षालंकारः** ॥

याचे वरदराज त्वाम् कांचीशेह न किंचन
चेतनाचेतनजगद्वरं त्वामेव देहि मे* ॥ ३२ ॥

इदानीमैहिकामुष्मिकफलानपेक्षिणामेकांतभक्तानामपि कांचीपतेर्वरद-राजत्वमुपपादयन् विभावनालंकारेण तमेव स्तौति । **याच** इति । **हे कांचीश वरदराज इह** संसारे **किंचन** अर्थादिकं । **त्वां न याचे** [किंतु] **चेतनाचेतनजगद्वरं** चेतनाश्चाचेतनाश्च चेतनाचेतनास्तेभ्यः जगद्भ्यः वरं श्रेष्ठं

* 'एकांतानां न कस्यचित् । अर्थे नारायणो देवः'—इति गीतातात्पर्ये (7/29) ।

त्वामेव मे मह्यं **देहि** । अस्मान् प्रति लौकिकवरदायकत्वेन वरदराजत्वासंभवेऽपि वरशब्दस्य श्रेष्ठवाचकत्वादेकांतभक्तानामपि त्वदपेक्षायाः संभवादुक्तविधया त्वामेव दत्वा वरदराजत्वं संपादयेति भावः । **श्लिष्टगर्भितविभावनालंकारः** । ॥ ३२ ॥

द्विजेष्टदातृत्वमजार्चितत्वमजन्मतां स्वां मखभोक्तृतां च ।
व्यनक्त्ययं श्रीपतिरग्रहारपरीतधातृक्रतुवेदिजातः ॥ ३३ ॥

द्विजेति । **द्विजेष्टदातृत्वं** द्विजानां यदिष्टं तस्य दाता तस्य भावस्तत्वं तत् । **अजार्चितत्वं** अजेन ब्रह्मणा अर्चितः पूजितस्तस्यभावस्तत्वं तत् । **अजन्मतां** न विद्यते जन्म यस्य स अजन्मा तस्य भावस्तत्ता तां योनिमुखादुत्पत्त्यभावमित्यर्थः । **स्वां** स्वकीयां **मखभोक्तृतां च** मखानां यज्ञानां भोक्ता तस्य भावस्तत्ता तां च । **अग्रहारपरीतधातृक्रतुवेदिजातः** अग्रहारैर्ब्राह्मणग्रामैः परितः इता प्राप्ता परीता । सा च सा धातृक्रतुवेदिः चतुर्मुखेन क्रियमाणाश्वमेधयज्ञे परिष्कृता वेदिर्भूमिरित्यर्थः । 'वेदिः परिष्कृता भूमि'रित्यमरः । तस्यां जातः प्रादुर्भूतः । **अयं श्रीपतिः** वरदराजः **व्यनक्ति** गमयति । 'विपूर्वादंजूव्यक्तिम्रक्षणकांतिगतिष्विति धातोर्लट् । अग्रहारपरितेत्यनेन द्विजेष्टदातृत्वं धातृक्रत्वित्यनेन अजार्चितत्वं मखभोक्तृत्वं च वेदिजात इत्यनेन जननराहित्यं च अभिव्यज्यत इति बोद्धव्यम् । ॥३३॥

एकाम्रेश्वरः

कंतुरम्यशराक्रांतस्वांतं मत्वेव पार्वती ।
आम्रमूले स्थितं शंभुमालिंग्यास्ते शुचिस्मिता ॥ ३४ ॥

एकाम्रनाथं वर्णयति । **कंत्विति** । **शुचिस्मिता** शुचि मनोहरं स्मितं यस्यास्सा तथोक्ता । **पार्वती आम्रमूले** आम्रस्य चूतवृक्षस्य मूलं तस्मिन् । **स्थितं शंभुं** स्वकांतं शिवं । **कंतुरम्यशराक्रांतस्वांतं** कंतोः कामस्य 'कंतुः

कामो मनोहर'इति केशवः । यः रम्यः शरः—चूतरूपमनोहरबाणस्तेनाक्रांतं विद्धं स्वांतं हृदयं यस्य स तथोक्तस्तम् । **मत्वेव** ज्ञात्वेव आम्रस्य कामशरत्वादिति भावः । **आलिंग्य** हृदयलग्नशरोद्धरणायाश्लिष्य **आस्ते** तिष्ठति । अंगनालिंगनेन अनंगजबाधानिवृत्तिर्भवतीति भावः । शिवकांचीलिंगस्य मध्यं पार्वत्यालिंगनवशादीषत्सूक्ष्ममिति **प्रथा** । लिंगस्य पृष्ठभागे दैविकश्चूतवृक्षोऽपि तिष्ठति । तस्मादत्रैवालिंगने **कारणोत्प्रेक्षेयम्** । ॥ ३४ ॥

कामाक्षी

प्रपद्ये तव कामाक्षि चरणौ शरणं सदा ।
यत्सौंदर्याब्धिं द्रष्टुं त्रिनेत्रोऽभून्महेश्वरः ॥ ३५ ॥

कामाक्षीं वर्णयति । **प्रपद्य** इति । **हे कामाक्षि** कामप्रदे अक्षिणी यस्यास्सा तथोक्ता तत्संबुद्धिः हे पार्वति **तव चरणौ सदा शरणं प्रपद्ये** गच्छामि । पद्लृ गताविति धातोर्लट् । **महेश्वरः** महांश्चासौ ईश्वरश्च महेश्वरश्शिवः । **यत्सौंदर्याब्धिं** यस्याः कामाक्ष्याः सौंदर्यं तदेवांबुधिः तं **द्रष्टुं त्रिनेत्रः** त्रीणि नेत्राणि यस्य स त्रिनेत्रः **अभूत्** । सौंदर्यं द्रष्टुं लोचनद्वयं नालमिति त्रिनेत्रोऽभवदिति भावः । तादृशसौंदर्यवती कामाक्षीति तात्पर्यम् । **उत्प्रेक्षालंकारः** । व्यंजनकाभावेऽप्युत्प्रेक्षा गम्यते । ॥ ३५ ॥

उत्पादयंस्त्वयि सुतौ गिरिजे गिरीशः
सौंदर्यभंगजभियेव भवो भवत्याः ।
कामाक्षि विघ्नहरमेकमसावकार्षीत्
षाण्मातुरं त्वपरमंगजभंजकोऽपि ॥ ३६ ॥

उत्पादयन्निति । **हे गिरिजे** गिरेर्हिमवत्पर्वताज्जातेति गिरिजा तत्संबुद्धिः । **हे कामाक्षि** । **गिरिशः** । गिरेः कैलासपर्वतस्य ईशः स्वामी । **असौ भवः** शिवः । **अंगजभंजकोऽपि** अंगजः कामः तस्य भंजको विनाशकस्तथापि मन्मथहंताऽपीत्यर्थः । **त्वयि सुतौ** द्वौ पुत्रौ **उत्पादय्न**

भवत्या कांतायास्तव । **सौंदर्यभंगजभियेव** सौंदर्यस्य लावण्यस्य यो भंगो नाशस्तस्माज्जातेति सौंदर्यभंगजा सा च सा भीश्च तयेव । "प्रसवांतं हि यौवन"मिति न्यायात् तारुण्यनिमित्तकलावण्यनाशजन्यभयेनेव । **एकं** पुत्रं **विघ्नहरं** विघ्नान् हरतीति विघ्नहरः तं विघ्नहरं । **अकार्षीत्** अकरोत् । सर्वस्य विघ्नहर्ता स्वमातृयौवनस्य विघ्नं परिहरिष्यतीति बुध्या विघ्नहरनामानमकरोदिति भावः । **अपरं तु** अन्यं पुत्रं तु **षाण्मातुरं** षण्णां मातृणामपत्यं पुमान् षाण्मातुरः तम् । [1]'मातुरुत्संख्यासंभद्रपूर्वाया' इत्यपत्यार्थे अण्प्रत्ययः उकारश्चांतादेशः । [2]'उरण् रपर' इतिरपरत्वं [3]'तद्धितार्थोत्तरपदसमाहारे चे'ति समासः [अकार्षीत्] अकरोत् । डुकृञ् करण इति धातोर्लुङ् । 'सिचि वृद्धिः[4] । स्तन्यपानेन स्तनशैथिल्ये सौंदर्यहानिर्भविष्यतीति भियेव तस्योपमातृः प्रकल्प्य षाण्मातुरमकरोदिति भावः । "षाण्मातुरः शक्तिधरः कुमारः क्रौंचदारणः" इत्यमरः । विरक्तस्यापि शिवस्य रागजनयित्र्याः कामाक्ष्याः सौंदर्यातिशयः कथं कथनीय इति भावः । **अतिशयोक्तिरलंकारः** । ॥ ३६ ॥

अरुणगिरिनाथः

फणिगणवरभूषः पार्वतीश्लाघ्यवेषः
खलजनकृतरोषः खंडितात्मीयदोषः ।
सदरुणगिरिवासः शक्रसूर्याद्यधीशः
परिहृतभवपाशः पातु मां पार्वतीशः ॥ ३७ ॥

अरुणगिरिनाथं वर्णयति । **फणिगणे**ति । **फणिगणवरभूषः** फणिनां सर्पानां गणः । स एव वरा उत्तमा भूषा भूषणं यस्य स तथोक्तः ।

---

[1] मातुरुत्संख्यासंभद्रपूर्वायाः (पा. सू. 4/1/115)
[2] उरण् रपरः (पा. सू. 1/1/51)
[3] तद्धितार्थोत्तरपदसमाहारे च (पा. सू. 2/1/51)
[4] सिचि वृद्धिः परस्मैपदेषु (पा. सू. 7/2/1)

पार्वतीश्लाघ्यवेषः पार्वत्या श्लाघ्यः काम्यः वेषः आकारो यस्य स तथोक्तः । **खलजनकृतरोषः** खलजनाः दुष्टजनाः तेषु कृतः रोषो येन स तथोक्तः । **खंडितात्मीयदोषः** खंडिताः छिन्नाः आत्मीयेषु दोषाः येन स तथोक्तः । **शक्रसूर्याद्यधीशः** शक्रश्च सूर्यश्च तावेव आदी येषां ते शक्रसूर्यादयस्तेषामधीशः स्वामी । **परिहृतभवपाशः** परिहृतः भव एव संसार एव पाशो येन स तथोक्तः । ज्ञानोपदेष्टृत्वादिति भावः । **सदरुणगिरिवासः** सन् उत्तमः यः अरुणगिरिः अरुणाख्यपर्वकस्तस्मिन् वासोऽवस्थानं यस्य स तथोक्तः । **पार्वतीशः** पार्वत्या उमायाः ईशः भर्ता शिवः **मां पातु** रक्षतु पा रक्षण इति धातोर्लोट् । ॥ ३७ ॥

पिनाकिनीतीरस्थः त्रिविक्रमः

त्रिविक्रम न विक्रमं गणयितुं फणी शक्नुते[1]
तवेश नतवेपथुप्रशमनं परे किं पुनः[2] ।
अजांडघन(दृढ)भांडखंडनपटीयसी यन्मृदु-
प्रदीप्तनिगमोक्तपन्नखशिखा जगद्व्यापिनी ॥ ३८ ॥

---

[1] गायन् गुणान् दशशतानन आदिदेवः
शेषोऽधुनाऽपि समवस्यति नास्य पारम् ।
—इति भागवते (II. 7/41)

[2] नांतं विदाम्यहममी मुनयोऽग्रजास्ते
मायाबलस्य पुरुषस्य कुतोऽपरे ये ॥
—इति भागवते ((2/7/41)

नैवोदापुर्गृणंतोऽतं यद्गुणानामजादयः ॥
—इति द्वादशस्तोत्रे (I/12)

विष्णोर्नु वीर्यगणनां कतमोऽर्हतीह यः पार्थिवान्यपि कविर्विममे रजांसि
—इति भागवते (2/7/40)

विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि ।
यो अस्कभायदुत्तरं सधस्थं विचक्रमाणस्त्रेधोरुगायः ॥
—इति ऋग्वेदे (I. 154)

पिनाकिनीतीरस्थं त्रिविक्रमं वर्णयति । **त्रिविक्रमेति** । **हे ईश** स्वामिन् । **त्रिविक्रम** । **नतवेपथुप्रशमनं** नतानां नमस्कृतानां यो वेपथुः कंपः तस्य भयस्येत्यर्थः, प्रशमनं विनाशः येन स तथा तम् । **तव विक्रमं** पराक्रमं **गणयितुं** संख्यातुम् । **फणी** सहस्रवदनः शेषः **न शक्नुते** न समर्थो भवति **परे** शेषादन्ये न शक्नुवंतीति **किं पुनः** किं वक्तव्यमित्यर्थः । तत्र एकं पराक्रमं वर्णयति अजांडेत्यादिना । **जगद्व्यापिनी** जगद्ब्रह्मांडं व्याप्तुं शीलमस्येति जगद्व्यापिनी । **यन्मृदुप्रदीप्तनिगमोक्तपन्नखशिखा** यस्य त्रिविक्रमस्य मृदुः कोमलः स चासौ प्रदीप्तश्च प्रकृष्टकांतियुक्तस्स चासौ निगमोक्तश्च "[3]त्रीणि पदा विचक्रमे" [2]"विचक्रमे पृथिवीमेष एता"मित्यादिवेदः तेनोक्तस्स चासौ पञ्च पादश्च तस्य यो नखस्तस्य शिखा अग्रं । **अजांड-घनभांडखंडनपटीयसी** । अजांडं ब्रह्मांडं तदेव घनभांडं दृढमृण्मयपात्र-विशेषस्तस्य खंडनं विभेदनं तस्मिन् पटीयसी अतिसमर्था । अतः त्रिविक्रमस्य विक्रमं वक्तुं न समर्थ इत्यर्थः । ॥ ३८ ॥

वृद्धाचलेशः

वृद्धाचलकृतावासः सद्योजातस्त्रिलोचनः ।
अद्यैव ज्ञाननयनं वर्धयत्वचलं मयि ॥ ३९ ॥

ब्रह्मेशानादिभिः सर्वैः समेतैर्यद्गुणांशकः ।
नावसाययितु शक्यो व्याचक्षाणैश्च सर्वदा ॥

—इति च महाभारततात्पर्यनिर्णयोदाहृतभारतवचनम् (2/118)

गणयेद्रमाऽस्य न गुणानखिलांश्चतुराननश्चतुरवागपि नो ।
न वयं सहस्रवदना अपि तानपरोदितानतिवदेम पुनः ॥

—इति सुमध्वविजये (11/19)

[3] ऋग्वेदे (1/22/18)

[4] ऋग्वेदे (7/100/4); तै. ब्रा. (2, 4, 3, 5)

वृद्धाचलेशं वर्णयति । **वृद्धाचलेति** । **वृद्धाचलकृतावासः** वृद्धाचलाख्यो यो अचलस्तस्मिन् कृतः आवासो येन स तथोक्तः । **सद्योजातः** सद्योजाताख्यः **त्रिलोचनः** शिवः । **अद्यैव** अधुनैव । **मयि अचलं** नित्यं । **ज्ञाननयनं वर्धयतु** पूर्वार्धोक्तपदचतुष्टयेन उत्तरार्धोक्तपदार्थचतुष्टयसूचनं यथायोग्यं द्रष्टव्यम् । ॥ ३९ ॥

हराय भजकानिष्टहराय पुरवैरिणे ।
भवाय भवते भूयाच्छिवाय शिरसा नमः ॥ ४० ॥

हरायेति । **हराय** हरतीति हरस्तस्मै दुर्जनेष्टहर्त्र इत्यर्थः । **भजकानिष्टहराय** भजकानां यदनिष्टं तद्धरतीति भजकानिष्टहरस्तस्मै । **पुरवैरिणे** पुराणां त्रिपुराणां वैरी तस्मै । **शिवाय** मंगलाय । **भवाय** श्रीमहादेवाय । **भवते** तुभ्यं । **शिरसा नमः** नमनं **भूयात्** । ॥ ४० ॥

श्रीमुष्णश्वेतवराहः

वराह वरदंष्ट्रया कुटिलया कठोरं रिपुं
विदीर्य सुरधुर्य गां निजपदारविंदानुगाम् ।
उपेत्य सुखचित्तनुः सरसलीलयाऽऽलिंग्य तां
सितांग जगतां गते विहरसीह पुण्यस्थले ॥ ४१ ॥

श्रीमुष्णश्वेतवराहं वर्णयति । **वराहेति** । **सितांग** सितं शुभ्रं अंगं यस्य स तथा तत्संबुद्धिः । **जगतां गते** । **सुरधुर्य** सुरेषु धुर्य श्रेष्ठ । **हे वराह** । **कुटिलया** वक्रया । **वरदंष्ट्रया** उत्तमदंतेन । **कठोरं** तीक्ष्णम् । **रिपुं** हिरण्याक्षं **विदीर्य** भित्वा **सुखचित्तनुः** सुखं च चिद् ज्ञानं सा च ते तनुर्यस्य स तथा । [त्वं] **निजपदारविंदानुगां** निजे स्वीये पदे पादौ त एव अरविंदे तयोरनुगां भृत्यां **गां** भूमिं **उपेत्य** । **सरसलीलया** रसेन विलासेन सहिता सरसा सा च सा लीला च तया । **तां** भूमिं **आलिंग्य इह पुण्यस्थले** पुण्यक्षेत्रे **विहरसि** क्रीडां करोषि । ॥ ४१ ॥

कुम्भघोणस्थः शार्ङ्गपाणिः

कुंभघोणे वस श्रीश शार्ङ्गमाच्छादय प्रभो ।
तथाऽप्यतुललावण्यैर्जनास्त्वां जानतेऽच्युतम् ॥ ४२ ॥

कुंभघोणस्थं शार्ङ्गपाणिं वर्णयति। **कुंभघोण** इति। **हे प्रभो** समर्थ। **श्रीश** लक्ष्मीपते [त्वं]। **कुंभघोणे** कुंभघोणाख्यक्षेत्रे। रूपमाच्छादयितुं घटांतः-प्रदेशप्रविष्ट इति **ध्वनिः**। **वस** तिष्ठ। **शार्ङ्गमाच्छादय** शार्ङ्गमधः कृत्वा तदुपरि शयनेनासाधारणस्थ शार्ङ्गस्याच्छादनं कुरु। **तथापि**। **जनास्त्वां अतुललावण्यैः** अतुलानि असदृशानि लावण्यानि सौंदर्याणि तैर्लिंगैः **अच्युतं** श्रीनारायणं **जानते** जानंति। ज्ञा अवबोधन इतिधातोर्लट्। असदृशलावण्यस्यासाधारणत्वात् तदाच्छादनस्य कर्तुमशक्यत्वादिति भावः। अतिसुंदरः श्रीशार्ङ्गपाणिरिति तात्पर्यार्थः। ॥ ४२ ॥

हृतभूभारदैतेय कृतविश्वजनावन ।
शार्ङ्गपाणे शराणां ते लक्ष्यं पापानि मेऽधुना ॥ ४३ ॥

॥ इति श्रीमद्वादिराजपूज्यचरणकृततीर्थप्रबन्धे पूर्वप्रबन्धः (III) ॥

हृतेति। **हृतभूभारदैतेय** हृताः संहृताः भुवो भारायिताः दैतेयाः दैत्याः येन स तथोक्तस्तत्संबुद्धिः। **कृतविश्वजनावन** कृतं विश्वजनस्य अवनं रक्षणं येन स तथोक्तस्तत्संबुद्धिः। कृतायुधप्रयोजनेति भावः। **हे शार्ङ्गपाणे अधुना ते** तव **शराणां लक्ष्यं** शरव्यं। 'लक्ष्यं लक्षं शरव्यं चे'त्यमरः। **मे** मम **पापानि**। शरव्यभूतदैत्यहननस्य प्रागेव जात-त्वाच्छरव्यांतराभावान्मत्पापेष्वेव शरं मुंचेति भावः। पापहरिहारं कुर्विति तात्पर्यम्। ॥ ४३ ॥

॥ इति श्रीमत्कविकुलतिलकश्रीमद्वादिराजपूज्यचरणविरचिततीर्थप्रबंधस्य
टीकायां लक्ष्मीपतिभट्टोपाध्यायसूनुनारायणाचार्येण कृतायां
गुरुभावप्रकाशिकायां पूर्वप्रबंधः (III) संपूर्णः ॥

दक्षिणप्रबंधः

रङ्गनाथः

कावेरीहृदये वसन् कमलभूतातः कृपावीक्षणै-
र्जीवांहः शमयन् श्रिया च धरया सेव्योऽतिभ(भा)व्यो विभुः ।
देवैरावरणस्थितैः कृतनतिः शेषांगशायी सदा
भावे मे विधुपुष्करिण्यधिपतिः श्रीरंगनाथोऽस्त्वयम् ॥ १ ॥

व्या॥ श्रीवादिराजकविताकावेरीहृदयास्पदम् ।
तदंतरंगधामानं वाजिवक्त्रं नतोऽस्म्यहम् ॥

श्रीरंगनाथं वर्णयति । **कावेरी**ति । **कावेरीहृदये** कावेर्योरुभयोः कावेर्योः हृदयं मध्यं तस्मिन् । **वसन्** निवसन् **कमलभूतातः** कमलाद्भवतीति कमलभूः ब्रह्मा तस्य तातः पिता । 'तातोऽनुकंप्ये पितरी'ति रत्नमाला । **कृपावीक्षणैः** कृपाप्रधानानि वीक्षणानि तैः । शाकपार्थिवादिवन्मध्यमपदलोपिसमासः । **जीवांहः** जीवानां पापं । **शमयन्** परिहरन् । **श्रिया** लक्ष्म्या । **धरया** भूम्या **च** । **सेव्यः** । **अतिभाव्यः** अत्यंतमनोहरः । **विभुः** समर्थः । **आवरणस्थितैः** आवरणे स्थिताः आवरणस्थिताः तैः । परिवारतया परितः स्थितैरित्यर्थः । **देवैः** ब्रह्मादिभिः । **कृतनतिः** कृता नतिर्नमस्कारः यस्य स तथा । [1]'अनेकमन्यपदार्थ' इति समासः **शेषांगशायी** शेषस्य यदंगं तस्मिन् शेत इति शेषांगशायी[2] । **विधुपुष्करिण्यधिपतिः** विधोश्चंद्रस्य या

---

[1] अनेकमन्यपदार्थे (पा. सू. 2/2/24)

[2] शृंगारसिंधुं स भुजंगशायिनं श्रीरंगवासं कृतमंगलं सताम् ।
अमंदधीर्देवमवंदतागतः कवेरकन्याहिमवायुसेवितम् ॥

—इति सुमध्वविजये (5/47)

पुष्करिणी तस्या अधिपतिः स्वामी । चंद्रपुष्करिण्याख्यतीर्थाधिपतिरित्यर्थः । **अयं श्रीरंगनाथः** श्रीरंगक्षेत्राधिपतिर्हरिः **सदा मे भावे** चित्ते **अस्तु** भवतु । सर्वदा मद्ध्यानगोचरो भवत्वित्यर्थः । ॥ १ ॥

श्रुतिशतपरिगीतः शुद्धभावैर्गृहीतः
कमलनिलयतातः कंजनेत्रः प्रतीतः ।
सकलजगदतीतः सर्वसंपत्समेतः
प्रविशतु मम चेतः प्रत्यहं रंगनाथः ॥ २ ॥

श्रुतिशतेति । श्रुतिशतपरिगीतः श्रुतीनां शतानि [1]अनंतवेदा इत्यर्थः । तैः परिगीतः विशेषेण स्तुतः । **शुद्धभावैः** शुद्धांतःकरणैः । **गृहीतः** वशीकृतः । **कमलनिलयतातः** कमलनिलयो ब्रह्मा तस्य तातः पिता । **कंजनेत्रः** कंजवत् कमलवन्नेत्रे यस्य स तथा । **प्रतीतः** प्रसिद्धः । **सकल-जगदतीतः** सकलानि जगंति तान्यतीतोऽतिक्रांतः । [2]द्वितीया श्रितातीत-पतितगतात्यस्तप्राप्तापन्नैरिति समासः । **सर्वसंपत्समेतः** सर्वया संपदा समेतः । **रंगनाथः** रंगस्य रंगाख्यक्षेत्रस्य नाथः । **प्रत्यहं** प्रतिदिनं । **मम** । **चेतः** हृदयं **प्रविशतु** । काव्यैस्तवपद्यानामीदृक्त्वान्न पौनरुक्त्यादि-शंकावकाशः । ॥ २ ॥

श्रीरंगनाथः सुरसिद्धगीतः कारुण्यसिंधुः कविवर्गबंधुः ।
स्मेरास्यचंद्रः स्मरतां महेंद्रक्ष्मारुट् प्रसन्नः क्षपयत्वघं नः ॥३॥

श्रीरंगनाथेति । सुरसिद्धगीतः सुराश्च सिद्धाश्च देवयोनिभेदाः ऋषयो वा तैर्गीतः स्तुतः । **कारुण्यसिंधुः** कारुण्येन कृपया सिंधुरिव । **कविवर्गबंधुः** कविवर्गस्य ज्ञानिसमूहस्य बंधुः सुहृत् । **स्मेरास्यचंद्रः** ।

---

1 "अनंता वै वेदाः"—इति श्रुतिः । 'अनंताश्च तथा वेदाः' इति बृहद्भाष्ये ।

2 "द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैः" । (पा. सू. 2/1/24)

स्मेरं स्मितयुक्तं यदास्यं मुखं तदेव चंद्रो यस्य स तथा । **स्मरतां** जनानां **महेंद्रक्ष्मारुट्** महेंद्रस्य पुरंदरस्य क्ष्मारुट् कल्पवृक्ष इत्यर्थः । **प्रसन्नः श्रीरंगनाथः नः** अस्माकं । **अघं** पापं । **क्षपयतु** परिहरतु । ॥ ३ ॥

लये शयानोऽप्युदरस्थलोकभरेण लक्ष्मीकरविभ्रमैश्च ।
अनिद्रितोऽद्यांघ्रिनिषेवणे तां नियुज्य निद्रासि किमंबुजाक्ष ४

लय इति । **हे अंबुजाक्ष** अंबुजं पद्मं तद्वदक्षिणी यस्य स तत्संबुद्धिः रंगनाथ! **लये** महाप्रलये । **शयानोऽपि** सृष्ट्यादिव्यापारं विहाय शेषपर्यंके शयानोऽपीत्यर्थः । **उदरस्थलोकभरेण** उदरे तिष्ठतीति उदरस्थः स चासौ लोकश्च तस्य भरो भारः तेन । **लक्ष्म्याः करविभ्रमैश्च** हस्तविलासैश्च । **अनिद्रितः** निद्रा संजाता अस्येति निद्रितः स न भवतीत्यनिद्रितः । निद्राक्षयं प्रापित इत्यर्थः । [त्वं] **अद्य** अधुना उदरस्थलोकान् बहिः कृत्वा । **तां** लक्ष्मीं **अंघ्रिनिषेवणे** पादसेवने । अंघ्रिनिषेवण इत्युपलक्षणं । पाकादौ चेत्यापि द्रष्टव्यं । **नियुज्य निद्रासि किं** निद्रां करोषि किं । श्रीरंगनाथस्य शेषशायित्वादियमुत्प्रेक्षा । ॥ ४ ॥

निजांघ्रिसेवानिरतान् मनुष्यान् विधूतनिद्रान् विदधासि यस्त्वम् ।
तवेश तस्यामलबोधमूर्त्तेः सहामहे संप्रति नैव निद्राम् ॥ ५ ॥

निजांघ्रीति । **हे ईश** रंगनाथ । **यस्त्वं** । **निजांघ्रिसेवानिरतान्** निजयोरंघ्र्योः सेवायां निरताः आसक्ताः तान् । **मनुष्यान्** । **विधूतनिद्रान्** विधूता निद्रा यैस्तान् । निद्राप्रमादाज्ञानादिदोषास्तद्रहितानित्यर्थः । **विदधासि** करोषि । **तस्य अमलबोधमूर्तेः** न विद्यते मलं परिच्छिन्नत्वादिदोषः यस्य सोऽमलः स चासौ बोधश्च स एव मूर्तिः शरीरं यस्य सः तस्य । स्वभक्तनिद्राक्षयकर्त्तुः । **तव** । **संप्रति** इदानीं । **निद्रां** स्वापं **न सहामहे** नांगीकुर्महे । स्वसेवकानामपि निद्रादोषहर्त्तुः निर्दोषस्य रंगनाथस्य निद्रालक्षणपापांगीकारो न युक्त इति भावः । ॥ ५ ॥

नवांभोदनीलः स्फुरद्धेमजालः स्मरच्चित्तलोलः सुरश्रेणिपालः ।
श्रिये रंगधामाऽस्त्वयं पुण्यनामा महैश्वर्यसीमा गुणस्तोमभूमा ॥६॥

नवांभोदेति । **नवांभोदनीलः** नवांभोदः वर्षाकालमेघः तद्वन्नीलवर्णः । **स्फुरद्धेमजालः** स्फुरंति यानि हेमानि हेममयाभरणानि तेषां जालं समूहो यस्य स तथा सुवर्णाभरणैर्भूषित इत्यर्थः । **स्मरच्चित्तलोलः** स्मरतां चित्ते लोलः सतृष्णः । स्मरच्चित्ते विद्यमान इत्यर्थः । **पुण्यनामा** पुण्यं पवित्रं नाम यस्य स तथोक्तः । **सुरश्रेणिपालः** सुराणां श्रेणिः पंक्तिः तां पालयतीति तथोक्तः । **महैश्वर्यसीमा** महच्च तदैश्वर्यं च महैश्वर्यं तस्य सीमा अवधिभूतः । **गुणस्तोमभूमा** गुणानां ज्ञानानंदादीनां स्तोमाः समूहाः तैः भूमा व्याप्तः । **अयं रंगधामा** रंगं श्रीरंगाख्यक्षेत्रं रंगाख्यविमानं वा तदेव धाम आलयो यस्य स तथोक्तः श्रीरंगनाथः । **श्रिये** संपदे । **अस्तु** भूयात् । **भुजंगप्रयातं वृत्तम्** । 'भुजंगप्रयातं भवेद्यैश्चतुर्भि'रिति तल्लक्षणात् ॥

सहस्रवदनः शेषः पंचवेदान् पठंस्तव ।
पंचास्योऽभूद्द्विजिह्वश्च त्वां क्षेत्रेण समं स्तुवन् ॥ ७ ॥

श्रीरंगनाथतल्पभूतं शेषं वर्णयति । **सहस्रवदन** इति । **हे रंगनाथ तव** शय्याभूतः **शेषः सहस्रवदनः** [अपि] **पंचवेदान्** ऋगादिवेदान् भारतं चेति पंचवेदान् । **पठन् सन्** । **पंचास्यः** पंचमुखः । **अभूत्** । हरिस्तवनानुपयोगिभिरन्यैर्मुखैः[1] किं प्रयोजनमिति भावेन पंचवदनोऽभवदिति भावः । **त्वां क्षेत्रेण समं** रंगक्षेत्रेण सह । **स्तुवन्** सन् **द्विजिह्वश्च** द्वे जिह्वे यस्य स द्विजिह्वश्च [अभूत्] पाठ्यानामृगादिपंचवेदानां पंचसंख्याकत्वात् । स्तव्ययोः

---

[1] ' इतिहासपुराणः पंचमो वेदानां वेदः ।' इति श्रुतिः ।

[2] ' रोगो नाम न सा जिह्वा यया न स्तूयते हरिः ।' (77)
' रोगो नाम न सा जिह्वा या न वक्ति हरेर्गुणान् ॥' (78)
—इत्यादि कृष्णामृतमहार्णवे ।

रंगक्षेत्रश्रीरंगनाथयोर्द्विसंख्याकत्वात् पाठ्यस्तव्यसमसंख्याकमुखजिह्वावानभू-दिति भावः। श्रीरंगनाथशय्याभूतस्य शेषस्य पंचमुखत्वादियमुत्प्रेक्षा। ॥७॥

यथा श्रिया त्वं सततं रंगक्षेत्रे व्यरूरुचः।
तथा हरे मेंऽतरंगे रंगनाथ विरोचय ॥ ८ ॥

यथेति! हे हरे त्वं श्रिया सह रंगक्षेत्रे सततं यथा व्यरूरुचः। रुचि दीप्ताविति धातोर्यङ्लुगन्तालुङ्। तथा हे रंगनाथ। मे मम अंतरंगे हृदये। विरोचय प्रकाशय। ॥ ८ ॥

चंद्रपुष्करिणी

हित्वा हरजटागंगां यत्रेंदुरतपत् तपः।
चंद्रपुष्करिणी सेयं मंदभाग्यैर्न सेव्यते ॥ ९ ॥

चंद्रपुष्करिणीं वर्णयति। हित्वेनि। इंदुः चंद्रः। हरजटागंगां हरस्य जटायां विद्यमानां गंगामपि। हित्वा त्यक्त्वा। अनेन स्वभावोच्चत्वं स्थलकृतोच्चत्वं च गम्यते। यत्र चंद्रपुष्करिण्यां तपः अतपत्। सेयं चंद्रपुष्करिणी। मंदभाग्यैः अल्पभाग्यैः। न सेव्यते। चंद्रपुष्करिणीसेवा पुण्यवतामेव संघटते नापुण्यवतामिति भावः। ॥ ९ ॥

कावेरी

कावेरि कमनीयांग रंगनाथं सदा हृदि।
धत्से त्वत्सेवया देवि को नु कुर्यान्न तं हृदि ॥ १० ॥

कावेरीं वर्णयति। कावेरीति। हे कावेरि! कवेरास्यमुनेरपत्यं स्त्रीः कावेरी तत्संबुद्धिः। तन्नामकनदि! कमनीयांग मनोज्ञशरीरं रंगनाथं

---

* रंगपादोद्भवे देवि पुन्नगोत्संगगामिनि।
चंद्रपुष्करिणि ख्याते गृहाणार्घ्यं नमोऽस्तु ते॥
—इति चंद्रपुष्करण्यर्घ्यमंत्रः।

सदा हृदि हृदये । **धत्से** दधासि । उभयकावेरीमध्ये विद्यमानत्वादिति भावः । **हे देवि !** कावेरि ! **त्वत्सेवया तं रंगनाथं हृदि को नु** को वा । **न कुर्यात्** सर्वोऽपि कुर्यादेवेत्यर्थः । श्रीरंगनाथस्य कावेरीहृदयगतत्वेन तत्पानेन तस्याः हृदयांतर्गतत्वे रंगनाथस्यापि हृदयांतर्गमनं युक्तमिति भावः । 'एकत्र निर्णीतः शास्त्रार्थोऽपरत्रापी'ति न्यायेन सर्वस्मिन्नपि कावेरीजले एवमेवरंगनाथस्थितीति सिद्धम् । एवं च तज्जलस्य पानेन हृदयांतर्गमने तस्यापि हृदयांतर्गमनं युक्तियुक्तम् । अतः श्रीभागवतोक्तं* कावेरीजलस्य विष्णुभक्तिदत्वं न केवलमागमेनैव सिद्धम् । किंतु युक्तितोऽपि निश्चितमभूदिति भावः ॥

मोक्षदानक्षमाः संति सरितस्तत्र तत्र हि ।
कावेरी चोलभूमाता भुक्तिमुक्तिकरी सरित् ॥ ११ ॥

मोक्षदानेति । **मोक्षदानक्षमाः** मुक्तिदाने समर्थाः । **सरितः** नद्यः । **तत्र तत्र** स्थले **संति हि** । **चोलभूमाता** चोलानां चोलदेशीयानां जनानां या भूः तस्याः माता । **कावेरीसरित् भुक्तिमुक्तिकरी** ऐहिकामुष्मिकपुरुषार्थकरी । चोलभूमिस्थक्षेत्राणां नदीमातृकतया कावेरीजलेनैव सस्योत्पत्तिरितीयमुक्तिः । ॥ ११ ॥

वृषभशैलस्थितो हरिः

यस्यांतकोऽपि शिरसा धत्ते दास्यं तपस्तपन् ।
स स्याद् वृषभशैलेंदुरस्माकं श्रेयसे हरिः ॥ १२ ॥

वृषभशैलस्थितं हरिं वर्णयति । **यस्येति** । **अंतकोऽपि** यमोऽपि । **तपस्तपन्** कुर्वन् । **यस्य** वृषभशैलस्थहरेः । **दास्यं** कैंकर्यं । **शिरसा**

---

* ताम्रपर्णी नदी यत्र कृतमाला पयस्विनी ।
कावेरी च महापुण्या प्रतीची च महानदी ॥
ये पिबंति जलं तासां मनुजा मनुजेश्वर ।
प्रायो भक्ता भगवति वासुदेवेऽमलाशयाः ॥

—इति श्रीभागवतवचनम् (XI/5/39–40)

धत्ते धारयति । **सः वृषभशैलेंदुः** वृषभाख्यशैलस्य इंदुरिव वृषभशैलेंदुः **हरिः** । **अस्माकं श्रेयसे** मोक्षाय । **स्यात्** । ॥ १२ ॥

नूपुरगङ्गा

हरिनूपुरजातेऽलंकुरु गंगे मनो मम ।
परिहृत्य घनीभूतदुरितस्तोमकर्दमम् ॥ १३ ॥

नूपुरगंगां वर्णयति । **हरीति** । **हरिनूपुरजाते** हरेर्नूपुराज्जाता तस्यास्संबुद्धिः । **हे गंगे मम मनः** । **घनीभूतदुरितस्तोमकर्दमं** घनीभूतानि दृढीभूतानि यानि दुरितानि तेषां स्तोमः समूहः स एव कर्दमः पंकस्तं । **परिहृत्य अलं कुरु** भूषय । नूपुरलक्षणालंकारजातायास्तव मनोऽलंकरणं युक्तम् । जलप्रवाहरूपायास्तव पापपंकक्षालनमपि युक्तमिति द्वेधाऽपि वर्णनम् । पापं परिहृत्य मनःशुद्धिं कुर्विति तात्पर्यार्थः । ॥ १३ ॥

दर्भशयनः

यत् प्राग्जघान तृणमप्यस्त्रीभूयापराधिनम् ।
दयालुरब्धौ तेनाभूद्दर्भशायीह राघवः ॥ १४ ॥

दर्भशयनं वर्णयति । **यदिति** । **यत्** यस्मात् कारणात् । **प्राक्** पूर्वं । **अपराधिनं** सीताकामुकत्वेनापराधकर्तारं कुरंगनामासुरम् । **तृणमपि** श्रीरामचंद्रप्रयुक्तम् । **अस्त्रीभूय** अस्त्रं भूत्वा । **जघान** । **तेन** कारणेन । **अब्धौ** समुद्रे । **दयालुः** कृपावान् । **राघवः** श्रीरामः । **इह** स्थले **दर्भशायी** दर्भेषु शेते इति दर्भशायी दर्भशयनः । **अभूत्** । राघवो मार्गप्रदानाय समुद्रमुद्दिश्य तपः कर्तुं दर्भशयनो जात इति न । प्रमाणविरुद्धत्वात् । किंतु प्राक् तृणमपि अस्त्रीभूय काकासुरं* जघान । तथा तृणराजत्वादिमे दर्भाः सकृत्स्वसजातावाज्ञायाः जातत्वात् पुनराज्ञामनाकांक्षमाणाः स्वयमेव गत्वा

---

* अथाजगामेंद्रसुतोऽपि वायसो महासुरेणात्मगतेन चोदितः ।
स चासुरावेशवशाद्रमास्तने यदा व्यधात्तुण्डमथाभिवीक्षितः ॥

मार्गप्रदानलक्षणापराधिनं समुद्रं हनिष्यंतीति समुद्रोपरि दयया दर्भानास्तीर्य तदुपरि शयनं कृतवान्* । अत एव दर्भशयनो जात इति भावः । **उत्प्रेक्षालंकारः ।** ॥ १४ ॥

रामसेतुः

सीतामात्मसुतां खलैरपहृतामानेष्यतः स्वां पुरीं
जामातुर्हितकारिणीच धरणी चाभ्यंबुवृद्धाकृतिः ।
भूभारक्षपणोद्यतस्य सचिवीभूता महीध्रा इव
श्रीरामस्य भटैः कृतो विजयते सेतुर्विजेतुर्द्विषाम् ॥ १५ ॥

जनार्दनेनाशु तृणे प्रयोजिते चचार तेन ज्वलताऽनुयातः ।
स्वयंभुशर्वेंद्रमुखान् सुरेश्वरान् जिजीविषुस्तान् शरणं गतोऽपि ॥
बहिष्कृतस्तैर्हरिभक्तिभावतो ह्यलंघ्यशक्त्या परमस्य चाक्षमैः ।
पुनः प्रयातः शरणं रघूत्तमं विसर्जितस्तेन निहत्य चासुरम् ॥
तदक्षिगं साक्षिकमप्यवध्यं प्रसादतश्चंद्रविभूषणस्य ।
स वायसानामसुरोऽखिलानां वरादुमेशस्य बभूव चाक्षिगः ॥
निपातितोऽसौ सह वायसाक्षिभिस्तृणेन रामस्य बभूव भस्मसात् ।
ददुर्हि तस्मै चिवरं बलार्थिनो यद्वायसास्तेन तदक्षिपातनम् ॥
कृतं रमेशेन तदेकनेत्रा बभूवुरन्येऽपि तु वायसास्तदा ।
भविष्यतामप्यथ यावदेव द्विनेत्रता काककुलोद्भवानाम् ॥
तावत्तदक्ष्यस्य कुरंगनाम्नः शिवेन दत्तं दितिजस्य चाक्षयम् ।
अतः पुनर्भावममुष्य हिन्वन् भविष्यतश्चैकदृशश्चकार ।
स वायसान् राघव आदिपूरुषस्ततो ययौ शक्रसुतस्तदाज्ञया ॥

—इति महाभारततात्पर्यनिर्णये (V. 9/16)

* सम्प्राप्य दक्षिणमपां निधिमत्र देवः शिश्ये जगद्गुरुतमोऽप्यविषह्यशक्तिः।
अग्रे हि मार्दवमनुप्रथयन् स धर्मं पंथानमर्थितुमपां पतितः प्रतीतः ॥

—इति महाभारततात्पर्यनिर्णयवचनम् (VII. 2)

रामसेतुं वर्णयति । **सीतामिति** । **द्विषां** शत्रूणां । **विजेतुः** विजयशीलस्य । **श्रीरामस्य भटैः** कपिभिः । **कृतः सेतुः** । **खलैः** राक्षसैः । **अपहृतां आत्मसुतां** स्वपुत्रीं **सीतां स्वां पुरीं** अयोध्यां प्रति । **आनेष्यतः जामातुः** स्वपुत्रीभर्तुः रामस्य । **हितकारिणी** सहायकारिणी । अत एव । **वार्ध्यंबुवृद्धाकृतिः** वार्धेः समुद्रस्यांबु जलं तस्मिन् वृद्धा अभिवृद्धा आकृतिर्यस्यास्सा तथोक्ता । **धरणीव** भूमिरिव । ससेनस्य रामस्य समुद्रगमने सहायकर्त्री भूमिरिवेत्यर्थः । **भूभारक्षपणोद्यतस्य** भुवः भारायिता रावणादयः तेषा क्षपणं नाशनं तस्मिन्नुद्यतस्य उद्युक्तस्य श्रीरामस्य । **सचिवीभूताः** असचिवाः सचिवाः संपद्यंते तथाभूताः । भूभारक्षपणेन भूधराणामस्माकमपि भारो गमिष्यतीति धिया सहायीभूताः । **महीध्राः** पर्वता इव । 'महीध्रे शिखरि क्ष्माभृदि'त्यमरः । **विजयते** शोभते । **उत्प्रेक्षालंकारः** । ॥ १५ ॥

प्रगीतजानकीनाथप्रतापस्वर्णवैभवे ।
प्रत्ययार्थमयं सेतुर्निकषाश्मायते नृणाम् ॥ १६ ॥

प्रगीतेति । **अयं सेतुः** । **प्रगीतजानकीनाथप्रतापस्वर्णवैभवे** प्रगीतः जनैः कीर्तितः यः जानकीजानिप्रतापः सीतापतिश्रीरामशौर्यं तदेव स्वर्णं हेम तस्य वैभवं संपत् तस्मिन् । **नृणां** मनुष्याणां । **प्रत्ययार्थं** निश्चयार्थं । **निकषाश्मायते** सुवर्णवर्णनिश्चायकोऽश्मा निकषाश्मेत्युच्यते । निकषाश्मवदाचरति । यथा निकषाश्मा सुवर्णनिश्चायको भवति तथा सेतुः-श्रीरामप्रतापनिश्चायको भवतीति भावः । ॥ १६ ॥

न मूर्च्छति शिलोच्चये पवनवेग इत्यज्ञवाग्
यतो हनुमताऽऽहृताः सुबहवो मरुत्सूत्नुना ।
गभीरतरवारिधिच्छद(स्थग)नचुंचवः पर्वता
जयंति कृतसेतवः क्षपणहेतवो रक्षसाम् ॥ १७ ॥

बध्नीहि सेतुमिह ते यशसो वितत्यै गायंति दिग्विजयिनो यमुपेत्य भूपाः ॥ (भागवते)

न मूर्च्छतीति । **पवनवेगः** वायुजवः । **शिलोच्चये** पर्वते । "अचलशैलशिलोच्चया" इत्यमरः । **न मूर्च्छति** न शक्नोति । अनिलगतिः पर्वतोन्मूलनाय न शक्नोतीत्यर्थः । मुर्च्छा मोहसमुच्छ्राययोरिति धातोर्लट् । **इति** [या वाक् सा] **अज्ञवाक्** अज्ञानिवचनं । [2]न पादपोन्मूलनशक्तिरंहः शिलोच्चये मूर्च्छति मारुतस्येति वदन् काव्यकारः सम्यङ् न जानातीत्यर्थः । **यतः** कारणात् । **मरुत्सूनुना वायुपुत्रेण हनुमता** । **आहृताः** उन्मूल्यानीताः । **गभीरतरवारिधिच्छदनचुंचवः** गभीरतरः अत्यंतगंभीरः 'निम्नं गभीरं गंभीर'मित्यमरः । स चासौ वारिधिः समुद्रस्तस्य छदनेन आच्छादनेन चुंचवः विताः प्रसिद्धाः । [1]तेन वितश्चुंचुप्चणपाविति चुंचुप्प्रत्ययः । समुद्राच्छादने समर्था इत्यर्थः । अनेन बह्वायामविस्तारवत्त्वं पर्वतानां गम्यते । **कृतसेतवः** कृतः सेतुर्यैस्ते कृतसेतवः । **रक्षसां** राक्षसानां । **क्षपणहेतवः** क्षपणे विनाशे हेतवः कारणानि । **सुबहवः पर्वताः जयंति** । यतो वायुसूनुना हनुमता पर्वताः उन्मूलिताः किल, किमु वक्तव्यं तत्पितुर्मारुतस्येत्यतो न मूर्च्छति शिलोच्चये पवनवेग इत्युक्तिरज्ञोक्तिरिति भावः । ॥ १७ ॥

पारावाराख्यरम्योपनिषदि विलसत्सेतवे सूत्रमात्रे
रामव्यासेन सेनानुगतिफलकृते दर्शिते रामभृत्यः ।
नानास्थानोपनीतैर्हनुमदभिनवश्रीमदानंदतीर्थ-
स्तेनेऽमानाद्रिमानैस्तमिममतिदृढं रम्यमात्मीयगम्यम् ॥१८॥

पारावारेति । **पारावराख्यरम्योपनिषदि** पारावारः समुद्रः । "समुद्रोऽब्धिरकूपारः पारावारस्सरित्पति"रित्यमरः । तदाख्या च सा रम्यो-

---

[1] अलं महीपाल तव श्रमेण प्रयुक्तमप्यस्त्रमितो वृथा स्यात् ।
न पादपोन्मूलनशक्तिरंहः शिलोच्चये मूर्छति मारुतस्य ।
—इति कालिदासविरचित रघुवंश श्लोकः (II. 44)

[2] तेन वित्तश्चुंचुप्चणपौ । (पा. सू. 5/2/26)

पनिषच्च तस्यां । **सेनानुगतिफलकृते** सेनायाश्चम्वाः अनुगतिः आनुकूल्येन गमनं तदेव फलं प्रयोजनं तस्य कृते तदर्थं । समुद्रे सेनया स्वगमनसिध्यर्थमित्यर्थः । **विलसत्सेतवे** विलसंश्चासौ सेतुश्च तस्मै सेतुबंधनायेत्यर्थः । **रामव्यासेन** रामश्चासौ व्यासश्च तेन । **सूत्रमात्रे** सूचनं केवलं सूत्रमात्रं तस्मिन् । एवं कर्त्तव्यमिति सूचनमात्रे । **दर्शिते** सति । **रामभृत्यः हनुमदभिनवश्रीमदानंदतीर्थः** । अभिनवहनुमदाख्यश्रीमध्वाचार्यः । **नानास्थानोपनीतैः** नानाविधानि स्थानानि तेभ्य उपनीतानि तैर्नानादेशेभ्य आनीतैः । **अमानाद्रिमानैः** अमानाः अपरिमितास्ते च ते अद्रयश्च त एव मानानि प्रमाणानि तैः । **अतिदृढं आत्मीयगम्यं** आत्मीयैः स्वकीयैः कपिभिः गम्यं । **रम्यं तमिमं** सेतुं । **तेने** कृतवान् । रामेण सेतुबंधनाय दिङ्मात्रे प्रदर्शिते । हनुमान्नानास्थानोपहृतैः पर्वतैः समुद्रे सेतुं चकारेति प्रस्तुतवाक्यार्थः । **पारावाराख्यरम्योपनिषदि** पारावारवद्भिरोपनिषदि । **सेनानुगतिफलकृते** इनेन सहिताः सेनाः । विष्णुः स्वामी वयं तद्भक्ता इति ज्ञानिन इत्यर्थः । तेषामनुगतिः सम्यग्ज्ञानं तदेव फलं प्रयोजनं तस्य कृते तदर्थं । सज्जीवानां सम्यग्ज्ञानार्थमित्यर्थः । **विलसत्सेतवे** उपनिषद्धृतस्यास्य वाक्यस्यायमेवार्थो नान्य इति मर्यादायै । **रामव्यासेन** क्रीडादिगुणविशिष्टवेदव्यासेन । **सूत्रमात्रे** उपनिषदर्थनिर्णायकब्रह्मसूत्रमात्रे । **दर्शिते** सति **रामभृत्यः हनुमदभिनवश्रीमदानंदतीर्थः** । हनुमद्रूपः श्रीमदानंदतीर्थः । **नानास्थानोपनीतैः** नानाप्रकरणस्थानात्संहृतैः **अमानाद्रिमानैः** अपरिमितपर्वतवद् दृढतरवाक्यप्रमाणैः । **अतिदृढं** केनापि दूषयितुमशक्यं[1] । **आत्मीयगम्यं** वैष्णवैर्ज्ञेयं । **रम्यं** अर्थतः शब्दतश्च मनोहरं । **तमिमं** भाष्यानुव्याख्यानादिसूत्रव्याख्यानरूपं ग्रंथजातं । **तेने** इतिरूपकलभ्योऽर्थः । **रूपकसमासोक्त्योः संकरः** । ॥ १८ ॥

---

[1] अप्यदूष्यमतनोदनंतधीः भूतभाविभवदात्मभिः क्वचित् ।

—इति सुमध्वविजये (9/18)

रामांघ्रिरेणुप्रेम्णेव सेतोरुभयतोंऽबुधिः ।
अभ्येति पौनःपुन्येन वर्धमानः पदेपदे ॥ १९ ॥

रामेति । **अंबुधिः** समुद्रः । **रामांघ्रिरेणुप्रेम्णेव** रामांघ्र्योः रेणुषु प्रेम्णेव भक्त्येव । सेतौ रामेण संचरित्वादिति भावः । **पदे पदे** प्रतिपदविन्यासं प्रतिक्षणमित्यर्थः । **वर्धमानः** सन् **सेतोः** कूलं **उभयतः** । **पौनः पुन्येन** पुनः पुनरित्यर्थस्य भावः पौनःपुन्यं तेन । **अभ्येति** प्राप्नोति । **उत्प्रेक्षालंकारः** । ॥ १९ ॥

श्रीरामदेव;

सीतालक्ष्मणशोभिपार्श्वयुगलः प्रीत्याऽवनम्राकृतिं
वक्त्रांभोरुहसक्तहस्तकमलं भक्तं भटाग्रेसरम् ।
एकांते हनुमंतमुक्तिसुधया संतर्पयन् संततं
रामः स्तंभितवारिधिर्विजयते धानुष्कचूडामणिः ॥ २० ॥

श्रीरामदेवं वर्णयति । **सीते**ति । **सीतालक्ष्मणशोभिपार्श्वयुगलः** सीतालक्ष्मणाभ्यां शोभि पार्श्वयुगलं यस्य स तथोक्तः । **प्रीत्या** भक्त्या । **अवनम्राकृतिं** । अवनाम्रा नम्रीभूता आकृतिर्यस्य स तथोक्तस्तम् । **वक्त्रांभोरुहसक्तहस्तकमलं** वक्त्रांभोरुहे वदनांभोजे सक्तं न्यस्तं हस्तकमलं पाणिपद्मं येन स तथा तम् । राज्ञा सह एकांतोक्तिसमये तदुपरि स्वमुख-पिधानस्य कार्यत्वादिति भावः । **भक्तं** भक्तियुक्तं । **भटाग्रेसरं** दूतश्रेष्ठं । **हनुमंतमेकांते** रहसि । **उक्तिसुधया** वचनामृतेन । **सततं संतर्पयन्** सुखयन् । **स्तंभितवारिधिः** स्तंभितः वारिधिर्येन स तथोक्तः । एकान्त-व्यहारायं निवारितसमुद्रघोष इत्यर्थः । **धानुष्कचूडामणिः** धनुः प्रहरण-मेषामिति धानुष्काः । "*तदस्य प्रहरण"मिति ठक् । तेषां चूडामणिः शिरोरत्नम् । धन्विनामग्रेसर इत्यर्थः । **रामो विजयते** शोभते । ॥ २० ॥

---

* तदस्यां प्रहरणमिति क्रीडायां णः । (पा. सू. 4/2/57)

रामेश्वरः

कामद्विषं कामितदानदक्षं श्रीमज्जटाजूटविभासिगंगम् ।
रामेश्वरं रामकृतप्रतिष्ठं रामागृहीतार्धतनुं नतोऽस्मि ॥ २१ ॥

रामेश्वरं वर्णयति । **कामद्विषमिति** । **कामद्विषं** कामं कंदर्पं द्वेष्टीति कामद्विट् तं कामरहरम् । **कामितदानदक्षं** कामितस्य अभीप्सितस्य दाने दक्षं समर्थं । **श्रीमज्जटाजूटविभासिगंगं** श्रीमान् यो जटाजूटः तस्मिन् विभासिनी गंगा यस्य स तथा तम् । **रामकृतप्रतिष्ठं** रामेण कृता प्रतिष्ठा स्थापनं यस्य स तथा तम् । **रामागृहीतार्धतनुं** रामया स्त्रिया पार्वत्या गृहीता अर्धतनुरर्धशरीरं यस्य स तथा तम् । **रामेश्वरं** रामेश्वरनामकं शिवम् । **नतोऽस्मि** नमस्कृतवानस्मि । रामकृतप्रतिष्ठं रामागृहीतार्धतनुमिति विशेषणद्वयेन रामेण प्रतिष्ठितः **ईश्वरः** रामेश्वरः । रा[illegible] . पार्वत्याः ईश्वरः स्वामी रामेश्वर इति व्युत्पत्तिरुक्ता भवति । ॥ २१ ॥

रामेश्वरप्रतिष्ठा–रामः

कल्पांते सुरभूसुरासुरमुनिस्तोमं हरन् कं हरं
पृथ्व्यां पातककोटिपाटनपटू रामः समाराधयत् ।
यत्पादाब्जरजोऽहरन्मुनिवधूपापं श्रुता यत्कथा
मुक्तिं दोग्धि परेशितुः परमियं लीला खलध्वंसिनः ॥ २२ ॥

रावणवधजनितब्रह्महत्यादोषपरिहाराय श्रीरामेण प्रतिष्ठा कृतेत्युक्तिमसहमान आह । **कल्पांत** इति । **पातककोटिपाटनपटुः** पातकानां पापानां कोट्यस्तासां पाटने विदारणे पटुस्समर्थः । **रामः कल्पांते** प्रलये । "संवर्तः प्रलयः कल्पः क्षयः कल्पांत इत्यपी"त्यमरः । **सुरभूसुरासुरमुनिस्तोमं** सुराः ब्रह्मादयो देवाः भूसुराः ब्राह्मणाः असुराः दैत्याः मुनयो वसिष्ठाद्याश्च तेषां स्तोमः समूहः तम् । **हरन्** संहरन् । **पृथ्व्यां कं हरं** सुरासुरादिसकलजगद्वधजनितपापपरिहाराय कं वा शिवम् । **समाराधयत्** -

राध साध संसिद्धाविति धातोर्लङ्। आराध्यशिवस्यापि नष्टत्वादिति भावः। अनेन रावणवधजन्मपापपरिहाराय शिवपूजा कृतेत्युक्तिरज्ञोक्तिरित्युक्तं भवति। ननु पापाभावे किमर्थं रामेण लिंगप्रतिष्ठा कृतेत्याशंक्याज्ञानिजनमोहनायेत्याह। यत्पादाब्जेति। **यत्पादाब्जरजः**। यस्य रामस्य पादावेवाब्जं तस्य रजः धूलिः। **मुनिवधूपापं** मुनिवध्वाः गौतमपत्न्याः अहल्यायाः पापम्। परपुरुषसमागमजनितशिलारूपं दोषम्। **अहरत्**। **श्रुता यत्कथा** यस्य रामस्य कथा। **मुक्तिं** मोक्षं। **दोग्धि** प्रापयतीत्यर्थः। दुह प्रपूरण इति धातोर्लट्। [1]"दादेर्धातोर्घः" इति घकारः। [2]झषस्तथोर्धोऽधः इति धकारो जश्त्वं च। एतादृशस्य **परेशितुः** परेषां ब्रह्मादीनां ईशितुः स्वामिनः। **खलध्वंसिनः** दैत्यारेः रामस्य। **इयं** लिंगप्रतिष्ठा। [3]**लीला परं** अज्ञजनमोहिनी क्रीडैव। न तु पापपरिहारायेत्यर्थः। "लीलैषाऽसुरमोहिनी"त्यादिवचनमुक्तार्थे मानम्[4]। ॥ २२ ॥

---

[1] दादेर्धातोर्घः ((पा. सू. 8/2/32)

[2] झषस्तथोर्धोऽधः (पा. सू. 8/2/40)

[3] क्वचिच्छिवं क्वचिद्दृषीन् क्वचिद्देवान् क्वचिन्नरान्।
नमत्यर्चयति स्तौति वरानर्थयतेऽपि च।
लिंगं प्रतिष्ठापयति वृणोत्यसुरतो वरान्।
सर्वेश्वरः स्वतंत्रोऽपि सर्वशक्तिश्च सर्वदा॥
सर्वज्ञोऽपि विमोहाय जनानां पुरुषोत्तमः॥

—इति महाभारततात्पर्यनिर्णये (II. 138–140)

त्वामाराध्य वरं शंभो गृहीष्यामि वरं सदा।
द्वापरादौ युगे भूत्वा कलया मानुषादिषु॥
स्वागमैः कल्पितैस्त्वं च जनान् मद्विमुखान् कुरु।
मां च गोपय येन स्यात् सृष्टिरेषोत्तराऽधरा॥

—इति च महाभारततात्पर्यनिर्णयोद्धृतपाद्म (71/106, 7) वचनम् (22/161–162)

[4] रामचन्द्रेण रावणवधजनितब्रह्महत्यापनुत्तये सेतौ लिङ्गप्रतिष्ठा तत्पूजादिकं कृतमिति यदुक्तं, तदपि 'न कर्मणा वर्धते नो कनीयान्' स एव सर्वभूतान्तरात्माऽपहतपात्मा दिव्यो देव एको नारायणः । 'न मां कर्माणि लिंपन्ति न मे कर्मफले स्पृहा' [1]इत्यादि श्रुतिस्मृतिभिर्नारायणस्य पुण्यपापरूपकर्मलेपाभावप्रतिपादनात् तद्विरुद्धम् । न च रामचन्द्रो नारायणो न भवति किन्त्वन्य एवेति वाच्यम् । रामोपनिषदि रामयणादौ च रामचन्द्रस्य नारायणवतारत्वप्रतिपादनात् । वाल्मीकिप्रोक्तं सर्ववैदिकपरिगृहीते रामायणे तादृशार्थस्य प्रतिपादनाच्च । '[2]अत्र पूर्वं महादेवः प्रसादमकरोन्मे'ति वैदेहीं प्रति प्रयाणे रावणवधात्पूर्वमेव महादेवप्रसादप्रतिपादनेन रावणवधजनितब्रह्महत्यापनुत्तये सेतौ लिङ्गप्रतिष्ठा तत्पूजादिकं कृतमित्यस्याप्रमाणिकत्वात् । यद्यपि लिङ्गपुराणे रामायणसंक्षेपे "[illegible]त्र कृत्वा वानरशतै" रित्यादिना सेतौ प्रतिष्ठा तत्पूजादिकं कृतमित्यावेद्यते । तथापि तस्य तामसत्वेन अनादरणीयत्वम् । न हि परब्रह्मभूतस्य रामचन्द्रस्य लिङ्गप्रतिष्ठा तत्पूजादिना—नानवाप्तमवाप्तव्यं किंचिदस्ति, पितृवाक्यपरिपालनवद्धर्मसंस्थापनार्थं तदिति चेन्न । 'यत्र रुद्रार्चनं भस्मधारणं प्रोच्यते बुधैः । तदब्रह्मण्यविषयं विप्राणां तु न कर्हिचित्' इति हारीतस्मृत्या शिवलिंगार्चनस्य ब्राह्मणान्प्रत्यधर्मत्वावेदनाच्च । "यान्येतानि देवत्राक्षत्राणि इन्द्रो वरुणस्सोमो रुद्रः पर्जन्यो यमो मृत्युरीशान" इत्यादि श्रुतिभिः रुद्रस्य क्षत्रियत्वावेदनात् । 'यो वै स्वां देवतामतियजेत्यादिना सामान्यतः स्वानुरूपदेवतोपासनाविधानाच्च ।

शिवार्चनं शिवलिङ्गार्चनं च क्षत्रधर्म एवेति चेद्भवेदेषा कल्पना । यद्यत्र प्रमाणान्तरविरोधो न स्यात् । 'अहमप्यवतारेषु त्वां च रुद्र महाबल । तामसानां मोहनार्थं पूजयामि युगे युगे' इति पाद्मपुराणे तारकब्रह्मराजसंहितायां विष्णुना स्वावतारेषु तामसमोहनार्थं हे ! शिव मयाऽपि

[1] भगवद्गीता (4/14) [2] वाल्मीकिरामायणे (6/126/16)

यं ध्यायन् तारकब्रह्ममंत्रं जपति धूर्जटिः ।
अघोत्ताराय काकुत्स्थ पूजयामास तं किल ॥ ॥ २३ ॥

यमिति । धूर्जटिः शिवः । **यं** रामं । **ध्यायन्** सन् । **तारक-ब्रह्ममंत्रं** तारयतीति तारकः स चासौ ब्रह्ममंत्रश्च तं श्रीराममंत्रम् । **जपति** पुनः पुनः उच्चरति । जप अव्यक्त शब्द इति धातोर्लट् । **काकुत्स्थः** ककुत्स्थकुलोद्भवः श्रीरामः । **अघोत्ताराय** पापपरिहाराय । **तं** स्वमंत्र-जापकं शिवं । **पूजयामास किल** । किलेत्यपहासे । स्वाराधकस्याराधनं मोहनार्थमिति भावः । ॥ २३ ॥

ब्रह्महत्यानिमित्तेन कपाल्यास्तेऽधुनाऽपि यः ।
अंहस्तदेव संहर्तुं स रामस्यार्चितः किल ॥ २४ ॥

त्वदर्चनं क्रियते इत्युक्तत्वेन तस्य क्षत्रधर्मत्वावेदनाच्च । 'अन्यदेवं वरं देहि प्रसिद्धं सर्वजन्तुषु । मर्त्यो भूत्वा भवानेव मम साधय केशव । मां भजस्व च देवेश वरं मत्तो गृहाण च । येनाहं सर्वभूतानां पूज्यात्पूज्यतरोऽभवम् । देवकार्यावतारेषु मानुषत्वमुपेयिवान् । त्वामेवाराधयिष्यामि मम त्वं वरदो भवे' त्यादिना वाराहे रुद्रगीतायां कूर्मपुराणे च शिवस्य विष्ण्वर्चनीयतया वरलब्धत्वावेदनेन तस्य च कृष्णावतारादिषु अर्जुनादेस्सारथ्यादिकरणवत् आश्रितसौलभ्यप्रदर्शनार्थत्वेन परत्वाविघातित्वाच्च । ततश्च, 'सेतुमध्ये महा-देवमीशानं कृत्तिवाससम् । स्थापयामास लिङ्गं तत् पूजयामास राघवः । तस्य देवो महादेवः स्थावरान्वरमुत्तम "मित्यादि कूर्मपुराणप्रतिपन्नलिङ्गप्रतिष्ठा तत्पूजादिकं ततो वरप्राप्त्यादिकं शिववरप्रार्थनानिमित्तमेवेति न तावता शिवापेक्षया विष्णोरपकर्षसिद्धिः । विश्वामित्रभारद्वाजागस्त्यादीनां नमस्कार-वत्तेभ्यो वरप्राप्त्यादिवच्च रामावतारे शिवलिङ्गार्चनस्यापि विष्णोः श्रुतिस्मृत्या-दिसिद्धपरब्रह्मत्वपरमस्वातन्त्र्याविघातित्वादिति ।

—इति श्रीविजयींद्रतीर्थश्रीपादकृत शैवसर्वस्वखण्डने ।

ब्रह्महत्येति । **यः** शिवः । **अधुनाऽपि** । **ब्रह्मयत्यानिमित्तेन** ब्रह्मणः वधः सैव निमित्तं कारणं तेन । **कपाली** ब्रह्मकपालोऽस्यास्तीति कपाली सन् । **आस्ते** [सः] शिवः ब्रह्महत्यादियुक्तः । **तदेव** ब्रह्महत्या-स्वरूपमेव । **अंहः** पापं । **संहर्तुं** । **रामस्य** कर्तरि षष्ठी रामेण । **अर्चितः किल** पूजितः किल । किलेत्यपहासे । "स्वयमनवतीर्णः कः परान् तारयेदिति"न्यायादिति भावः । ॥ २४ ॥

यद्रावणवधे हेतुः सेतुर्जेतुं क्षमस्तमः ।
तदघं तद्रिपोरासीदसंगस्य किलाद्भुतम् ॥ २५ ॥

यदिति । **रावणवधे** रावणस्य वधः । संहारस्तस्मिन् । **हेतुः** कारणम् । **सेतुः** रामसेतुः । **यत्** ब्रह्महत्यारूपम् । **तमः** पापम् । **जेतुं** हंतुमित्यर्थः । **क्षमः** समर्थो ऽवति । "सेतुं दृष्ट्वा समुद्रस्य ब्रह्महत्यां व्यपोहती"ति स्मृतेः । **तत्** ब्रह्महत्यारूपं **अघं** पापम् । **असंगस्य** पाप-पुण्यलेपरहितस्य । **तद्रिपोः** रावणशत्रोः रामस्य । **आसीत् किल** [इति यत् तत्] **अद्भुतं** आश्चर्यम् । रावणहनने परंपराहेतोरपि ब्रह्महत्यानिवर्तकत्वं किल । साक्षाद्रावणहंतू रामस्य ब्रह्महत्याख्यपापसंबंधो जात इत्येतदसंगतमिति भावः । ॥ २५ ॥

धनुष्कोटी

यद्भारतस्थबहुतीर्थनिषेवणेन लभ्यं फलं दिशति तन्मम सेतुखंडः ।
इत्थं धियेव परिवर्तितचापकोट्या चिच्छेद सेतुमधिकं रघुपुंगवोऽत्र ॥

यदिति । **रघुपुंगवः** रघूणां पुंगवः श्रेष्ठः रामः । **भारतस्थबहु-तीर्थनिषेवणेन** भारते भारतवर्षे तिष्ठंतीति भारतस्थानि बहूनि तीर्थानि तेषां निषेवणं सेवा तेन । **यल्लभ्यं फलं** पुण्यम् । **तत्** पुण्यं । **मम सेतुखंडः** सेतोः खंडः एकदेशः । **दिशति** ददाति । **इत्थं धियेव** सकलतीर्थसेवा-लभ्यपुण्यप्रदाने एतावानेव सेतुप्रदेशोऽलं उर्वरितप्रदेशोऽधिक इति बुद्ध्येव ।

अत्र अधिकं सेतुं परिवर्तितचापकोट्या परिवर्तितस्य चापस्य धनुषः कोट्या अग्रेण । **चिच्छेद**[1] । **उत्प्रेक्षालंकारः** । ॥ २६ ॥

जना नानादानाध्ययनयजनापूर्तविधिना
वृथा खिन्ना[2] **दैन्यं भजथ निजनिःश्रेयसकृते ।**
सुरश्रेणीक्षोणीसकलसुजनाभीष्टफलदा
धनुष्कोटी पेटी सुकृतसुधनस्यास्ति महती ॥ २७ ॥

जना इति । **हे जनाः** यूयं **निजनिःश्रेयसकृते** स्वमोक्षार्थम् । **नानादानाध्ययनयजनापूर्तविधिना** नानादानानि गोभूहिरण्याद्यनेकदानानि अध्ययनं वेदपाठः यजनं यागः आपूर्तं तटाकादिनिर्माणं तेषां विधिनाऽनुष्ठानेन । **खिन्नाः** दैन्यं क्लेशम् । **वृथा** व्यर्थं **भजथ** बहुवित्तव्ययायाससाध्यत्वेनासुलभत्वादिति भावः । तर्हि कथं निःश्रेयसं भवतीत्यत आह । **सुरश्रेणीक्षोणीसकलसुजनाभीष्टफलदा** सुरश्रेणी देवतासमूहः सा च क्षोण्यां भूम्यां स्थिताः सकलसुजनाश्च तेषां यदभीष्टं फलं ददातीति तथोक्ता । **धनुष्कोटी** धनुष्कोट्याख्या । **सुकृतसुधनस्य** पुण्याख्यशोभनद्रव्यस्य । **महती** स्थूला । **पेटी** पेटिका मंजूषेत्यर्थः । **अस्ति** तिष्ठति । यतोऽतः निजनिश्श्रेयसार्थं धनुष्कोटियात्रैव कर्तव्या; सुलभत्वादिति भावः । ॥२७॥

---

[1] सेतुनाऽनेन ते राम राजानः सर्व एव हि ।
बलोद्रिक्ताः समभ्येत्य पीडयेयुः पुरीं मम ॥
अतः सेतुमिमं भिंधि धनुष्कोट्या रघूद्वह ।
इति संप्रार्थितस्तेन पौलस्त्येन स राघवः ॥
बिभेद धनुषः कोट्या स्वसेतुं रघुनंदनः ।
अतो द्विजास्ततस्तीर्थं **धनुष्कोटिरिति** श्रुतम् ॥
—इति स्कांदपुराणे (ब्रह्मखण्डे अ. 30/श्लो. 72–75)

[2] कायक्लेशकरैः पुंसां किं तपोभिः किमध्वरैः ।
किं वेदैः किमु वा शास्त्रैर्धनुष्कोट्यवलोकिनः ।

श्रीरामपादः

पातिव्रत्यपरिक्षयाख्यललनादोषांकुरच्छेदनं
पाषाणीकृतगौतमार्यवनिताविज्ञानदानक्षमम् ।
साम्राज्योचितभोग्यभोगविरसं श्रीराम तेऽङ्घ्रिं श्रये
नैर्मल्याय निरंतरस्मृतिकृते वैराग्यभाग्याय च ॥२८॥

श्रीरामदेवं वर्णयति । **पातिव्रत्येति** । **पातिव्रत्यपरिक्षयाख्यललनादोषांकुरच्छेदनं** पतिव्रतायाः भावः पातिव्रत्यं तस्य परिक्षयो नाशः पुरुषसंयोगजन्यः स इत्याख्या नाम यस्य स तथा यः ललनायाः अहल्यायाः दोषः तस्य अंकुरं छिनत्तीति तथोक्तम् । **पाषाणीकृतगौतमार्यवनिताविज्ञानदानक्षमं** अपाषाणा पाषाणतया संपद्यते तथाकृतेति पाषाणीकृता या गौतमार्यवनिता गौतमऋषि...र्या अहल्या तस्याः विज्ञानदानं तस्मिन् क्षमः समर्थस्तम् । संस्पर्शनमात्रेण चैतन्यप्राप्तेरिति भावः । **साम्राज्योचितभोग्यभोगविरसं** साम्राज्ये उचितं योग्यं यद्भोग्यं विषयस्तस्य भोगोऽनुभवः तस्मिन् विगतरसस्तम् । राज्यं त्यक्त्वा वनं गतत्वादिति भावः । **श्रीराम ते तव** । **अंघ्रिं** पादम् । **नैर्मल्याय** निर्मलस्वभावाय । पापपरिहारार्थं वा । **निरंतरस्मृतिकृते** । निरंतरं स्मृतेः स्मरणस्य कृते स्मरणार्थम् । अनवरतस्मरणार्थमित्यर्थः । **वैराग्यभाग्याय च** । वैराग्यमेव भाग्यं तस्मै च । **श्रये** आश्रये । अंतःकरणशुद्धिज्ञानवैराग्यभाग्यदाने क्षमं श्रीरामांघ्रिं भजे इत्यर्थः । **क्रमालंकारः** । ॥ २८ ॥

यथा सुराणां सर्वेषामुत्तमो रघुनंदनः ।
तथैव च धनुष्कोटिः सर्वतीर्थोत्तमा मता ॥

—इति स्कांदपुराणे (ब्रह्मखण्डे अ. 30/श्लो. 85–104)

[1] अथो अहल्यां पतिनाभिशप्तां प्रधर्षणादिंद्रकृताच्छिलीकृताम् ।
स्वदर्शनान्मानुषतामुपेतां सुयोजयामास स गौतमेन ॥

कपिकटकधुरीणः कार्मुकन्यस्तबाणः
क्षपितदितिजसैन्यः क्षत्रियेष्वग्रगण्यः ।
जलधिरचितसेतुर्जानकीतोषहेतुः
पथि पथि गुणसांद्रः पातु मां रामचंद्रः ॥ २९ ॥

कपिकटकेति । कपिकटकधुरीणः कपीनां कटकं सैन्यं । भूभृन्नि तंबवलयचक्रेषु कटकोऽस्त्रिया"मित्यमरः । तस्य धुरीणो धुरंधरः **कार्मुकन्यस्तबाणः** कार्मुके न्यस्तः बाणः येन स तथोक्तः । **क्षपितदितिजसैन्यः** क्षपितं निरस्तं दितिजानां सैन्यं येन स तथोक्तः । **क्षत्रियेषु अग्रगण्यः** श्रेष्ठः । **जलधिरचितसेतुः** जलधौ रचितः सेतुर्येन स तथोक्तः । **जानकीतोषहेतुः** जानक्याः सीतायाः तोषे संतोषे हेतुः । **गुणसांद्रः** गुणैः सांद्रः पूर्णः । **रामचंद्रः** रामः चंद्र इव । **पथि पथि** मार्गे मार्गे । **मां पातु** रक्षतु । ॥ २९ ॥

ताम्रपर्णी

ताम्रपर्णीसरित्तोयं सेवनीयं मुमुक्षुभिः ।
मुक्तीकरोति यत्रत्या शुक्तिश्च पतितं जलम् ॥ ३० ॥

ताम्रपर्णीनदीं वर्णयति । **ताम्रपर्णीति । मुमुक्षुभिः** मोक्षेच्छुभिः । **ताम्रपर्णीसरित्तोयं** ताम्रमर्णीसरितस्तोयं जलम् । **सेवनीयं** सेव्यं । **यत्रत्या** ताम्रपर्णीजलजनिता । **शुक्तिश्च** मुक्तास्फोटोऽपि । "मुक्तास्फोढस्त्रियां

बलं स्वभक्तेरधिकं प्रकाशयन्ननुग्रहं च त्रिदशेष्वतुल्यम् ।
अनन्यभक्तां च सुरेशकांक्षया विधाय नारीं प्रययौ तयाऽर्चितः ॥
—इति महाभारततात्पर्यनिर्णये ((IV. 10, 11)

त्यक्त्वा सुरेप्सितसुदुस्त्यजराज्यलक्ष्मीं धर्मिष्टमार्यवचसा यदगादरण्यम् ।
मायामृगं दयितयेप्सितमन्वधावद्वंदामहे पुरुष ते चरणारविंदम् ॥
—इति श्रीमद्भागवते (IX. 4, 8)

शुक्तिरि''त्यमरः । 'च'शब्दोऽप्यर्थः । **पतितं** मेघात् स्वस्यां पतितं । सदाचारभ्रष्टमिति **ध्वनिः** । **जलं** उदकं जडमिति **ध्वनिः** । **मुक्तीकरोति** अमुक्ता मुक्ताः संपद्यंत इति तथाकरोतीति मुक्तामणिं करोतीत्यर्थः । संसारान्मुक्तं करोतीति **ध्वनिः** । ताम्रपर्णीजलजन्या शुक्तिरपि पापिनं मूर्खं मुक्तीकरोति । किमु तत्तोयम् । अतो मुमुक्षुभिः सेवनीयमिति **ध्वनिलभ्योऽर्थः** ॥

महेंद्रपवतः

तरणिरिव हनूमान् प्राप लंका दिदृक्षु-
र्धरणि तव तनूजां नैव भेतव्वमंब ।
इति गदितुमिवांतः प्रापितो भूमेः
पवनसुतजवेनामंदमाहेंद्रशैलः ॥ ३१ ॥

महेंद्रपर्वतं वर्णयति । तरणिरिवेति । **हे धरणि** भूमे । **तव तनूजां** सीताम् । **दिदृक्षुः** द्रष्टुमिच्छुः । **हनूमान् तरणिरिव** सूर्य इव । **लंकां** रावणपुरीम् । **प्राप** ययौ । **हे अंब** मातः भूमे त्वया **नैव भेतव्यं** । पुत्रीनिमित्तभीतिर्न कर्तव्या । **इति गदितुमिव** भूम्यै कथयितुमिव । **पवनसुतजवेन** पवनसुतो हनूमान् तस्य जवो वेगस्तेन हनूमन्निपीडनेन । **भूमेरंतः प्रापितः** । **अमंदमाहेंद्रशैलः** मंदः स्वल्पो न भवतीत्यमंदः स चासौ माहेंद्रशैलश्च स्थूलमहेंद्रपर्वतः । **भाति** शोभते । ॥ ३१ ॥

कन्यादेवी कन्यातीर्थं च

या सूते सेवामानानां भाग्यरौग्यापुनर्भवान् ।
कन्या किलेयं तीर्थं च कन्यातीर्थमिदं किल ॥ ३२ ॥

कन्यादेवीं कन्यातीर्थं च वर्णयति । या सूत इति । **या** कन्यादेवी [यत्] कन्यातीर्थं च । **सेवमानानां** स्वसेविनां । चतुर्थ्यर्थे षष्ठी । **भाग्यारोग्यापुनर्भवान्** । भाग्यमैश्वर्यं । अरोगस्य भावः आरोग्यं तच्च । न विद्यते पुनर्भवो यस्मिन् स अपुनर्भवो मोक्षः स चैतान् । **सूते** प्रसूते ।

[सा] **इयं** देवी। **कन्या किल** किलेत्यवहासः। प्रसवानंतरं कन्यात्व-हानिरिति भावः। [तत्] **तीर्थं च कन्यातीर्थं किल**। किलेति पूर्ववद्भावः। कन्याकुमारीकन्यातीर्थसेविनां ऐहिकामुष्मिकपुरुषार्थौ भवतीति भावः। ३२

कन्यादेव्याः पार्वतीत्वशंकानिवारणम्

सहधर्मं विदधतीमिव बाणांतकारिणीम्।
बाधौं स्निग्धामिमां रम्यां कन्यां मन्यामहे रमाम्॥ ३३॥

कन्यादेव्याः पार्वतीत्वशंकां निवारयति। सहधर्ममिति। **बाणांत-कारिणीं** बाणस्य बाणासुरस्यांतो नाशः तं करोतीति तथोक्ता ताम्। यद्वा, परशुरामप्रयुक्तबाणस्य शरस्यांतकारिणीं। कन्यादेवी स्वविवाहाशयाऽऽगतस्य बाणासुरस्य वधं तत्र कृतवतीति **कथा**। गोकर्णात् परशुरामप्रयुक्तो बाणः कन्याकुमारीप्रांते पतित इति **कथा** च **पुराणप्रसिद्धा**। **बाधौं स्निग्धां** स्नेहवतीं। **रम्यां** मनोहराम्। **इमां कन्यां** कन्यादेवीं। **सहधर्मं** समान-श्चासौ धर्मश्च सहधर्मस्तम्। स्वभर्त्रा नारायणेन समानधर्मं **विदधतीमिव** कुर्वाणामिव स्थितां **रमां** लक्ष्मीं। **मन्यामहे** निरूपयामः। नारायणस्यापि बाणासुरांतकारित्वात्। समुद्रशायित्वाच्चेति भावः। ॥ ३३ ॥

---

[1] .....गच्छन् प्रभासं शापतो ग्राहदेहाः।
अमूमुचच्चाप्सरसः स पंच ताभिर्गृहितः प्रविकृष्य तीरम्।
एवं हि तासां शापमोक्षः प्रदत्तो यदाऽखिला वो युगपत्संप्रकर्षेत्॥
एकस्तदा निजरूपास्तिरेवेत्यलं तुष्टेन ब्राह्मणेनानतानाम्।
विप्रापहासात्कुत्सितयोनितस्ताः कन्यातीर्थे पांडवः संप्रमोच्य॥
—इति महाभारततात्पर्यनिर्णये (20/163-5)

[1] ततस्तीरे समुद्रस्य कन्यातीर्थमुपस्पृशेत्।
तत्रोपस्पृश्य राजेंद्र सर्वपापैः प्रमुच्यते॥
इति महाभारते (वनपर्वणि—85/23)

[2] दक्षिणं तत्र कन्याख्यां दुर्गां देवीं ददर्श सः॥
—इति श्रीमद्भागवते (10/79/17)

कन्याकुमार्याः लक्ष्मीत्वम्

असि मन्मथमाता त्वं कन्ये मान्यतमे सताम् ।
न चेत् सौंदर्यमाश्चर्यं कथमेतत्तनौ तव* ॥ ३४ ॥

कन्याकुमार्यास्सौंदर्यं वर्णयन् लक्ष्मीत्वं द्रढयति । असीति । **सतां मान्यतमे** पूज्यतमे । **हे कन्ये** कन्याकुमारि । **त्वं मन्मथमाता** कामजननी लक्ष्मीः । **असि** भवसि । **न चेत् वस्तनौ आश्चर्यं** अद्भुतम् । **एतत्** दृश्यमानं । **सौंदर्यं** लावण्यं । **कथं** [भवेत्] मन्मथस्यापि सौंदर्यं अतिसुंदरलक्ष्मीकुमारत्वादिति भावः । ॥ ३४ ॥

अगस्त्यमुनिः

अगस्त्यो मुनिशार्दूलो भवाब्धेर्नः समुद्धरेत् ।
चुलकीकृतगंभीरजृंभितांभोधिडंबरः ॥ ३५ ॥

कन्यातीर्थसमीपे व्यासपर्वतवासिनमगस्त्यं स्तौति । **अगस्त्य** इति । **चुलकीकृतगंभीरजृंभितांभोधिडंबरः** कुंचितांगुलिहस्ततलगतजलं चुलकमित्युच्यते । अचुलकं चुलकं संपद्यते चुलकीकृतं समुद्रापोशनसमये चुलकजलं कृतम् । गंभीरोऽगाधः स चासौ जृंभितोऽभिवृद्धः अंभोधिः समुद्रः । तस्यं डंबरं आडंबरं येन स तथोक्तः । **मुनिशार्दूलः** मुनिश्रेष्ठः । **अगस्त्यः नः** अस्मान् । **भवाब्धेः** संसारसमुद्रात् । **समुद्धरेत्** । चुलकीकृतांभोधेः समुद्रादुद्धरणस्य सुकरत्वादिति भावः । ॥ ३५ ॥

शुचीन्द्रक्षेत्रम्

इंद्रशौचविधानात्ते न शुचींद्रातिपौरुषम् ।
अनिंद्रस्यमनश्च शौचं मम कृत्वा तदार्जय ॥ ३६ ॥

शुचींद्राख्यक्षेत्रं वर्णयति । **इंद्रेति** । **हे शुचींद्र** शुचींद्राख्यक्षेत्र । **ते** तव । **इंद्रशौचविधानात्** इंद्रस्य देवेंद्रस्य शौचं शुद्धिः तस्य विधानात् करणात् । **अतिपौरुषं** अतिमहात्म्यं । **न** भवति । मिथ्यापवादशंकितो

---

* " तथाऽप्यतुललावण्यैर्जनास्त्वां जानतेऽच्युतम् " (3/42) इतिवत्

देवेंद्रः शुचींद्रक्षेत्रे मेषमासे मध्याह्नकालीनसूर्यकिरणमात्रस्पर्शेन तप्तघृते अंगुलिदानाख्यदिव्येन कर्मणा शुद्धोऽभूदिति तत्रत्या **कथा**। **अनिंद्रस्य** असमर्थस्य। **मम मनश्शौचं** चित्तशुद्धिम्। **कृत्वा तत्** अतिपौरुषं। **आर्जय** संपादय। समर्थरक्षणादप्यसमर्थरक्षणस्य श्रेयस्करत्वादिति भावः। ॥ ३६ ॥

आद्यनंतशयनः

शेषे शयान शरदिंदुसमानवक्त्र श्रीशादिकेशव सितोदकजातनेत्र।
दोषातिदूर गतपार गुणांबुराशे दासे दयां कुरु मयीश गतेतराशे ३७

आद्यनंतशयनं वर्णयति। शेष इति। **शेषे** नागाधिपे। **शयान शरदिंदुसमानवक्त्र** शरत्कालस्य इंदुः चंद्रः तेन समानं सदृशं वक्त्रं मुखं यस्य स तथा तत् संबुद्धिः। **श्रीश** लक्ष्मीपते। **सितोदकजातनेत्र** सितं शुभ्रं उदकजातं पद्मं तद्वन्नेत्रे यस्य स तत्संबुद्धिः। पुंडरीकाक्षेति यावत्। [1]**दोषातिदूर** दोषाणां पारतंत्र्यापूर्णतादीनां अतिदूरोऽत्यंतदूरः तत्संबुद्धिः। तद्रहितेत्यर्थः। **गतपार** गतं विगतं पारमवसानं यस्य स तत्संबुद्धिः। **गुणांबुराशे** गुणैरानंदादिभिरंबुराशिरिवांबुराशिः पूर्णः तत्संबुद्धिः। **ईश** समर्थ। **हे आदिकेशव** आद्यनंतशयन [त्वं]। **गतेतराशे** गता इतराशा अन्याशा यस्य स तथोक्तस्तस्मिन्। **दासे** भृत्ये। **मयि दयां कुरु**। ३७

घृतमाला नदी

रूक्षपापाटवीदाहदक्षज्ञानानलोन्नतेः।
सततं हेतुभूतेयं घृतमाला विराजते ॥ ३८ ॥

घृतमालानदीं वर्णयति। रूक्षेति। **रूक्षपापाटवीदाहदक्षज्ञानानलोन्नतेः** रूक्षाणि क्रूराणि यानि पापानि तान्येव अटवी क्रूरपापसमूह इत्यर्थः। तस्याः दाहे भस्मीकरणे दक्षः समर्थः यो ज्ञानानलः ज्ञानाग्निः। *"ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुने"(गी. 4/19)ति वचनात्।

---

1 'चिंतासतापलेपोद्भवमृतिमुखराशेषदोषातिदूरम्।' इति तत्त्वप्रकाशिका।

तस्योन्नतिरभिवृद्धिः तस्याः । **सततं हेतुभूता** कारणीभूता । **इयं घृतमाला** नदी । **विराजते** । यथा घृतधारा अग्नेः अभिवृद्धिं करोति तथेयं नदी स्वस्नानपानादिना ज्ञानाग्नेः अभिवृद्धिं करोति । अत एव घृतमालेति नामा-भूदिति भावः । ॥ ३८ ॥

श्रीमदनंतशयनः

श्रीभूभ्यां कृतपादसेवनमनर्घ्योरुस्फुरद्भूषणं
शेषांगे सततं शयानमुदरप्रोद्भासिपद्मं प्रभुम् ।
धात्रा स्तोत्रचयैः स्तुतं फणिफणैश्छत्रोपमैर्मंडितं
सेवेऽनंतपुरेश्वरं मुनिवरप्रेमाकरं श्रीकरम् ॥ ३९ ॥

श्रीमदनंतशयनं वर्णयति । **श्रीभूभ्यामिति** । **श्रीभूभ्यां** लक्ष्मी धराभ्यां । **कृतपादसेवनं** कृतं पादसेवनं यस्य स तथोक्तस्तं । **अनर्घ्यारुस्फुरद्भूषणं** न विद्यते अर्घ्यं मूल्यं येषां तानि अनर्घ्याणि उरुस्फुरद्भूषणानि यस्य स तथा तम् । **शेषांगे** शेषशरीरे । **सततं शयनं** । **उदर-प्रोद्भासिपद्मं** उदरे प्रोद्भासि शोभमानं पद्मं यस्य स तथोक्तस्तं पद्मनाभमित्यर्थः । **प्रभुं** समर्थं **धात्रा** नाभिपद्मस्थितब्रह्मणा । **स्तोत्रचयैः** । स्तुतिसमूहैः । **स्तुतं** । **छत्रोपमैः** धृतस्य श्वेतच्छत्रस्य उपमा येषां तैः । **फणिफणैः** शेषफणैः । **मंडितं** अलंकृतं । **मुनिवरप्रेमकारं** मुनिवराणां कौंडिन्यादिऋषिश्रेष्ठानां यः प्रेमा स्नेहस्तस्य आकरं उत्पत्तिस्थानं । प्रेमाभिवृद्धिकारणमिति यावत् । **श्रीकरं** स्वभक्तानां संपत्करं । **अनंतपुरेश्वरं** अनंतपुराख्यक्षेत्रस्य स्वामिनं । प्रभुं समर्थं अनंतशयनाख्यपद्मनाभं । **सेवे** भजे । ॥ ३९ ॥

किं लोकात्मकपद्मकंपनभिया पुत्रप्रियेणाथवा
नागाग्रेसरभोगसौभगकृतस्नेहेन वाऽहर्निशम् ।
किं वा श्रीश निजार्पितोरुविविधस्वाद्वोदनास्वादना-
च्छेषेऽनंतपुरेश शेषवपुषि श्रीसेवया वाऽन्यया ॥४०॥

नित्यप्रबुद्धस्य अनंतशयनस्य सदा शयने कारणान्युत्प्रेक्षते । **किं लोकेति** । **हे श्रीश** लक्ष्मीपते । **अनंतपुरेश** अनंतशयन [त्वं] । **शेषवपुषि** शेषभोगे । ***लोकात्मकपद्मकंपनभिया** लोकाः चतुर्दशलोकाः ते आत्मा स्वरूपं यस्य तल्लोकात्मकं यत्पद्मं तस्य कंपनं चलनं तस्य भिया भीत्या । **शेषे किं** शयनं करोषि किं । किमिति प्रश्ने । स्वस्य चलनेन लोकात्मकपद्मकंपो मा भूदिति बुध्या शयनं करोषि वेति भावः । **अथवा** अथवेत्यादिपक्षांतरे । **पुत्रप्रियेण** नाभिपद्मस्थितब्रह्माख्यपुत्रस्नेहेन [शेषे किं] **नागाग्रेसरभोगसौभगकृतस्नेहेन वा** नागाग्रेसरः । सर्पश्रेष्ठः शेषः तस्य भोगः शरीरं । "अहेः शरीरं भोगस्स्यादि"ति हलायुधः । तस्य सौभगं सौकुमार्यं तस्मिन् कृतस्नेहेन वा । **अहर्निशं** अहोरात्रं अहश्च निशा च अहर्निशं । [शेषे किं]। **निजार्पितोरुविविधस्वाद्वोदनास्वादनात्** निजैः स्वभक्तैरर्पितः उरुः श्रेष्ठः विविधः भक्ष्यभोज्यादिनानाप्रकारः स्वादुः रुचिरः ओदनः । अन्नं तस्यास्वादनं भोजनं तस्माद्वा । बह्वन्नपूर्णोदराणां लोके शयनदर्शनादिति भावः । [शेषे] **किं वा अन्यया** श्रेष्ठया । **श्रीसेवया** लक्ष्म्या कृतपादसेवया तत्सेवालोभेनेति यावत् । [शेषे किंवा] आश्रयस्य नित्यप्रबुद्धस्य च तवशयनमन्यथाऽनुपपन्नमिति भावः । **उत्प्रेक्षालंकारः** ॥

त्रीणि त्रयी परिजगाद यदात्मदृष्टिद्वाराणि चारुतरशीलनरोचितानि ।
प्रत्यक्षमेतदनुभावयति प्रमेयं प्रौढप्रजाः प्रभुरनंतपुरेऽब्जनाभः ॥४१॥

त्रीणीति । **त्रयी** "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य" इत्याद्युपनिषद्रूपा श्रुतिः। "इति वेदास्त्रयस्त्रयी"त्यभिधानात्। **चारुतरशीलनरोचितानि** चारुतरं वैराग्यादिसंपन्नत्वेनातिमनोहरं शीलं स्वभावो येषां ते तथोक्तास्ते च ते नराश्च पुरुषाश्च तेषामुचितानि योग्यानि । **आत्मदृष्टिद्वाराणि** आत्मनः परमात्मनः दृष्टिः साक्षात्कारस्य द्वाराणि

---

* 'अजस्य नाभाविति यस्य नाभेरभूत् श्रुतेः पुष्करं लोकसारम् ।'
—इति सूत्रभाष्योदाहृतस्कांदवचनम् (1/1/1) ।

करणानि । **त्रीणि** । **परिजगाद** उक्तवतीति यावत् । **इत्येतत्** प्रमेयं **अब्जनाभः** पद्मनाभः **प्रभुः** समर्थः अनंतशयनः । **अनंतपुरे** अनंतपुरक्षेत्रे । **प्रौढप्रजाः** प्रौढाः सूचितार्थज्ञाननिपुणाः याः प्रजाः जनाः ताः । **प्रत्यक्षं** यथा भवति तथा । **अनुभावयति** ज्ञापयति* । गतिबुद्धीत्यादिना द्विकर्मत्वं । अनंतशयने देवस्य पादसमीपे एकं द्वारम् । *उदरसमीपे एकं द्वारं । मुखसमीपे एकं । इति द्वारत्रयेणापादमस्तकं देवदर्शनं भवतीति सर्वानुभवसिद्धम् । एवं च "श्रोतव्यो मंतव्यो निदिध्यासितव्य" इत्यादि श्रुत्युक्तद्वारत्रयं भगवद्दर्शनसाधनमित्येतत् प्रत्यक्षमनुभूयत इति भावः । ॥४१॥

या तैत्तरीयनिगमांतगकिंवदंती सेवात्रयोचितफलत्रितयं वदंती ।
तत्रत्यसंशयमपाकुरुतेंऽघ्रिमध्यवक्त्रं क्रमेण घटयन् दृशि पद्मनाभः ४२

येति । **सेवात्रयोचितफलत्रितयं** सेवात्रयस्य पादमध्यमुखरूपावयवरूपत्रयोपास्तिरूपसेवात्रयस्य । उचितं योग्यं फलत्रितयं । मोक्षे उपासिततत्तदवयवसाक्षात्काररूपफलानां त्रितयं । **वदंती** प्रतिपादयंती । **या तैत्तरीयनिगमांतगकिंवदंती** निगमांतो वेदांतः । तैत्तरीयनिगमांतः । तैत्तरीयोपनिषदित्यर्थः तस्मिन् गता । **किंवदंती** वार्ता । किंवदंती जनश्रुतिरित्यमरः । एतद्रैमुखतोऽन्नं राद्धं । मुखतोऽन्नं राध्यते । "इत्यादिरूपाऽस्तीति शेषः । **पद्मनाभः** पद्मं नाभौ यस्य सः पद्मनाभः अनंतशयनः । **तत्रत्यसंशयं** तत्रत्यं तैत्तरीयोपनिषदि भवं संशयं । **अंघ्रिमध्यवक्त्रं** अंघ्रिश्च मध्यं च वक्त्रं च । अंघ्रिमध्यवक्त्ररूपावयवानीत्यर्थः । प्राण्यंगत्वादेकवद्भावः । क्रमेण तत्तद्वारगमनक्रमेण । **दृशि** द्रष्टृणा चक्षुषि । **घटयन्** दर्शयन् सन् । **अपाकुरुते** निराकरोति । पादोपासकस्य मोक्षे पाददर्शनमेव फलम् । मध्योपासकस्य मध्यदर्शनमेव फलम् । मुखोपासकस्य मुखदर्शनमेव फलं भवतीति तैत्तरीयोपनिषद्गतप्रमेयं युक्तं न वेति संदेहः । अनंतशयने पादादिगतद्वारे गतस्य पादादिमात्रदर्शनेन निवर्तत इति भावः । ॥ ४२ ॥

---

* 'गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ । (पा. सू. 1/4/52)

पास्यनंतपुरेश त्वमशेषं शेषशाय्यपि ।
तथाहि करुणावंतः परकार्यधुरंधराः ॥ ४३ ॥

पासीति । हे **अनंतपुरेश त्वं शेषशाय्यपि** शेषे अनंते शयानोऽपि शयालुत्वेनानुत्साहोऽपीति भावः । **अशेषं** सर्वं जगत् **पासि** रक्षसि । एतदर्थांतरन्यासेनोपपादयति । **तथाहीति** । **करुणावंतः** दयावंतः । **परकार्यधुरंधराः हि** परेषामन्येषां यत्कार्यं तस्य धुरंधराः निर्वाहकाः हि । कृतकृत्यत्वेन सदा शेषे शयानस्यापि तव शेषपालनं विनाऽशेषपालनं कृपया युज्यत इति भावः । शेषशायिनस्तवाशेषपालनं स्वकीयकार्यादपि परकार्ये आदरेणोपपद्यत इति **ध्वनितोऽर्थः** । अशेषपदस्य शेषव्यतिरिक्त इत्यर्थस्य गमकत्वात् । ॥ ४३ ।

यथा गुहामुखे नाथ शेषे शेषे रमापते ।
तथा हार्दगुहामध्यासीनो रमस्व मे ॥ ४४ ॥

यथेति । **रमापते** लक्ष्मीपते । हे **नाथ** स्वामिन् अनंतशयन त्वं । **गुहामुखे** गुहायाः मुखे द्वारे । **शेषे** नागेंद्रे । **यथा शेषे** शयनं करोषि । शीङ् स्वप्न इति धातोर्लडात्मने पदे मध्यमपुरुषैकवचने रूपमेतत् । अनंतशयनः गुहाद्वारे वसतीति **पुराणप्रसिद्धिः** । **तथा मे** मम । **हार्दगुहामध्यं** हृदिभवा हार्दा या गुहा तस्याः मध्यं तत् । **अध्यासीनः** अधितिष्ठन् । **रमस्व** क्रीडस्व । *अधिशीङ्स्थासां कर्मेति कर्मत्वाद्द्वितीया । तत्र वसन्निति यावत् । गुहामुखवासिनः । हृदयगुहायां रमणस्योचितत्वादिति भावः ॥

सुरगणपरिवारः शोभमानोरुहारः करिकरसमहस्तः कांचनोद्दीप्तवस्त्रः ।
शुभजनकृतगानः शेषभोगे शयानः प्रभुरयमविनाशः प्रीयतादिंरेशः ॥

सुरगणेति । **सुरगणपरिवारः** सुराः "श्रीभूमिनारददिवाकरचंद्रतारैः

---

* अधिशीङ्स्थासां कर्म । (पा. सू, 1/4/46)

पंचायुधैर्गरुडतुंबुरुपर्वताद्यै''रित्युक्ता देवाः तेषां गणः स एव परिवारः सेवकजनो यस्य स तथा । **शोभमानोरुहारः** शोभमानाः उरुहाराः उरवः बहवः हाराः यस्य स तथोक्तः । **करिकरसमहस्तः** करिणो गजस्य करः शुंडा तस्य समाः सदृशाः हस्ताः यस्य स तथा । **कांचोनोद्दीप्तवस्त्रः** कांचन-वत्स्वर्णवदुद्दीप्तं शोभमानं वस्त्रं यस्य स तथा । **शुभजनकृतगानः** शुभा ये जनाः सज्जनास्तैः कृतं गानं स्तुतिर्यस्य स तथा । **शेषभोगे शयानः** शेषस्य शरीरे शयानः । **प्रभुः** समर्थः । **अविनाशः** न विद्यते विनाशो यस्य स तथा नित्य इत्यर्थः । **इंदिरेशः** लक्ष्मीपतिः । **अयं** श्रीमदनंत-पद्मनाभः । **प्रीयतां** प्रीतो भवतु । अनेन प्रबंधनिर्माणेन अनंतशयनः प्रीणात्विति भावः । ॥ ४५ ॥

उपसंहारः

नानावृत्तं स्वयात्राक्रमपरिचितसुक्षेत्रमाहात्म्ययुक्तं
शब्दालंकारबद्धं शमलकुलहरश्लाघनीयार्थहृद्यम् ।
श्रीनाथप्रीतिहेतोर्हयवदनकृपांभोधिसंभूतरत्नं
चक्रे तीर्थप्रबंधं बहुगुणभरितं वादिराजो यतींद्रः ॥ ४६ ॥

कविः स्वनामग्रंथनामकीर्तनपुरःसरं स्वकृतग्रंथस्य हयग्रीवप्रसाद-लब्धत्वेनात्युपादेयतां सूचयन् प्रबंधं श्रीपतेरर्पयति । **नाने**ति । **यतींद्रः** परमहंसश्रेष्ठः । **वादिराजः** वादिराजाख्यकविः । **नानावृत्तं** नानाविधानि वृत्तानि पथ्यावक्त्रोपेंद्रवज्रादिनानावृत्तानि यस्य तत्तथा । **स्वयात्राक्रमपरि-चितसुक्षेत्रमाहात्म्ययुक्तं** स्वेन कृता तीर्थयात्रा तस्याः क्रमः अटनक्रमः तेन परिचितानि अभ्यस्तानि यानि सुक्षेत्राणि श्रीपरशुरामभूम्यादि शोभनक्षेत्राणि तेषां माहात्म्यं महिमा तेन युक्तं सहितं तत् । **शब्दालंकारबद्धं** शब्दा-लंकारेणानुप्रासादिना बद्धं ग्रथितं तत् । **शमलकुलहरश्लाघनीयार्थहृद्यं** शमलानां पापानां कुलं समूहस्तत् हरंतीति तथोक्ताः । 'पुरीषं शमलं मलमि'ति

हलायुधः। ते च ते श्लाघनीयाः प्रशस्ताश्च ते अर्थाश्च तैर्ह्यं मनोहरं तत्। **हयवदनकृपांभोधिसंभूतरत्नं** हयवदनस्य हयग्रीवस्य कृपांभोधिः दयासमुद्रः तस्मात् संभूतं संजातं रत्नमिव स्त्नं तत् हयग्रीवप्रसादस्य मुख्यफलमित्यर्थः। **बहुगुणभरितं** बहवो गुणाः काव्योचितगुणाः तैर्भरितं पूर्णं तत्। **तीर्थप्रबंधं तीर्थानां प्रबंधः प्रतिपाद्यतया बंधनं यस्मिन् काव्ये तत्तीर्थ-प्रबंधाख्यं काव्यं तत्। श्रीनाथप्रीतिहेतोः** श्रीनाथस्य लक्ष्मीपतेः श्रीनारायणस्य प्रीतिः सैव हेतुः कारणं तस्मात् प्रीत्यर्थं। *"निमित्तपर्याय-प्रयोगेषु सर्वासां प्रायदर्शनमिति"चतुर्थ्यर्थे षष्ठी। **चक्रे** चकार॥ ४६॥

मंगलम्

पद्यानि प्रथितापगाच्युतयशोह्द्यानि तत्खंडिता-
वद्येनामलवादिराजयतिना मध्वोक्तिशुद्धात्मना।
बद्धान्यध्वरसिद्धसत्कृतचयोद्रिक्तोरुपुण्यप्रदा-
न्यद्धा यः पठते शृणोति स भवेदुद्दामधामा श्रियः॥ ४७॥

एतत्प्रबंधगतश्लोकानां प्रत्येकं महाफलप्रदत्वमाह। **पद्यानीति**। **प्रथितापगाच्युतयशोह्द्यानि** प्रथिताः पुराणादिप्रसिद्धाः आपगाः गंगा-दिनद्यः तासां। च्युतो न भवतीत्यच्युतः श्रीनारायणः तस्य च यशः कीर्तिः ताभिर्ह्द्यानि मनोहराणि। **मध्वोक्तिशुद्धात्मना** मध्वस्य या उक्तिर्वचनं तत्कृतशास्त्रमित्यर्थः। तस्यां शुद्धः आत्मा मनो यस्य स तथा तेन। मध्व-शास्त्रासक्तमनसेत्यर्थः। **तत्खंडितावद्येन** ताभिर्नदीभिस्तेन च खंडितानि परिहृतानि अवद्यानि पापानि यस्य स तथा तेन। अत एव। **अमलवा-दिराजयतिना** निर्दोषवादिराजाख्ययतिना। बद्धानि रचि(ग्रंथि)तानि। **अध्वरसिद्धसत्कृतचयोद्रिक्तोरुपुण्यप्रदानि** अध्वरैरश्वमेधादियज्ञैः सिद्धः संपन्नः सत्कृतचयः समीचीनपुण्यकर्मसमूहः तस्मादुद्रिक्तं अतिशयितं यदुरुपुण्यं

---

* निमित्तपर्यायप्रयोगेषु सर्वासां प्रायदर्शनम् (वार्तिकः–153)।

तत्प्रददतीति तथोक्तानि । **पद्यानि** श्लोकान् । **यः** पुरुषः । **अद्धा** सम्यग् भक्त्यादिपूर्वकम् । **पठने** पठति । शृणोति परैः पठ्यमानमाकर्णयति वा । **सः** पुरुषः । **श्रियः** ऐहिकामुष्मिकसंपदः । **उद्दामधामा** उत्कृष्टावासभूतः । **भवेत्** जायेत । तस्मिन्सर्वसंपदः सन्निहिता भवंतीति भावः । ॥ ४७ ॥

यत्संनिधानतस्तीर्थक्षेत्राणि भुवनत्रये ।
महतां महितान्यासंस्तस्मै श्रीपतये नमः ॥ १ ॥
यश्चके चक्रमीमांसां यश्चक्रे युक्तिमल्लिकाम् ।
मुकुंदलीलां यश्चके तस्मै काव्यकृते नमः ॥ २ ॥
तपोविद्याविरक्त्यादिसद्गुणौघाकरानहम् ।
वादिराजगुरून् वंदे हयग्रीवदयाश्रयान् ॥ ३ ॥

॥ इति श्रीमत्कविकुलतिलकश्रीमद्वादिराजपूज्यचरणविरचिततीर्थप्रबंधस्य टीकायां लक्ष्मीपतिभट्टोपाध्यायसूनुनारायणाचार्येण कृतायां गुरुभावप्रकाशिकायां दक्षिणप्रबंधः (IV) संपूर्णः ॥

॥ इति श्रीवादिराजश्रीपादकृत तीर्थप्रबंधः ॥

समर्पितो मया भवेत् सुमध्वनुत्तवाणिना ।
रमारमेशपादयोः प्रभंजनाभिधायुजा ॥

॥ श्रीकृष्णार्पणमस्तु ॥

॥ श्रीवादिराजप्रशास्तिः ॥

— o —

वादिराजमुखांभोजनिःसृता वाक्सरस्वती ।
अश्वग्रीवयशोगंगासंगाऽस्मान् पावयत्वलम् ॥ १ ॥

नमोऽस्तु वादिराजाय गुरवे परवेदिने ।
यो बाजिवक्त्रदयया श्राव्यं काव्यमचीक्लृपत् ॥ २ ॥

—श्रीसुरोत्तमतीर्थाः (युक्तिमल्लिकाव्याख्याने) ।

अशेषविद्यांबुधिवाजिराजग्रीवाजिराजस्यनिषेवया यः ।
समुल्लसद्वाग्विभवाजिराजः स नः प्रसन्नो यतिवादिराजः ॥

—वैश्वनाथिनारायणाचार्याः (अद्वैतकालानले) ।

हयग्रीवपदांभोजलोलभृंगं सतां गुरुम् ।
नमामि श्रीवादिराजं ज्ञानवैराग्यसंपदम् ॥ I–3

न तच्चक्षुर्न तच्छोत्रं वादिराजं न पश्यति ।
न शृणोति न सा जिह्वा या न तं वर्णयत्यलम् ॥ 7

यस्यांगमंगचेष्टां च दृष्ट्वा लोकः कुतूहली ।
विस्मरत्याशु कार्याणि गुरुं कस्तं न सेवते ॥ 8

सविनोदं साट्टहासं सस्मितं सुस्वरान्वितम् ।
सरहस्यं सप्रमाणं वादिराजवचोऽमृतम् ॥ 48

संप्रदाययुतं तत्वनिर्णयाढ्यं विसंशयम् ।
अवार्यं पंडिताग्र्यैश्च प्रतिचोद्यनिवारणम् ॥ 49

सखुंदरशिरःकंपं प्रहर्षितसभाजनम् ।
विकासितश्रोत्रमुखं विकस्वरविलोचनम् ॥ 50

हृष्यत्तनूरुहं गात्रे स्वार्पितश्रोत्रमानसम् ॥
सुखबोधकरं श्रोतुर्ग्राह्यं सद्भिः पुमर्थदम् ॥ 51

वागीश्वरेशकारुण्यवार्धिजातं सुकोमलम् ॥
निर्दुष्टं रसवत्स्पष्टं नानंदयति कं जनम् ॥ 52

हरिचतुरकथाढ्यां पावनीं पानतोऽलं
हरिचरणसमीपं प्रापयंतीं जनौघम् ।
बुधसदसि सुधां स्वान् पाययंतं पवित्रं ॥
बुधवरमिममार्यं वर्णयेत् को नु माद्दक् ॥ 53

वादिराजस्य माहात्म्यं को नु वर्णयितुं क्षमः ॥
यत्र हेयमपि स्पष्टमहेयत्वं व्रजेत् किल ॥ III-16

नैदं चित्रं वादिराजे श्रीमध्वहरिकिंकरे ।
प्रसादं योऽतुलं लेभे तयोरन्यैः सुदुर्लभम् ॥ 17

शरीरदार्ढ्यं जनमान्यताऽलं शीलं च विद्वत्तमसंगिताऽलम् ।
शांतिश्च दांतिः सुगुणांतरं वा न चान्यथा सेत्स्यति वादिराजे ॥ 18

असाधारणचातुर्यकाव्यादिकरणादिना ।
महापुरुषता ज्ञेया वादिराजेऽनसूयुभिः ॥ 33

गुणाभिभावकेऽप्यस्मिन् काले माहात्म्यमीदृशम् ।
यत्रोपलभ्यते वादिराजे साधारणः स किम् ॥ 34

श्रीवादिराजं च गुरुं भजध्वं देवस्य कारुण्यनिधिं लभध्वम् ।
ततः सुविज्ञानफलं लभध्वं ततः सदानंदपदं लभध्वम् ॥ 51

श्रीमध्वसिद्धांतसुदुर्गवासी विनाशयन् स्वप्रतिपक्षसंघान् ।
संवर्धयन् श्रीहरिभक्तिकोशं श्रीवादिराजो यतिराज्य आस्ते ॥ 52

वेदाचले कृतपदः सुरहस्यविद्यातुंगशृंगशिखरेष्वपि संविहारी ।
पादेषु तस्य विचरन् स्मृतिभारतेषु श्रीवादिराजयतिपो जयते नृसिंहः ॥ 50
हयगीवपदासक्तो मध्वदासाग्रणीरयम् ॥
प्रसन्नः स्याद्गुरुर्मेऽद्य वाक्पुष्पैरर्चितो मया ॥ 58

—श्रीरघुनाथाचार्यः (वृत्तरत्नसंग्रहे)

— o —

[1]का वाऽर्धांगं पुरारेः ? किटिवरविलसद्दंष्ट्र्याऽधारि का[2] वा ?
[3]को वा क्षेतेऽब्धुराशौ ? युधि धरणिधवैः प्राप्यते को [4]नु शूरैः ? ॥
[5]को वा नैवास्ति लक्ष्मीदितिजमथनयोः ? को [6]गुरुर्निर्जराणां ?
[7]को वा वाच्यो धरित्र्यां प्रतिवचनगतैः मध्यवर्णैर्मुनींद्रः ? ॥

—इति श्रीसुधींद्रतीर्थकृत श्रीवादिराजप्रशंसत्वम् ॥

कदा पुण्यारण्ये शुभधवलगंगापरिसरे
चरन् सूरेः सेवाजनितपरमानंदभरितः ॥
अयि संवित्स्वामिन् हयवदन वार्दीशवरद
प्रसीदेति क्रोशन्निमिषमिव नेष्यामि दिवसान्

—इति श्रीसत्यधर्मतीर्थाः (वादिराजस्तुतौ) ।

इंद्रादिदेवताराध्यमध्ववंशजमादरात् ।
वंदितांघ्रियुगं सद्भिर्वादिराजं नतोऽस्म्यहम् ॥

—इति श्रीवेदवेद्यतीर्थाः (श्रीवादिराजस्तुतौ) ।

श्रीविष्णुतीर्थसद्वंशभूषणं मितभाषणम् ।
भवार्तिभंजनं श्रीमद्वादिराजमहं भजे ॥

—इति श्रीवादिवंद्यतीर्थाः (श्रीवादिराजाष्टके) ।

— o —

---

[1] भवानी [2] मेदिनी [3] मुरारिः [4] विजयः
[5] वियोगः [6] वागीशः [7] वादिराजयोगी

चित्रालंकाररम्या मृदुपदविलसन्नर्मगंभीरभावा
सत्सर्गाश्चर्यबंधा नवरसभरिता स्तुत्यसंस्थानयुक्ता ।
काव्यश्रीराविरासीत् यदमलहृदयाच्छ्रीपतेर्यत्र वासः
सोऽव्याच्छ्रीवादिराजामृतमयजलधिर्युक्तिरत्नाकरो नः ॥

तुरंगतुंडकरुणामंडितः खंडितेषणः ।
धरासुराग्रणीर्दद्याद्वादिराजगुरुर्दृशम् ॥

नमोऽस्तु वादिराजाय गुरवे दीनबंधवे ।
यो मां वराकं कृपया मृत्युग्रस्तममूमुचत् ॥

—श्री नारायणाचार्याः (हरिमणीशविजयव्याख्याने)

मार्याभवैरिणे माध्वराद्धांतवनचारिणे ।
वचो नखरिणे वादिराजकेसरिणे नमः ॥

कामधेनुर्यथा पूर्वं सर्वाभीष्टफलप्रदा ।
तथा कलौ वादिराजश्रीपादोऽभीष्टदः सताम् ॥

कुष्ठापस्मारलूतादिबालस्फोटादिकान् बहून् ।
मृत्तिका नाशयत्येव वृंदावनगता मुनेः ॥

—गंगातीरनिवासश्रीनारायणाचार्याः (श्रीवादिराजकवचम्)

माता राजा मत्पिता वादिराजः भ्राता राजा मत्सखा वादिराजः ।
सर्वस्वं मे वादिराजो दयालुः नान्यद्दैवं नैव जाने न जाने ॥

हरिभक्तिदयांभोधितरलक्रीडनोत्सुकाः ।
गुरवो वादिराजार्याः करुणां वितरंतु मे ॥

—श्रीवेदनिधितीर्थाः

श्रीवादिराजतरणिं शरणं यामि सत्वरम् ।
मानसध्वांतविच्छित्त्यै स्थित्यै धर्मध्वनः सदा ॥

—श्रीवासुदेवाचार्याः (वादिराजस्तोत्रे)